CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहनम्

प्रथमो भागः

भट्टश्रीलक्ष्मणाचार्यं विरचितम्

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

श्री ५ को सरकार
पुरातत्व र संस्कृति विभाग
नेपाल राष्ट्रिय पुस्तकालय

श्री ५ महाराजाधिराज
महेन्द्रवीरविक्रमशाहदेवानां
चतुश्चत्वरिंशत्तम शुभजन्मोत्सवावसरे
प्रकाशितम्

CC-0. Nepal Sanskrit Academy, Kathmandu

अस्य ग्रन्थस्य टीका टिप्पण्यादयः पुनर्मुद्रणादयश्च
सर्वेऽधिकारा राजकीयनियमानुसारेण प्रकाशकाधीनाः

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहनम्

भट्टश्रीलक्ष्मणाचार्य विरचितम्

अधिकारीत्युपाह्व शंकरनाथ शर्मणः का. मु. अध्यक्षतायाम्
ज्यौतिषाचार्य पण्डित देवीप्रसाद लंसालेन सम्पादितम्

श्री ५ सर्वकारस्य

पुरातत्व तथा संस्कृतिविभागान्तर्गत
नेपालराष्ट्रियपुस्तकालयतः प्रकाशितम्

CC-0. Nepal Sanskrit Academy, Kathmandu

पुरातत्व प्रकाशनमाला १४
प्रथमं संस्करणम् १०००

संवत् २०२०

मूल्यम् ५।५०

श्री ५ को सरकार, एजुकेशन प्रेसमा मुद्रित

CC-0. Nepal Sanskrit Academy, Kathmandu

विचार

ज्योतिष शास्त्रको क्षेत्रमा जगन्मोहनको स्थान प्रामाणिक ग्रन्थको रूपमा अतुलनीय छ । यस दुर्लभ ग्रन्थका रचनाकार श्री भट्टलक्ष्मणाचार्य हुन् । जगन्मोहनको अर्को प्रति अन्यत्र उपलब्ध छ छैन त्यो पनि निश्चयात्मक रूपमा भन्न सकिन्न । तर यो त स्पष्ट नै छ कि ज्योतिष विज्ञानको इतिहासमा यस ग्रन्थको स्थानसर्वोच्च पङ्क्तिमा राखिने छ । यो ज्योतिष शास्त्रको तीन स्कन्ध मध्ये तृतीय संहिता स्कन्ध हो । यसमा भएका विषयहरू त अत्यधिक छन् । त्यस मध्ये स्वप्नफल वर्णन र नक्षत्रमाला चन्द्रमा र अगस्त्यलाई अर्घ्यदान आदि विषयहरू अरू कुनै संहिता वा अरू विषयमा देखिएका छैनन् । उपरोक्त विषय एक दुइ अध्यायको मात्र हो । यति ठूलो र महत्वपूर्ण ग्रन्थ र ग्रन्थकारको नाम ज्योतिष शास्त्रका इतिहासकारले आज सम्म दिन सकेका छैनन् । यसलाई प्रकाशमा ल्याउने श्रेय नेपाललाई नै प्राप्त भएको छ । ज्योतिष शास्त्रको क्षेत्रमा यस प्रकाशनको ठूलो देन रहने छ । यसमा पूरा विश्वास गर्न सकिन्छ ।

यस ग्रन्थलाई दुई खण्डमा प्रकाशित गरिंदै छ । यो प्रथम भाग हो र यस्मा ४३ अध्याय छन् । आशा छ पाठक वर्गलाई यस पुस्तकको उपयोगिता पूर्ण रूपेण मिल्ने छ । यसको प्रकाशनकालागि मेहनत गर्नु हुने सबैलाई धन्यवाद छ ।

रमेश जंग थापा
निर्देशक
श्री ५ को सरकार
पुरातत्व र संस्कृति विभाग

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

भूमिका

अयि मान्या विपश्चिदपश्चिमाः। ज्ञातमेव तत्र भवतां यदस्माकं ज्योतिः शास्त्रमतीव प्राचीनतरम्। अखिल तारागणो दिविचराश्च स प्रकाशचाक चक्यात्सहज रमणीयतया च सर्वेषां कुतूहल विषया सन्ति। नित्य नैमित्तिक धर्मकर्मानुष्ठानादौ तेषां गति स्थिति दर्शनस्य परमावश्यकतया मन्त्रद्रष्टारो यज्ञकर्तारश्च प्राक्कालादेव तत्र विषये दत्तावधानाऽभूवन्। तत्कालादारभ्येदानीं यावत् ब्रह्मानारदवशिष्ठप्रभृतयोऽतीन्द्रियज्ञान शक्तय स्तथा मयार्यभट्टवराह ब्रह्मगुप्तादयः मतिमन्तः शास्त्रावबोधन शोधन निपुणा भास्करादयः स्वैः स्वैरेतद्विषयकनिबन्धै रेतच्छास्त्रमुन्नतिमनैषुः। तदनु लुप्तप्राये संहितास्कन्धे श्रीभट्टलक्ष्मणाचार्येण सकल संहिता लक्षणोपेतो जगन्मोहनाख्यो नाम ग्रन्थो निर्मितः। सोऽध्यावधि नैव प्रकाशितः तदेतस्य त्रिचत्वारिंशदध्यायात्मकः पूर्वभागोऽयमद्य प्रकाश्यते। अनेन पौरस्त्य ज्यौतिषशास्त्राऽनुयायिनां महानुपकारो भविष्यतीति मन्ये।

अयमाचार्य कदा कुत्र जनुरधत्त इति विषय आचार्येण स्वयं स्वविषये किमपिनोपन्यस्तम्। ऐहिकनश्वर सुखविमुखानां मोक्ष रूप परम पुरुषार्थ पथमात्रं प्रतिपित्सवो मुनयइव प्राचीन आचार्या अपि लेशत एवैहिक सुख सम्पत्ति साधनफलकेषु कर्मयोगोपयोगिषु स्मृत्यादिषु निबन्धेषु स्वस्वबुद्धि परिचालयन्तः कालं यापयन्तिस्म। तस्मादस्माकमत्र इतिहासा भावः।

अत्र प्रथमं पुस्तकं "प्र" संज्ञकं द्वितीयं "अ" तृतीयं "क" चतुर्थ "थ" इति संज्ञकं कल्पितम्।

अस्मिन् प्रकाशन विषये पं. दामोदर कोईराला पं. हरिप्रशाद नेपालः, पं. देवराज पौड्यालः, पं. यज्ञानन्द गुभाजु प्रभृति यै र्यै विद्वद्भिः सहयोगः कृत स्ते शतशो धन्यवादार्हाः, इति।

विनीतः

पण्डित देवीप्रसाद लंसालः

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहनस्थप्रथमभागात्मकस्य विषयानुक्रमणिका

प्रथमाध्याये	१
मङ्गलाचरणम्	
ज्योतिः शास्त्रस्य वेदचक्षुत्व कथनम्	
प्रथमस्कन्धः प्रतिपादनम्	
द्वितीयस्कन्धः प्रतिपादम्	
तृतीयस्कन्धः प्रतिपादनम्	
द्वितीयाध्याये	२०
गोलप्रशंशा	
ज्योति :शास्त्रपठने द्विजाधिकारत्वकथनम्	
नक्षत्रपाठकनिन्दा	
वैद्यज्योतिर्विदोर्मातृपितृत्वकथनम्	
ज्योतिर्विदीप्रश्नविधिः	
षड्विधबलानांनामावली	
तृतीयाऽध्याये	३४
महायुगप्रमाणज्ञानम्	
वृष्टचाद्यानयनक्रमम्ः	
नवमेघानयनम्	
चतुर्थाध्याऽये	३८
संवत्सराधिपत्वकथनम्	
संवत्सर पुरुषशरीम्	
पञ्चमाऽध्याये	४०
संवत्सरफलानि	
षष्टाध्याये	५४
गणितप्रोयोजनम्	

CC-0. Nepal Sanskrit Academy, Kathmandu

संबत्सराऽधिपफलानि	
सस्याधिपफलानि	
सप्तमाऽध्याये	६१
आर्द्राप्रवेशफलम्	
अष्टमाऽध्याये	६६
गुरूदयास्तफलम्	
नवमाऽध्याये	६८
रविचारफलम्	
दशमाऽध्याये	७१
चन्द्रचारफलम्	
एकादशाऽध्याये	७७
भौमचारफलम्	
द्वादशाऽध्याये	८१
बुधचारफलम्	
त्रयोदशाऽध्याये	८४
गुरुचारफलम्	
चतुर्दशाऽध्याये	८८
शुक्रचारफलम्	
पञ्चदशाऽध्याये	९२
शनिच्चार फलम्	
षोडशोऽध्याये	९३
राहुरारवशतोराशिफलानि	
कूर्मचक्रन्यासः	
राहोःसव्यापसव्यग्रासफलम्	
सप्तदशाऽध्याये	१०७
केतुचार फलम्	
अष्टादशोऽध्याये	११२

CC-0. Nepal Sanskrit Academy, Kathmandu

ग्रहणफलम्
एकोनविंशोऽध्याये १ १ ३
परिवेषफलम्
विंशोऽध्याये १ १ ६
चन्द्राऽगस्त्ययोरर्घ्य विधिः
कालनिर्णयः
संक्रान्तिफलम्
एकविंशोऽध्याये १ २ ८
अधिमास निर्णयः
द्वाविंशोऽध्याये — १ ५ २
अरिष्टादिकथनम्
त्रयोविंशोऽध्याये — १ ५ ७
अङ्ग ग्रहोच्च–शत्रु–मित्र–वृत्तादिकथनम्
चतुर्विंशोऽध्याये — १ ६ ६
कालज्ञानम्
पञ्चविंशोऽध्याये — १ ७ ३
सुस्वप्नकथनम्
षड्विंशोऽध्याये — १ ८ ७
दुःस्वप्नकथनम्
सप्तविंशोऽध्याये — २ ० ०
तिथिफलकथनम्
अष्टाविंशोऽध्याये — २ १ २
बारचारफलकथनम्
एकोनत्रिंशोऽध्याये — २ २ १
नक्षत्रफलकथनम्
त्रिंशोऽध्याये — २ ३ ३
योगफलकथनम्

CC-0. Nepal Sanskrit Academy, Kathmandu

एकत्रिंशोऽध्याय — २३६
करणफलकथनम्
द्वात्रिंशोऽध्याये — २३९
चन्द्रबलकथनम्
त्रयस्त्रिंशोऽध्याये — २४४
ताराबलकथनम्
चतुस्त्रिंशोऽध्याये — २४९
गोचरफलकथनम्
पञ्चत्रिंशोऽध्याये — २५७
लग्नबलकथनम्
षड्त्रिशोऽध्याये २६१
अन्धादिलग्नफलम्
सप्तत्रिशोऽध्याये २६३
मुहूर्तफलकथनम्
अष्टत्रिशोऽध्याये २६४
अवयोगादिफलकथनम्
उनचत्वारिंशोऽध्याये २७३
नक्षत्रमाला वर्णनम्
चत्वारिंशोऽध्याये
देशव्यवस्थाकथनम् ३०७
उपग्रहदोषकथनम्
ग्रहण-उत्पातादिकथनम्
एकचत्वारिंशोऽध्याये ३१२
वारनक्षत्रसंभूतामृतसिद्धि योगादि कथनम्
द्विचत्वारिंशोऽध्याये
स्वपक्षसंस्थापनम् ३१६
त्रिचत्वारिंशोऽध्याये
गुणदोषाऽपवाद कथनम् ३२५

CC-0. Nepal Sanskrit Academy, Kathmandu

श्रीगणेशाय नमः

प्रह्वाम्भोजभवामरेन्द्रनिकर[1] स्फूर्जत्किरीटोज्वल–
ज्योत्स्नालीढपदारविन्दयगलस्तत्त्वस्वरूपो रविः ।
ब्रह्माण्डोदरसंस्थिताखिलजगद्ध्वान्तस्य विध्वंसनं [2]
यः कुर्वन्नखिलं जगत्प्रतिदिनं[3] पर्येति कालात्मकः ॥१॥

शरदिन्दुविकाशमन्दहासां लसदिन्दीवरलोचनाभिरामाम् ।
अरविन्दसमानसुन्दरास्यामरविन्दासनसुन्दरीमुपास्ये ॥२॥

कुन्देन्दुशङ्खस्फटिकामलप्रभा ज्योतिर्मयी श्वेतसरोजवासिनी ।
पाशाक्षमालाङ्कुशपुस्तकैर्युता वाणी विभूतिं वचसः करोतु मे ॥३॥

स्कन्धद्वयं वृत्तविचित्रमर्थं गम्भीरमादावधुना यदुक्तम् ।
तत्संहितास्कन्धमिदं तृतीयं वक्ष्ये जगन्मोहननामधेयम्[4] ॥४॥

स्मृतौ पुराणेषु च संहितासु श्लोकान् समुद्धृत्य यथानुपूर्वम् ।
अहं समग्रं कथयामि सारं मुक्ताफलानीव महार्णवेभ्यः ॥५॥

सुवृत्तयुक्तानि[5] सुवर्णभाञ्जि निःशेषदोषैरपि वर्जितानि ।
रत्नानि साराणि सदर्थदानि[6] क्रमं विना बिभ्रति नैव शोभाम् ॥६॥

---

[1]प्रह्वाम्भोजसुरासुरेन्द्रनिलय इति पाठान्तरम् । [2]स ध्वंसनो पा. ।
[3]जगत्यनुदिनं क.च.प.पाठः । ४ श्लोकः अ. प. पुस्तकयोर्नास्ति ।
[4]जगन्मोहनकाभिधानम् च । [5]सुवृत्तरत्नानि अ. क. । [6]समर्थितानि पा

CC-0. Nepal Sanskrit Academy, Kathmandu

नारदः–

सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम् ।
वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमुदाहृतम् ॥७॥

वसिष्ठः–

ज्योतिःशास्त्रं समग्रं प्रथमपुरुषतः स्वर्णगर्भाद् विदित्वा
पूर्वं ब्रह्मा तथोपर्यखिलमुनिगण–प्रार्थनाद्[1] यच्चकार ।
तच्चेदं सुप्रसन्नं मृदुपदनिकरैर्गुह्यमध्यात्मरूपं
शश्वद्विश्वप्रकाशं ग्रहचरितविदां निर्मलं ज्ञानचक्षुः ॥८॥

दृष्ट्वाद्यशास्त्रं मुनिसंप्रणीतं वेदाङ्गमग्र्यं च महासमासम् ।
कुर्याद् ग्रहज्ञाभरणार्थमेतां मुक्तावलीं निर्मलवृत्तचित्राम् ॥९॥

वेदास्तावद्[2] यज्ञकर्मप्रवृत्ता
यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।
शास्त्रादस्मात् कालबोधो यतः स्याद्[3]
वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात्[4] ॥१०॥

ऋतुक्रियार्थं श्रुतयः प्रवृत्ताः कालाश्रयास्ते ऋतवो निरुक्ताः ।
शास्त्रादमुष्मात् किल कालबोधो वेदाङ्गतामुष्य ततः प्रसिद्धा॥११॥

छन्दः पादौ शब्दशास्त्रं च वक्त्रं कल्पः पाणी ज्योतिषं चक्षुषी च ।
शिक्षा घ्राणं श्रोत्रमुक्तं[5] निरुक्तं वेदस्याङ्गान्याहुरेतानि षट् च।१२॥

---

[1]ततोऽभून्मुनिवरसगणप्रार्थनाद् पा. । [2]यस्मात् क.ख.प. ।
[3]यतोऽस्मात् क. । [4]ज्यौतिषं प्रोक्तमार्यैः क, ज्यौतिषं प्रोक्तमाद्यैः ख ।
९–१० श्लोकौ अ. प. पुस्तकयोर्न स्तः । [5]श्रोत्रमेतत् पा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वेदस्य चक्षुः किल शास्त्रमेतत्प्रधानताऽङ्गेषु ततोऽस्यजाता ।
अङ्गैर्युतोऽन्यैः परिपूर्णमूर्तिश्चक्षुर्विहीनः पुरुषो नकश्चित् ॥१३॥

तस्माद् द्विजैरध्ययनीयमेतत् [1]पुण्यं रहस्यं परमं च तत्त्वम् ।
यो ज्यौतिषं वेत्ति नरः स सम्यग्धर्मार्थकामांल्लभते यशश्च ।१४॥

यो वेद वेदनयनं सदनं हि सम्यग्
ब्राह्मयः सवेदमपि वेद किमन्यशास्त्रम् ।
यस्मादतः [2]प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी ॥१५॥

ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कात्स्न्र्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता ।
स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
होराद्यङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ॥१६॥

नारदः

अस्य शास्त्रस्य सम्बधो वेदाङ्गमिति कीर्तितः ।
अभिधेयं च जगतः शुभाशुभनिरूपणम् ॥१७॥

स्कन्धत्रयात्मकं शास्त्रमाद्यं सिद्धान्तसंज्ञकम् ।
द्वितीयं जातकस्कन्धं तृतीयं संहिताह्वयम् ॥१८॥ इति

विनैतदखिलं श्रौतं स्मार्तं कर्म न सिध्यति ।
तस्माज्जगद्धितायेदं ब्रह्मणा निर्मितं पुरा ॥१९॥

---

[1]मेवपा । [2]तस्मान्नरः पा । १४-१५ ख पुस्तके नास्ति । १४-१६ श्लोकाः प्र.अ.प. पुस्तकेषु न सन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वसिष्ठः-

दिव्यं ज्ञानमतिन्द्रियं यदृशिभि-र्ब्राह्मं वसिष्ठादिभिः
पारंपर्यवशाद्रहस्यमवनीं नीतं प्रकाश्यं ततः ।
नैतद्द्वेषिकृतघ्नदुर्जन[1] दुराचाराचिरावासिनां ६
स्यादायुःसुकृतक्षयो मुनिकृतां सीमामिमामुज्झतः ॥२०॥

[2]आर्षेषु ग्रन्थेषु विद्यमानेषु मूलग्रन्थविरोधे पौरुषेय-ग्रन्थावलो-कनेदोषमाह भरद्वाजः—

मूलागमेषु सत्स्वेव कृत्रिमं यः प्रकाशयेत् ।
प्रजाक्षयो भवेत्तस्य श्रोतुश्चापि न संशयः ॥२१॥

न मूलागमवाक्यानि तदर्थो वा न विद्यते ।
यत्रायुषः क्षयाद्धेतोस्तं ग्रन्थं नावलोकयेत् ॥२२॥

शौनकः-

शतन्यूने सहस्राणां चतुष्के तु कलौ युगे ।
विन्ध्यादुत्तरदेशे स्यान्मूलागमपरिक्षयः ॥२३॥

यस्य यस्य गृहे सन्ति ग्रन्थाः स्वल्पाश्च कृत्रिमाः ।
त एव पण्डितंमन्याः संप्रदायविर्वाजिताः ॥२४॥

उदितेनास्तगेनापि चन्द्रेणैव भविष्यति ।
ज्ञान प्रतिपदादीनां तिथीनामपि दुर्लभम् ॥२५॥

---

[1]निराचारा पा ।   [2] वाक्यमेतत् प्र.अ.प. पुस्तकेषु नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अत्रः-

विन्ध्यस्योत्तरभागे तु संप्राप्ते तु कलौ युगे ।
सिद्धान्तादिपरिज्ञानं न कस्यापि भविष्यति ॥२६॥

स्मृतिव चनमपि–

विन्ध्यस्य दक्षिणे भागे यत्र गोदावरी स्थिता ।
तत्र वेदाश्च यज्ञाश्च संभवन्ति कलौ युगे ॥२७॥

चतुःशतीं सप्तशतीं श्रीगीतां स्तुतिमेव च ।
वेदत्वेन ग्रहीष्यन्ति सम्प्राप्ते तु कलौ युगे[1] ॥२८॥

व्याससंहितायाम्–

संम्प्राप्ते तु कलौ काले विन्ध्याद्रेरुत्तरे स्थिताः ।
ब्राह्मणा यज्ञरहिता ज्यौतिःशास्त्रपराङमुखाः ॥२९॥

यज्ञाध्ययनसंक्रान्तिगृहषोडशकर्मणाम् ।
प्रधान कारणं प्रोक्तं यत् तत् कालविनिर्णयम् ॥३०॥

विनैतदखिलं श्रौतं स्मार्तं कर्म न सिध्यति ॥३१॥

अपारिजातः कविपारिजातः स नामतो जातकपारिजातः ।
सुजातवाणीविभवोऽभिजातो पदानुभूत्यै[2] कुरुते निबन्धान्ः ॥३२॥

---

[1] स्मार्तकर्मविवर्जिताः क ख च । २९–३१ प्र प पुस्तकयोर्न सन्ति
[2] सुजातवर्णाविभवाभिरामंनानोपरूपैः प्र. प, ।

CC-0. Nepal Sanskrit Academy, Kathmandu

दुर्बोधमस्य प्रथितं प्रमेयं नानाविधं सद्गुरुणाऽभिगम्यम् ।
संक्षिप्य सल्लक्ष्मणभट्टनामा[1] वक्ष्ये जगन्मोहननामधेयम् ॥३३॥

दोषालोकननिपुणाः[2] परुषगिरो दुर्जनाश्च लघुकाश्च ।
दर्शनमपिभयजननं[3] येषामनिमित्तपिशुनानाम्[4] ॥३४॥

अथ ज्योतिषशास्त्रप्रयोजका एते ।

नारदः--

ब्रह्माचार्यो वसिष्ठोऽत्रिर्मनुः कश्यपरोमशौ ।
मरीचिरङ्गिरा व्यासो नारदः शौनको भृगुः ॥३५॥

च्यवनो यवनो गर्गः पुलस्त्यश्च पराशरः ।
अष्टादशैतै गम्भीरा ज्योतिःशास्त्रप्रवर्तकाः ॥३६॥

गर्गः–

गौतमो गालवो गर्गो भर्गो भावर्ग भागुरी ।
भारद्वाजोऽत्रिमातङ्गौ नारदः शौनकः शुकः ॥३७॥

व्यासः प्राचेतसो वाचस्पतिः शक्ति पितामहः ।
पुलस्त्योऽगस्तरास्तिको रोमशः पौलिशः कुशः ॥३८॥

---

[1]तल्लक्ष्नणभट्टनामा प्र । [2]दोषालोकने ऽपि पुनः अ ख ।
[3]दर्शनमपि न सहन्ते अनुसयजननं क ख । [4]अनिमित्त तो हि पिशुनानाम् क अनिमित्ततो ऽपि पिशुनानाम् ख ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वसिष्ठो वामदेवश्च विश्वामित्रः पराशरः ।।३९।।

वटेश्वरसंहितायाम्--

च्यवनो यवनो लल्लो मल्लो मुञ्जलदेवलौ ।
काश्यपः सत्यनासत्यौ मयः कुत्सो महेश्वरः ।।४०।।

धनञ्जयो भोजदेवस्तथा वररुचिर्मनुः ।
दक्षः कात्यायनो जीवशर्मा कल्याणवर्मकः ।।४१।।

आपस्तम्बश्च माण्डव्यो रविश्चूडामणिः शशी ।
वराहमिहिरो ब्रह्मगुप्तः पौष्करलम्पटौ ।।४२।।

स जैमिनिः पृथुयशाः श्रीधरार्यभटासिताः ।
श्रीपतिर्विक्रमादित्यः कृष्णादित्यौ मणीन्धकः ।।४३।।

प्रद्योतनः सिद्धसेनो विष्णुगुप्तो महाबली ।
वसन्तराजः कौण्डिन्यः[१] सिद्धसेनो वटेश्वरः ।।४४।।

दामोदरो नागदेवः संवर्तो मल्लिकार्जुनः ।
मार्कण्डेयो याज्ञवल्क्यो वामुदेवश्च कौशिकः ।।४५।।

शातातपो देवकीर्तिर्यमः कण्वो महामुनिः ।
अङ्गिरा शङ्खकपिलौ देवस्वामी भृगूत्तमः ।।४६।।

सनत्कुमारो विमलज्योतिर्ध्रुवसनातनौ ।
एते ज्यौतिषशास्त्रज्ञास्त्रिकालज्ञानिनः पृथक् ।।४७।।

---

[१] कौडिन्यः च पा.

CC-0. Nepal Sanskrit Academy, Kathmandu

ग्रन्थविस्तारकास्तेषां मतान्यादाय कृत्स्नशः ।
प्रीतये जातकस्कन्धसमुच्चय इहोच्यते ॥४८॥

धिग्गृहं गृहिणीशून्यं धिक् कलत्रमपुत्रकम् ।
धिग्धनं दानरहितं धिग्ज्यौतिषमजातकम् ॥४९॥

अर्थार्जने सहायः पुरुषाणामापदर्णवे पोतः ।
यात्रासमये मन्त्री जातकमपहाय नास्त्यपरः ॥५०॥

ब्रह्मसंहितायाम्--

अथ प्रथमस्कन्धप्रतिपादनम्

ग्रहाणां मध्यमा भुक्तिः स्फुटभुवितरनन्तरम् ।
दिक्साधनं ततश्छायालग्नकालविनिर्णयः ॥५१॥

चन्द्रार्कग्रहणं सम्यक् तयोश्च परिलेखनम् ।
समागमौ युद्धभेदौ भग्रहाणां युतिः स्थितिः ॥५१॥

उदयास्तमयज्ञानं चन्द्रशृङ्गोन्नतिर्नतिः ।
पातवैधृतयोर्भेदौ भूगोलो यन्त्रलक्षणम् ॥५३॥

मानक्रिया मानभेदाश्चाद्यस्कन्धे प्रकीर्तिताः ॥५४॥

अथ द्वियीयस्कन्धप्रतिपादनम्

राशिभेदः खेटयोनिवियोनिजन्मलक्षणम् ।
निषेको जननं पुंसोरनिष्टं चाङ्गलक्षणम् ॥५५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

आयुर्दायो दशाभेदो भेदाश्चान्तर्दशादयः ।
अष्टवर्गः कर्मजीवो राजयोगाश्च कीर्तिताः ॥५६॥

चान्द्रयोगा द्विग्रहाद्याः प्रव्रज्यायोगसम्भवाः ।
राशेः फलं दृष्टिफलं तथा भावफलं स्मृतम् ॥५७॥

आश्रयाख्याश्च योगाश्च संकीर्णो योगसंभवः ।
स्त्रीजातकं नष्टयोगो निर्याणं नष्टजातकम् ॥५८॥

देशकालविभागोऽपि कालाकालमृतीतयः[१] ।
परिहारोऽपमृत्योश्च स्मरणं मृत्युनिर्णयः ॥५९॥

शवस्य परिणामोऽपि तत्तल्लोकविलम्बनम् ।
भाविजन्मान्यदन्यत्र प्रसङ्गेन विचार्यते ॥६०॥

द्रेष्काणाश्च क्रियाश्चैते द्वितीयस्कन्धसंभवाः ॥६१॥

अथ तृतीयस्कन्ध प्रतिपादनम्

शास्त्रोपनयनाध्यायो ग्रहचारोऽब्दलक्षणम् ।
वत्सराणां तु नामानि तेषां फलमुदाहृतम् ॥६२॥

राज्ञः फलं तथा मन्त्रिफलं सस्याधिपस्य च ।
रसाधिपफलं वक्ष्ये खेटचारित्रलक्षणम् ॥६३॥

सूर्येन्दुग्रहणं चैव गन्धर्वनगरं तथा ।
प्रतिसूर्यश्च निर्घातो दिग्दाहश्च रजस्तथा ॥६४॥

---

[१]कालाकालमृती तथा ख ।

CC-0. Nepal Sanskrit Academy, Kathmandu

भूकम्प परिवेषश्च इन्द्रचापस्तथैव च ।
प्रतिमानां विकाराश्च तिथीनां फलमुच्यते ॥६५॥

वाराणां च फलं चैव नक्षत्रफलमुत्तमम् ।
तथा योगफलं चैव करणानां तथा क्रमात् ॥६६॥

गर्भाधानं विशेषेण ततः पुसवनं परम् ।
सूतिकागृहनिर्माणं विष्णुपूजाविधानकम् ॥६७॥

प्रसूतिलक्षणं चैव जन्मारिष्टं तथैव च ।
पञ्चाङ्गफलमाख्यातं भावसंज्ञास्तथा पुनः ॥६८॥

सुनफापञ्चकं चैव, अनफा च तथैव च ।
दशसंख्या दुरुधरा योगा द्विग्रहसंज्ञकाः ॥६९॥

तथा जन्मोदयश्चैव जातकर्मविधिस्ततः ।
नामध्येयविधिः पश्चादन्नप्राशनमेव च[1] ॥७०॥

कर्णवेधविधिः क्षौरमक्षरारम्भ[2] उच्यते ।
द्विजानां चोपनयनं ततो वेदव्रतानि च ॥७१॥

विद्यारम्भविधानं च समावर्तनलक्षणम् ।
पोतकीशकुनं चैव क्षुतं शुनकशाकुनम् ॥७२॥

दोषाश्च दोषभङ्गाश्च कालहोराफलं पुनः ।
उपग्रहफलं चैव सिद्धयोगाभिधानकम् ॥७३॥

---

[1]नामधेयं च कुर्वीत अन्नप्रासनमेव च पा. । [2]क्षौरमक्षराभ्यासः प्र.

CC-0. Nepal Sanskrit Academy, Kathmandu

तथा त्रिपुष्करं चैव यमघण्टमतः परम् ।।
यमदंष्ट्रं तथा वक्ष्ये एकार्गलमुदाहृतम् ।।७४।।

खार्जूरिकं च दिक्शूलं सार्वद्वारिकमेव च ।
स्थिराख्या योगिनी चैव शनिचक्रं ततः परम् ।।७५।।

संक्रान्तिलक्षणं चैव वक्ष्ये संक्रान्तिशूलकम् ।
दैवज्ञलक्षणं चैव निमित्तफलमुच्यते ।।७६।।

कथनं गुणदोषाणां कन्यालाभस्तथैव च ।
वरस्य लक्षणं चैव शचीपूजाविधानकम् ।।७७।।

संग्रहो मङ्गलद्रव्यं कन्यादानं ततः परम् ।
अङ्कुरार्पणमाख्यातं वेदिकालक्षणं ततः ।।७८।।

फलं विवाहयोगानां जलपात्रस्य लक्षणम् ।
शङ्कुलक्षणमाख्यातं तथा मौहूर्तिकं फलम् ।।७९।।

ततोऽभिजित्फलं चैव गोधूलीफलमेव च ।
स्वीकारश्च मुहूर्तं च, आशीर्वादस्ततः परम् ।।८०।।

नक्षत्राणां फलं चैव दशकूटमतः परम् ।
फलं लग्नद्वादशकं वेश्यावैवाह उच्यते ।।८१।।

तथैवाग्निपरिग्राहः प्रवेशोऽथ नवे गृहे ।
कृषिं च बीजवापं च लाङ्गलं च ततः परम् ।।८२।।

नवान्नभोजनं चैव धान्यसंग्रहणं तथा ।
क्रयं च विक्रयं चैव, ऋणमोक्षं तथा पुनः ।।८३।।

CC-0. Nepal Sanskrit Academy, Kathmandu

भैषज्यमभिषेकं च राजदर्शनमेव च ।
दीपावलीफलं चैव वस्त्रधारणलक्षणम् ॥८४॥

भूषणं दारूणां चैव नीराजनमतः परम् ।
अथ वास्तु विधानं च कूपलक्षणमेव च ॥८५॥

यात्राविधानं तद्योगान् प्रवेशं पुनरेव च ।
रोगमुक्तिं च तत्स्नानं प्रतिष्ठालक्षणं तथा ॥८६॥

उत्सवं देवतानां च दमनारोपणं शुभम् ।
दुष्टारिष्टान्यहं वक्ष्ये ग्रहनक्षत्रशान्तिकम् ॥८७॥

कोटिहोमलक्षहोमायुतहोमविधानकम् ।
उलूकमण्डलं चैव कपोतशान्तिपौष्टिकम् ॥८८॥

इन्द्रलुप्तं च तच्छान्तिं ग्रहाणां मार्जनानि च ।
ततो ग्रहाष्टयोगं च मेघजन्म ततः परम् ॥८९॥

चन्द्रताराबलं चैव प्रथमर्तुफलं तथा ।
विधोः षड्विंशकावस्था गोचरं वेधकं तथा ॥९०॥

तद्राशिरूपं चारित्रं व्यतीपातफलं तथा ।
स्वप्नाध्यायोष्टवर्गं च सामुद्रिकमतः परम् ॥९१॥

स्पन्दनं मेघमालायाः प्रश्नलक्षणमेव च ।
अर्घखण्डं कालचिन्हं छायापुरूषलक्षगम् ॥ ॥९२॥

आयुर्वेदं तथा वक्ष्ये मङ्गलामालिकां तथा ।
भूवलं सर्वतोभद्रं शतचक्रं तथैव च ॥९३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

राहुकालानलं चक्रं नरघातं च चक्रकम्
कुर्मचक्रं पद्मचक्रं शतं चैवाभिषेककम् ॥९४॥

अष्टमं राशिकृत्यं च तुरङ्गस्य च बन्धनम् ।
अश्वलक्षणमाख्यातं गजलक्षणमेव च ॥९५॥

वाहनारोहणं वक्ष्ये युद्धकालविलक्षणम् ।
रणाभिषेचनं चैव वीरपट्टं तथैव च ॥९६॥

कंकणं रणदीक्षां च संहितासार उच्यते ।
कृते जयार्णवं नाम त्रेतायां ब्रह्मयामलम् ॥९७॥

द्वापरे विजयाख्यातं कलौ चैव स्वरोदयः ।
ब्रह्मयामलमादौ तु द्वितीयं विष्णुयामलम् ॥९८॥

रुद्रयामलमाख्यातं चतुर्थं त्वादियामलम् ।
पञ्चमं यामलं स्कान्दं षष्ठं कुर्मस्य यामलम् ॥९९॥

तत्परं यामलं देव्या इति यामलसप्तकम् ।
आलोक्य यामलान्यादौ तथा युद्धजयार्णवम् ॥१००॥

दक्षाद्यं च त्रिमुण्डं च स्वरसिंहं स्वरार्णवम् ।
भूबलं गारुडं नाम लम्पटं स्वरभैरवम् ॥१०१

तन्त्रं रणहृदाख्यातं सिद्धान्तं जयपद्धतिम् ।
पुस्तकेषु च ढौकश्रीदर्शनं ज्यौतिषं तथा ॥१०२॥

मन्त्रतन्त्राद्यनेकानि कूटयुद्धानि यानि च ।
तन्त्रयुक्तिश्च विज्ञेया विख्यातो वडवानलः ॥१०३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

एतेषां स्वरशास्त्राणां पारं दृष्ट्वा महात्मनाम् ।
सारोद्धारं प्रवक्ष्यामि सर्वसत्वानुकम्पया ॥१०४॥

आदौ स्वरवलं वक्ष्ये चक्रनामान्यतः परम् ।
भूवलानि बलान्यत्र ज्यौतिषाङ्गं तु शाकुनम् ॥१०५॥

अभिधानान्यतः संज्ञा स्वरचक्राणि षोडश ।
मात्रावर्णग्रहो जीवो राशिर्भं पिण्डयोगकम् ॥१०६॥

द्वादशाब्दं तथाब्दं च अर्धाब्दमृतुमासिकम् ।
पक्षाहोनाडिकाचक्रं देहस्थं तदनन्तरम् ॥१०७॥

विख्यातं सर्वतोभद्रं शतपत्रांशसंभवम् ।
छत्रं सिंहासनं कुर्मं पद्मचक्रं फणीश्वरम् ॥१०८

फणीन्द्रं चन्द्रसूर्यं च घोरं गूढेन्दुभास्करम् ।
संघट्टं सप्तमं ज्ञेयं सप्तकालानलानि च ॥१०९॥

तिथिं वारं च नक्षत्रं त्रिधा चैव कुलाकुलम् ।
कुम्भचक्रं द्विधा प्रोक्तं राशिनक्षत्रसंभवम् ॥११०॥

प्रस्तार[1] मृक्षवेधं च द्विधा तुं वुरुमुत्तमम् ।
भूचरं खेचरं पन्था नाडीकालफणिद्वयम् ॥१११॥

कविचक्रं खलेचक्रमष्टौ कोटं च चक्रकम् ।
गजमश्वं रथं व्यूहं कुन्तचक्रं छुरी धनुः ॥११२॥

---

[1] प्रस्थान प्र.

CC-0. Nepal Sanskrit Academy, Kathmandu

सौरी सेवा नरं डिम्भं पक्षिवर्गाय वृश्चिकम् ।
सप्तरेखोद्भवं चक्रं पञ्चरेखेन्दुभास्करम् ॥११३॥

त्रिविधं मातृकं चक्रं विजयं श्येनतोरणम् ।
अहिलाङ्गलवीजोप्तिश्चक्राशीतिश्चतुर्युता ॥११४॥

एतानि सर्वचक्राणि ज्ञात्वा युद्धं समाचरेत् ।
जयेदिह न सन्देहः शक्रतुल्ये पि भूभुजि[१] ॥११५॥

चतुरशीति संख्यानां यद्बलेन जयी रणे ।
भूबलस्य च नामानि प्रवक्ष्यामि समासतः ॥११६॥

कवौकोटे तथा द्वन्द्वे चातुरंगे महाहवे ।
औड्डी जालन्धरी पूर्णा कामा कौलैकवीनिका ॥११७॥

पुरन्ध्री च महामारी क्षेत्रपाली च वंशजा ।
रुद्रा कालानला काला कालरेखा निरासया ॥११८॥

जयलक्ष्मीर्महालक्ष्मीर्जया विजयभैरवी ।
बाला योगेश्वरी चण्डी माया तुम्भुककर्तरी[२] ॥११९॥

शार्दूली सिंहली तन्वी महामाया महेश्वरी ।
श्री मुण्डा मत्सरी धर्मी मृता घृष्टा जया क्षया[३] ॥१२०॥

---

[१]भूवले प्र. ख. । [२]तन्तुककर्तरी प्र. भुम्भुककर्तरी अ.ख ।
[३]क्षयाऽ क्षया प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

दुर्मतिः प्रबला गौरी अभेद्या देवनिर्जिता ।
बहुवेला वर्गभूमिः कापाली त्वनिला नला ॥१२१॥

चन्द्रार्कविम्बभूविम्बग्रहभूराशिलग्नगाः ।
राहुकालानलाभूमिः स्वरभूमिर्द्विधा मता ॥१२२॥

रुद्रस्त्रिमासिकश्चैब राहुश्चाष्टविधस्तथा ।
चन्द्रः सप्तविधः सूर्यश्चतुर्धा योगिनी त्रिधा ॥१२३॥

त्रिभेदं तत् कालबलं तिथिनक्षत्रवारगम् ।
इमानि भूबलान्यत्र ज्ञात्वा यः प्रविशेद् रणे ॥१२४॥

अरयस्तस्य नश्यन्ति मेघा वाताहता यथा ।
अभंगे च, अ भेद्ये च , असाध्ये च जयेद् रिपौ ॥१२५॥

जयोपायमहं वक्ष्ये मन्त्रयन्त्रादि केवलम् ।
रणाभिषेकदीक्षायां रणेभ्यो रणकंकणम् ॥१२६॥

वीरपट्ट–रणेपट्ट–जयपट्टस्य बन्धनम् ।
मेखलाकवचन्यासं मुद्रारक्षादिबन्धनम् ॥२२७॥

ओषधी तिलकं वश्यं गुटिका या कर्पादिका
योगे घटितशास्त्राणि शस्त्ररक्षा च मोटनम् ॥१२८॥

शस्त्रलेपाश्च विविधा बाणानां पिच्छबन्धनम् ।
त्रैयम्बकं काहलोऽथ मुरजं भस्मसाधनम् ॥१२९॥

CC-0. Nepal Sanskrit Academy, Kathmandu

मारणं मोहनं स्तम्भनं द्वेषोच्चाटनं वशम् ।
पताका पिच्छकं यन्त्रं परविद्याविनाशनम् ॥१३०॥

शान्तिकं निजसैन्यस्य कर्तव्यं जयकाङ्क्षिभिः ।
बलान्येतानि यो ज्ञात्वा संग्रार्म कुरुते नृपः ॥१३१॥

असाध्यस्तस्य नैवास्ति शत्रुकोटिर्महीतले ।
गणितव्यवहारश्च होराज्ञानपरिस्फुटम् ॥१३२॥

त्रिस्कन्धं भारतं वक्ष्ये संहितासारमुत्तमम् ।
ग्रहतिथ्याद्यानयनं शीघ्रवक्रोदयास्तथा ॥१३३॥

अन्यजन्मस्थितिर्योनिः स्वर्गे पातालमर्त्ययोः ।
मृतोऽपि गच्छते[1] यत्र नान्यं स्वर्गं च नारकम्[2] ॥१३४॥

अन्यच्च सुरलेकेषु वर्तते सुरदानवैः ।
यदुद्धृतं मया ज्ञातं ज्ञातव्यं तु चराचरैः ॥१३५॥

सुबोधी-

नक्षत्रवारैस्तिथिभिः सुलग्नैः कार्यं न किंचिच्छकुने विरुद्धे ।
दोषेऽपि जाते शकुनेऽनुकुले सर्वं फलं सिध्यति मानवानाम् ॥१३६॥

पूर्वजन्मकृतकर्मणः फलं पाकमेति नियमेन देहिनः ।
तत्प्रकाशयति दैवचोदितः प्रस्थितस्य शकुनस्थितस्य च ॥१३७॥

---

[1]गच्छति । [2]नरकम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

दैवमेव यदि कारणं भवेन्नीतिशास्त्रमुपयुज्यते कथम् ।
तद्बलेन निर्यातिं हि कुर्वते सर्वराज्यमिहते जनाधिपाः ॥१३८॥

पूर्वजन्मजनितं पुराविदः कर्म दैवमिति संप्रचक्षते ।
उद्यमेन तदुपार्जितं तदा दैवमुद्यमवशं न तत्कथम् ॥१३९॥

उपश्रुतिर्भवेदाद्या द्वितीया पिङ्गला स्मृता ।
वरटा च तृतीया स्याच्चतुर्थी मितवाग् भवेत् ॥१४०॥

उलूका पञ्चमी ज्ञेया श्वा च षष्ठी स्फुटा मता ।
शृगालं सप्तमं विद्यादयं शकुनसंग्रहः ॥१४१॥

यात्रोद्वाहगृहाश्रमौषधविधौ प्रासादसेवाकृषौ
गर्भोत्पत्तिपदाप्तिकालनियमे राज्याभिषेके तथा ।
वाणिज्ये प्रतिमानिवेशनकलाभ्यासे सुखे चात्मनि
प्रश्नाप्रश्नविधौ प्रशान्तमनसः शान्तौ विधेयः सदा ॥१४२॥

दष्टे नष्टे विनष्टे कृतकृषिषु तथा प्राणसन्देहजाते
विश्वासाचारशून्ये हृचवमृतिरुदिते मोक्षणे बन्धने च ।
शङ्कायां मारणाद्ये निखिलरणविधौ जातभङ्गे परेभ्यो
लाभे सन्देहजाते परबलविषये दीप्तमेवावलोक्यम् ॥१४३॥

व्यापारे शत्रुसंघे तृणकृतिविषये संग्रहे कामिनीनाँ
वेश्यायां स्नेहकार्ये परयुवतिगतौ वञ्चनार्थे प्रपञ्चे ।
पापर्धाचौर्यदूतिकृतिकरणविधौ दानलम्बाग्रहे वा
वैशेषे न्यायवादे गिरिपथगमने शान्तदीप्तं विलोक्यम् ॥१४४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

शास्त्रावताराध्यायः

संग्रामे दीव्यशुद्धौ विनिमयनविधौ दुष्टद्यूतस्य पाशे
बध्यानां बन्धहेतौ क्षितिपतिविमले साधने दुर्गकस्य ।
दुर्वादे वा विवादे जलनिधितरणे स्वस्वकर्माभिकार्ये
मन्त्रे रौद्रे विषे वा गदहृदि विषये दीप्तशान्तं विलोक्यम् ॥१४५॥

एकत्र सार्थे व्रजतां बहुनां यो यादृशं पश्यति दैवयोगात् ।
श्यामादिकानां शकुनं स तादृक्फलं नरो विन्दति निर्विकल्पम् ॥१४६।

तुल्येऽपिजाते शकुने जनानामालोक्यते यत्र फलस्य भेदः ।
स प्राणसंचारकृतो विशेषस्तत्प्राणगत्या शकुनागमः स्यात् ॥१४७॥

भवेदिडायां परिपूरितायाँ सर्वोऽपि वामः शकुनः प्रशस्तः ।
स्यात्पिङ्गलायां परिपूरितायां सर्वोऽ प्यसव्यः शकुनः प्रशस्तः ॥१४८॥

जाते विरुद्धे शकुनेऽध्वनीनो व्यावृत्य कृत्वा करपादशौचम् ।
आचम्य च क्षीरतरोरधस्तात् तिष्ठन् प्रपश्येच्छकुनान्तराणि ॥१४९॥

आद्येऽनिष्टे शाकुनेऽष्टौ विदध्यात् प्राणायामान् षड्भुवस्तु[1] द्वितीये ।
यात्रां मुत्वा मन्दिरस्थः प्रवासी प्रत्यागच्छेत् प्रातिकुल्ये तृतीये ॥१५०॥

क्रोशान्तरे यद्यकदर्थकाभिज्ञातिं तदा तच्छकुनं फलाय ।
क्रोशात्परं निष्फलमाहुरन्ये केचिच्च तत्स्वल्पफलं वदन्ति ॥१५१॥

नक्षत्रग्रहलग्नानां शुभाशुभनिरीक्षणे ।
सर्वेषां तु निमित्तानां शकुनो दण्डनायकः ॥१५२॥

---

[1]षोडशस्तु पा

CC-0. Nepal Sanskrit Academy, Kathmandu

सहजः शास्त्रसंयुक्तः शारिरो मध्यमो भवेत् ।
नीचः शकुनसंजातस्त्रिविधो ज्ञानसंभवः ॥१५३॥

इति श्रीरारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यबिरचिते जगन्मोहने शास्त्रावताराध्यायः ।

अथ द्वितीयोऽध्यायः

अधीतवेदः कुलशीलचितः सिद्धान्तवेत्ता बहुसहिताज्ञः[1] ।
अनातुरः प्रत्ययितः कृपावान् सुरूपवेषः सतताभियुक्तः ॥१॥

अरागलोभः कुशलः कुलज्ञो जनादृतः सत्यरतः सदारः ।
गम्भीरघोषोऽपरिषत्सुभीरुः शुचिः क्षमी दैवविदेव शस्तः ॥२॥

अप्रदीपा यथा रात्रिरनादित्यं यथा नभः ।
तथाऽसांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि ॥३॥

कृत्स्नाङ्गोपाङ्गकुशलहोरागणितनैष्ठिकम् ।
यो न पूजयते राजा स नाशमुपगच्छति ॥४॥

न तथेच्छति भूपतेः पिता जननी वा स्वजनोऽथवा सुहृत् ।
स्वयशोऽभिविवृद्धये यथा हितमाप्तः स्ववलस्य दैववित् ॥५॥

[2]न तत्सहस्त्रं करिणां वाजिनां च चतुर्गुणम् ।
करोति देशकालज्ञः यदेको दैवचिन्तकः ॥६॥

---

[1] सिद्धान्तहोराबहुसंहिताज्ञः क। [2] नूनं पा

CC-0. Nepal Sanskrit Academy, Kathmandu

२ दैवज्ञलक्षणाध्यायः

येषां वै नास्ति दैवज्ञस्तेषां धर्मो न विद्यते ।
तस्माद् दैवज्ञमाश्रित्य सर्वकर्माऽचरेद्बुधः ॥७॥

अग्रभूक्स भवेच्छ्राद्धे पूजितः पङ्क्तिपावनः ।
येन तृप्तस्तु दैवज्ञस्तेन तृप्ता नवग्रहाः ॥८॥

अगणितसांवत्सरिकः षाड्गुण्यविहीनस्तु यो मन्त्री ।
शास्त्रविहीनो वैद्यस्त्रयः पुरुषाश्च यमदूताः ॥९॥

गोलप्रशंसा

आर्यभटीये---

गोलज्ञो गणितज्ञो, गणितज्ञो ग्रहगतिं विजानाति ।
इह गणितगोलकाऽज्ञो जानाति ग्रहगतिं स कथम् ॥१०॥

ग्रहनक्षत्रधरित्रीसंस्थानस्येह दर्शनोपायः ।
गोल इति कथ्यतेऽसौ क्षेत्रविशेषो गणितगम्यः ॥११॥

वृत्तभपञ्जरमध्ये कक्षापरिवेष्टितः खमध्यस्थः ।
मृज्जलशिखिवायुमयो भूगोलः सर्वतोवृत्तः ॥१२॥

सिद्धान्तशिरोमणौ–

सिद्धि साध्यमुपैति यत्स्मरणतः क्षिप्रं प्रसादात्तथा
यस्याश्चित्रपदा स्वलंकृतिरलं लालित्यलीलावती ।
नृत्यन्ती मुखरङ्गगेव कृतिनां स्याद् भारती भारती
तं तां च प्रणिपत्य गोलममलं बालावबोधं ब्रुवे ॥१३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

मध्याद्यं द्युसदां यदत्र गणितं तस्योपपत्तिं विना
प्रौढः प्रौढसभासु नैव गणको निःसंशयो न स्वयम् ।
गोले सा विमला करामलकवत्प्रत्यक्षतो दृश्यते
तस्मादस्म्युपपत्तिबोधविधये गोलप्रबन्धोद्यतः ॥१४॥

भोज्यं यथा सर्वरसं विनाऽऽज्यं राज्यं यथा राजविवर्जितं च
सभा न भातीव सुवक्तृहीना गोलानभिज्ञो गणकस्तथात्र ॥१५॥

वादी व्याकरणं विनैव विदुषां धृष्टः प्रविष्टः सभां
जल्पन्नल्पमतिः स्मयात्पटुवटुभ्रूभङ्गवक्रोक्तिभिः ।
ह्रीणः सन्नुपहासमेति गणको गोलानभिज्ञस्तथा
ज्योतिर्वित्सदसि प्रगल्भगणकप्रश्नप्रबन्धोक्तिभिः ॥१६॥

दृष्टान्त एवावनिभग्रहाणां संस्थानमानप्रतिपादनार्थम् ।
गोलः स्मृतः क्षेत्रविशेष एष प्राज्ञैरतः स्याद् गणितेन गम्यः ॥१७॥

ज्योतिःशास्त्रफलं पुराणगणकैरादेश इत्युच्यते
नूनं लग्नबलाश्रितः पुनरयं तत्स्पष्टखेटाश्रयम् ।
ते गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न ज्ञायते
तस्माद् यो गणितं न वेत्ति सकथं गोलादिकं ज्ञास्यति ॥१८॥

द्विविधगणितमुक्तं व्यक्तमव्यक्तयुक्तं
तदवगमननिष्ठः शब्दशास्त्रे पटिष्ठः ।
यदि भवति तदेदं ज्यौतिषं भूरिभेदं
प्रपठितुमधिकारी सोऽन्यथा नामधारी ॥१९॥

यो वेद वेदवदनं सदनं हि सम्यग्
ब्राह्म्याःस वेदमपि वेद किमन्यशास्त्रम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

यस्मादतः प्रथममेतदधीत्य धीमा–
ञ्छास्त्रान्तरस्य भवति श्रवणेऽधिकारी ॥२०॥

गोलं श्रोतुं यदि तव मतिर्भास्करीयं शृणुध्वं
नो संक्षिप्तो न च बहु वृथा विस्तरं शास्त्रतत्त्वम् ।
लीलागम्यः सुललितपदप्रश्नरम्यः स यस्माद्
विद्वन् विद्वत्सदसि पठतां पण्डितोक्तिं व्यनक्ति ॥२१॥ इति

सिद्धान्तप्रशंसा

भास्करस्य–

तुष्यन्तु सुजना बुद्ध्वा विशेषान् मदुदीरितान् ।
अबोधेन हसन्तो मां तोषमेष्यन्ति दुर्जनाः ॥२२॥

त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमा–
च्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ॥२३॥

जानञ्जातकसंहिताः सगणितस्कन्धैकदेशा अपि
ज्योतिःशास्त्रविचारसारचतुरप्रश्नेष्वकिञ्चित्करः ।
यः सिद्धान्तमनन्तयुक्तिविततं नो वेत्ति भित्तौ यथा
राजा चित्रमयोऽथवा सुघटितः काष्ठस्य कण्ठीरवः ॥२४॥

गर्जत्कुञ्जरवर्जिता नृपचमूरप्यूर्जिताऽश्वादिकै–
रुद्यानं च्युतचूतवृक्षमथवा पाथोविहीनं सरः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

योषित्प्रोषितनूतनप्रियतमा यद्वन्न भात्युच्चकै –
र्ज्योतिःशास्त्रमिदं तथेति विबुधा सिद्धान्तहीनं जगुः ॥२५॥

वेदचक्षुःकिलेदं स्मृतं ज्यौतिषं
मुख्यता चाङ्गमध्ये ऽस्य तेनोच्यते ।
संयुतो ऽपीतरैः कर्णनासादिभि –
श्चक्षुषाङ्गेन हीनो न किञ्चित्करः ॥२६॥

तस्माद् द्विजैरध्ययनीयमेतत् पुण्यं रहस्यं परमं च तत्त्वम् ।
यो ज्यौतिषं वेत्ति नरः स सम्यग्धर्मार्थकामांल्लभते यशश्च ॥२७॥

अतो द्विजैरेव ज्योतिः शास्त्रं पठनीयम् । ज्यातिःशास्त्रपठने नाधिकारिणः शूद्राः अत्र भगवान् गर्ग आह —

स्नेहाल्लोभाच्च मोहाद् वा यो विप्रोऽ ज्ञानतोऽ पिवा ।
शूद्राणां चोपदेशत्वं दद्यात् स नरकं व्रजेत् ॥२८॥

लग्नं ददाति यः शूद्रः सकृत् षोडशकर्मणाम् ।
अधो युगसहस्राणि जायते श्वानयोनिषु ॥२९॥

सम्यगाचारयुक्तोऽ पि यः शूद्रः सर्वशास्त्रवित् ।
वर्जयेद् वचनं तस्य कपालस्थोदकं यथा ॥३०॥

दुष्टो वाऽपि विशिष्टो वा मूर्खो वा पण्डितोऽपि वा
साक्षाद् विप्रः परो देवो विप्रवाक्यं सदा शुचिः ॥३१॥

मरुकिकटादि भूमिषु सद्ब्राह्मणा भावे मूर्खब्राह्मणो वा समञ्जस इति भावः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अन्धको वधिरः पङ्गुः कुष्ठी निष्ठुरभाषकः ।
कुचेलः कर्कशः स्तब्धो बन्धुंविट्धनलुब्धकः ॥३२॥

दुर्वृत्तो वकवृत्तिश्च काष्ठवादी निरक्षरः
मतिप्रकाशरहितः स्थानमानविर्वाजितः ॥३३॥

विसुतो विधनो वृद्धो वृद्धाचारविर्वजितः
समदो मदनव्याप्तो दग्धहस्तोऽप्रशस्तकः ॥३४॥

कुत्सितोऽर्थमदग्रस्तस्त्रस्तोऽप्रस्तुतवाक् तथा ।
तेभ्यो लग्नं न गृह्णीयाद् विषसंयुक्तदुग्धवत् ॥३५॥

स्कन्धत्रयाधिष्ठितशास्त्रमेतद यो ज्योतिषं वेद स वेदवेदी ।
तेनोदितं मङ्गलदं विलग्नं गुणाष्टकज्ञानमथैव विद्यात् ॥३६॥

आलापो हृदयं चक्षुर्धारणं हस्तलाघवम् ।
उहापोहमितिज्ञानमित्यष्टौ गणके गुणाः ॥३७॥

इति वृद्धगर्ग वचनानि

यवनः—

येन केनापि मार्गेण सिद्धान्ताननुयायिना ।
ग्रहादीनां स्थिति ब्रूयाद् यः स नक्षत्रपाठकः ॥३८॥

नक्षत्रपाठकं पापं भिषजं शुल्कजीविनम् ।
तादृक्पौराणिकादींश्च वाङ्मात्रेणापि नार्चयेत् ॥३९॥

CC-0. Nepal Sanskrit Academy, Kathmandu

(संपत्या योजितादेशसद्विच्छिन्नकथाप्रियः ।)
मत्तः शास्त्रैकदेशेन त्याज्यस्तादृङमहीभृताः ।।
सिद्धान्तवेत्ता यो विप्रो स ब्रह्मेत्यभिधीयते ।।४०।।

सम्यक् सिद्धात्तवेत्तारं यो न पूजयते द्विजः ।
तस्य कर्माणि नश्यन्ति वैदिकानि न संशयः ।।४१।।

ब्रह्मसिद्धान्ते-

एतच्च मत्तः शीतांशो पुलस्त्याच्च विवस्वतः ।
रोमशाच्च वसिष्ठाच्च गर्गादपि बृहस्पतेः ।।४२।।

अष्टावेते दिव्यरूपा महागणितसंज्ञकाः ।
एषां पठनमात्रेण[१] विप्रो याति परां गतिम् ।।४३।।

सिद्धान्तवेत्ता नैवास्ते यस्य राष्ट्रे द्विजोत्तमः ।
तस्य राष्ट्रे जयो धर्मो नयो नास्ति विधानतः ।।४४।।

भिषग्वरो जगन्माता दैवज्ञो .ह जगत्पिता ।
तावुभौ यदि न स्यातां न तत्र दिवसं वसेत् ।।४५।।

वराहः—

न प्रतिबद्धं गमयति ववित न वा प्रश्नमेकमपि पृष्टः ।
निगदति न च शिष्येभ्यः स कथं शास्त्रार्थविज्ज्ञेयः ।।४६।।

अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते ।
स पङ्क्तिदूषकः प्रोक्तो ज्ञेयो नक्षत्रपाठकः ।।४७।।

[१] वचनमात्रेण प्र.

CC-0. Nepal Sanskrit Academy, Kathmandu

भृगुः--

परवचनेन ज्यौतिषमुपचरति च यः स्वयं न दैवज्ञः ।
विशति सभामुपहास्यति वा स ज्ञेयो नक्षत्रपाठकः पापी ॥४८॥

प्रायश्चित्तं चिकित्सां च ज्यौतिषं धर्मनिर्णयम् ।
विना शास्त्रेण यो ब्रूयात् तमाहुर्ब्रह्मघातकम् ॥४९॥

शास्त्रदृष्टिप्रमाणेन वर्तते यो विचक्षणः ।
संहितार्थफलं याति सफलं नैति चान्यथा ॥५०॥

अन्यानि शास्त्राणि विनोदमात्रं न किञ्चिदेषां भुवि दृष्टमस्ति ।
चिकित्सकज्यौतिषमन्त्रपाठाः पदे पदे प्रत्ययमावहन्ति ॥५१॥

अध्येतव्यं ब्राह्मणैरेव तस्माज्ज्योतिःशास्त्रं पुण्यमेतद् रहस्यम् ।
एतद् बुद्ध्वा सम्यगाप्नोति यस्मादर्थं धर्मं मोक्षमग्र्यं यशश्च ॥५२॥

विमलज्योति :--

ग्रन्थतश्चार्थतश्चैव कृत्स्नं जानाति यो द्विजः ।
अग्रभुक् स भवेच्छ्राद्धे पूजितः पङ्क्तिपावनः ॥५३॥

न सांवत्सरपाठी च नरकेषूपपच्यते ।
ब्रह्मलोकप्रतिष्ठां च लभते दैवचिन्तकः ॥५४॥

आर्यभटीये --

एकग्रहगतिवेत्ता यो वेत्ता तस्य तल्लोकः ।
सर्वग्रहगतिवेत्ता यो वेत्ता, अव्ययं पदं लभते ॥५५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

न तत् सहस्रं करिणां वाजिनां च चतुर्गुणम् ।
करोति देशकालज्ञो यदेको दैवचिन्तकः ॥५६॥

न तथेच्छति भूपतेः पिता जननी वा स्वजनोऽथ वा सुहृत् ।
स्वयशोऽभिविवृद्धये यथा हितमाप्तः सबलस्य दैववित् ॥५७॥

नो धर्मो नदयापरः परतसतीसक्तो न भक्तो गुरोः
शिष्याचारविवर्जितोऽपि चपलः क्षुद्रः कृतघ्नोऽक्षमी ।
निर्देवः परनिन्दकोऽपि च शठो यो नास्तिको दुर्जनः
शिष्यं तं परिवर्जयेदिह गुरुः शास्त्रोपदेशे तथा ॥५८॥

अत्रि :–

ज्यौतिषं चागमं शास्त्रं चतुर्लक्षमुदाहृतम् ।
तदन्तं गन्तुमायाति ह्यऋषिर्मनसा भृशम् ॥५९॥

लौकिकादागमाच्छास्त्राद् वृद्धाचारात् स्वदेशतः ।
कालाच्च बहुसाम्याच्च ज्योतिः शास्त्रं समाचरेत् ॥६०॥

उक्त्यानुमानतत्त्वार्थप्रत्यक्षोपमलौकिकैः ।
एतैः षड्भिः प्रमाणैस्तु ज्योतिःशास्त्रं चरेद् बुधः ॥६१॥

दोषं गुणं च मुख्यं गौणं साधारणं विशेषं च ।
विषयविभागविहीनं ज्ञानं हास्यास्पदं सदसि ॥६२॥

लौकिकदुष्टं लग्नं यद्यपीष्टग्रहेऽप्यमतिदुष्टम् ।
तस्माल्लग्नं देयं लौकिकपूर्वं महोत्सवेषु शुभम् ॥६३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

देशाचारस्तावदादौ विचिन्त्यो देशे देशे या स्थितिः सैव कार्या ।
लोकद्विष्टं पण्डितैर्वर्जनीयं दैवज्ञोऽतो लोकमार्गेऽनुयायात् ॥६४॥

न शास्त्रदृष्टया विदुषा कदाचिन्नो ल्लनोङ्घनीयाः कुलदेशधर्माः ।
मूलं हि तेषु, च्युतवेदशाखो भूयो न धर्मः स्थितिभङ्गदोषः ॥६५॥

शास्त्रस्वरूपं बहुदोऽप्यबुद्ध्वा वदन्ति यच्चानुमतं हि तन्न ।
देशं गतोऽप्येकविलोचनानां निमील्य नेत्रं निवसेम्मनीषी ॥६६॥

मुनिविप्रतिपत्तिसंभवं प्रतिषेद्धुं न मुनिं क्षमोऽस्म्यहम् ।
बहुसम्मतमेव कीर्त्यते नहि मूलं निरुणद्धि तत्प्रसूः ॥६७॥

प्रसन्नमूर्तिं सुसुखासनस्थं शास्त्रार्थविद् दैवविदं शुभेऽह्नि ।
ताम्बूलपुष्पाक्षतपूर्णपाणिर्भक्त्याऽभिपृच्छेद् विधिवत् प्रपूज्य ॥६८॥

परिभूय तु यःपृच्छेद् दैवज्ञमवमन्य वा ।
सिद्धिर्नास्तीति वक्तव्यं दुःखं स्याच्च पराजयः ॥६९॥

केवलं पृच्छतस्तस्य न वदेद् दैवचिन्तकः ।
उभयोरपि दोषः स्याज्ज्ञानिनः प्रच्छकस्य च ॥७०॥

तन्त्रेषु परिज्ञातेषु लग्ने छायाम्बुयन्त्रसंविदिते ।
होरार्थेऽपि सुगूढे[१] नादेष्टुर्भारती वन्ध्या ॥७१॥

वराहः—

मत्तः शास्त्रैकदेशेन त्याज्यस्तादृङ्महीक्षिता ।
यस्तु सम्यग् विजानाति होरागणितसंहिताः ॥७२॥

[१] सुरुढे पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ज्योतिःशास्त्रज्ञशूद्रेण यदुक्तं तस्य सर्वदा ।
न ग्राह्यं वचनं तस्य शूनोच्छिष्टं हविर्यथा ॥७३॥

शूद्राशीर्वचनं यस्तु गृहीत्वा षोडशक्रियाः ।
कुर्यात् तस्य कृतं पुण्यमविशेषेण नश्यति ॥७४॥

काशीखण्डे --

अमङ्गलानां सर्वेषां विधवा ह्यत्यमङ्गला ।
तदाशिषमपि प्राज्ञस्त्यजेदाशीविषोपमाम् ॥७५॥

माता मातुर्भगिनी ज्येष्ठा भगिनी तु या पति हीनाः ।
तासामाशीर्वादा नितरां न जातु दोषकराः प्रोक्ताः ॥७६॥

वनं समाश्रिता ये ऽपि निर्ममा निष्परिग्रहाः ।
अपि ते परिपृच्छन्ति दैवज्ञं किं नराधिपाः ॥७७॥

दशदिनकृतदोषं हन्ति सिद्धान्तवेत्ता
त्रिदिवसकृतदोषं तन्त्रवेत्ता नराणाम् ।
करणभगणवेत्ता हन्त्यहोरात्रदोषं
दिनदलकृतदोषं हन्ति नक्षत्रवेत्ता ॥७८॥

कुहकवेशपिहितकर्णोपश्रुतिहेतुभिः ।
कृतादेशो न सर्वत्र प्रष्टव्यो न च दैववित् ॥७९॥

इह खलु जातकपरिज्ञाने प्राचीनजन्मसहस्रमाचरित-भाविजन्मसहस्रमाचरिष्पमाण-सुकृत-दुष्कृततत्फलभूत-सुखदुःखपरिज्ञानवतः सुखसाधनसुकृताचरणे प्रवृत्तिर्दुःखसाधनदुष्कृताचरणान्निवृत्तिर्भवति । अपि

७३–७९ श्लोका प्र भ्र प पुस्तकेषु नसन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

च – आयुर्दायादिपरिज्ञानहेतुत्वाज्जातकमुपादेयम् । यथाह भगवान् गर्ग :–

आयुर्दायस्ततो भावफलं तस्य च कारणम् ।
देशकालविभागोऽपि कालाकालमृतीतय: ॥८०॥

परिहारो पमृत्योश्च स्मरणं मृत्युनिर्णय: ।
शवस्य परिणामोऽपि तत्तल्लोकविडम्बनम् ॥८१॥

भाविजन्मान्यदन्यत्र प्रसंगेन विचार्यते ॥८२॥ इति

पूर्वं ज्योतिषशास्त्रप्रणेतार: परिगणिता: । तेषां वचनानि कानिचित् सामान्यविशेषरूपाणि कानिचित् परस्परविरुद्धवचनानि कानिचित् स्पष्टार्थानि कानिचिदापातत: स्पष्टार्थान्यप्यन्यत्र तात्पर्यवन्ति तेषां विषयव्यवस्थापनेन पाक्षिकविषयत्वेनार्थस्पष्टीकरणेन तात्पर्यार्थबोधनेन च निर्णिक्तार्थानामुदाहरणाद् विश्वसनीयतमायामस्यां कृतौ[1] विश्वस्तानां निर्मत्सराणां प्रवृत्तिरित्ययमारम्भ:। अत्र प्रतिपादितोऽर्थ: शास्त्रोक्तलक्षणाद् ब्राह्मणादेर्ग्रहीतव्य इति पूर्वमेव सूचितम् ।

इह जन्मशव्देन शिरोदय इत्यभिधीयते। यथाह भगवान् भृगु :–

लग्नछायादिभिर्यन्त्रैर्जन्मकालं प्रसाधयेत् ।
शिरसो दर्शनं जन्म तेनोक्त: फलनिर्णय: ॥८३॥

बहुमुनिमतवचनानि माण्डव्य आह––
न जन्मकाल: करपादर्शनं पृष्ठोदयो वा हरिजप्रबद्ध: ।
विधातृरन्ध्रोदय एव जन्म शीर्षोदयो वाऽत्रिमतं मनोस्तु ॥८४॥

---

[1] विश्वसनीयामायानिर्मत्सराणां क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

सिद्धसैनः--

ज्ञेयः प्राक्शिरउदयमयो लग्नयुक्ता ग्रहेन्द्रा-
स्तत्कालोत्था विधेया मुहुरुपकरणैर्ब्रह्मसिद्धान्तरीत्या।
भावाः खेटेन्द्रदृष्टिर्ग्रहबलमपि षड्भेदमेतत्समुत्थं
कष्टं चेष्टं च भावान्तरत इह दशाऽनुक्रमोऽप्यूहनीयः ॥८५॥

अत्र षड्विधबलानां नामावलीमाह पराशरः--

दृक्तुङ्गस्वत्रिकोणानां राशेर्होराद्रकाणयोः[1]
सप्तांशस्य नवांस्य द्वादशत्रिंशदशयोः ॥८६॥

स्वराश्यादेश्च मित्राधिमित्रयोर्द्विडधिद्विषोः।
नीचस्य केन्द्रस्य पणफरस्यापोक्लिमस्य च ॥८७॥

ओजयुग्मदिवारात्रिकालस्त्रीपुरुषस्प च।
क्लीवस्य, पक्षककुभोर्दिनरात्रिविभागयोः ॥८८॥

नैसर्गिकचेष्टाऽयनवत्सरमासदिनकालहोराणाम्
स्फुटतरयोरथ बलमपि कष्टेष्टयोरिहाख्येम् ॥८९॥

शुकः--

अंशपिण्डनिसर्गाणां भिन्नप्रस्तारयोरपि।
रश्म्यंशुकालचक्राणां तारकाजीवशर्मणोः ॥९०॥

---

[1] दृक्काणयोः क.प.।

CC-0. Nepal Sanskrit Academy, Kathmandu

तथा लघुवृहज्जीवशर्मणोश्च सयोगयोः
आयुर्निश्चिनुयान्मानैश्चतुर्भिर्मुनिसंमतम् ॥९१॥

ग्रहाणामपि सर्वेषामुक्तं षोडशधा बलम्
लग्नस्य तु स्वामीबलैः सह विंशतिधा बलम् ॥९२॥

अत्रैतेषां बलं शून्यं चतुर्भागमितं बलम् ।
बलं षोडशधा नास्ति प्रायो लोकेऽत्र कस्यचित् ॥९३॥

बलैरिष्टप्रभृतिभिरुक्त उत्तम उच्यते ।
यश्चतुष्पञ्चषट्सप्तबलयुक्तः स मध्यमः ॥९४॥

चतुस्त्रिद्व्येकबलवान् रिक्त इत्यभिधीयते ।
रिक्त इत्यधमः (प्राज्ञैस्तृतीयः)परिकीर्तितः ॥९४॥

तद्दशायां न सन्देहो मृत्युं वा रोगमाप्नुयात् ॥९६॥

महादशान्तर्दशयोस्तथान्तरन्तर्दशया उपपूर्विकायाः ।
विपूर्विकायाः सह सूक्ष्मिकायाः प्राणादिकायाश्च तथा दशायाः ॥९७॥

आसां विरोधे न भवत्यवश्यं शुभाशुभाऽशेषफलावबोधः ।
आसां दशानामधिपाः फलानि शुभाशुभानि प्रतिपादयन्ति ॥९८॥

फलप्रदाने पुनरेव मुख्यौ महादशान्तर्दशयोरधीशौ ।
तयोर्विरोधे फलदो बलियानन्तर्दशाधीश्वरमाहुरन्ये ॥९९॥

क्रूरःक्रूरदशायां चेत् प्रविश्यान्तर्दशाकरः ।
जनयत्येव मरणं गणिताप्तायुषामपि ॥१००॥

CC-0. Nepal Sanskrit Academy, Kathmandu

शुभः शुभदशायां चेत्[1] प्रविष्यान्तर्दशाकरः।
गणिताप्तिमृतीनामप्युपजीवविधायकः ॥१०१॥

पराशरः—

धिग् जीवितं शास्त्रकलोज्झितस्य धिग् जीवितं चोद्यमवर्जितस्य।
धिग् जीवितं ज्ञातिपराजितस्य धिग् जीवितं व्यर्थमनोरथस्य[2] ॥१०२॥

श्रीपतिः—

ये धर्मकर्मनिरता विजितेन्द्रिया ये
ये पथ्यभोजनजुषो द्विजदेवभक्ताः।
ये मानव दधति ये कुलशीललीला-
स्तेषामिदं कथितमायुरुदारधीभिः ॥१०३॥

इतिश्रीसारङ्गसाधुवचनामृतेनभट्टश्रीलक्ष्मणाचार्य–विरचिते
जगन्मोहने दैवज्ञलक्षणाध्यायः

अथ तृतियोऽध्यायः

[3]नन्दाद्रिचन्द्रमुनिनागगजाम्बरर्तु–
भूबाणनागवसुवारिधिलोचनानि।
(२४८८५१६०८८७१७९)
शाकाब्दसंयुतसमाः कमलासनस्य
जन्मादितो गणनया प्रवदन्ति सन्तः ॥१॥

---

[1]शुभोऽशुभदशायां वा पा।[2] व्यर्थपराजितस्य प्र.प.। [3]भवानीशंकराभ्यां नमः। इत्यधिकः पाठः अ पुस्तके वर्तते

CC-0. Nepal Sanskrit Academy, Kathmandu

३ वृष्टचाद्यानयनाध्यायः

खचतुष्टय-खचतुष्टय-दन्ताष्टगजाब्धिवाहवस्त्याज्याः।
(२४८८३२०००००००००)
पैतामहवर्षेभ्यो बलिबन्धनवत्सराः क्रमशः ॥२॥

खचतुष्टयरदाष्टाब्धिनन्देन्दुरहिताः समाः
(१९४८३२०००००)
बलिबन्धनवर्षेभ्यः शेषा लङ्केश्वराब्दकाः ॥३॥

खत्रयाष्टगजषट्कभूशशि– (११६८८०००)
रावणाब्दरहिताश्च राघवा
खत्रयर्तुमुनिनागवत्सरा (८७६०००)
राघवाब्दरहिताश्च भारताः ॥४॥

बाणनागनवरूपसंख्यया (१९८५)
भारताब्दरहिताश्च शूद्रकाः।
नन्दबाणवियदेकसंख्यया (१०५९)
शूद्रकाब्दरहिताश्च विक्रमाः ॥५॥

बाणाग्निशशिसंख्याभिः (१३५) वर्जिताः शालिवाहनाः
बाणाब्ध्यक्षिमहीसंख्या (१२४५) रहिताश्च प्रतापकाः ॥६॥

इत्यन्ध्रदेशे कृष्णागोदावरीमध्ये, एकशिलाधिपतेः सूर्यवंशान्वयस्य नवलक्षधनुर्धराधिपतेः श्रीप्रतापरुद्रस्य गतवर्षज्ञानम्।

अथ महायुगप्रमाणज्ञानम्

खचतुष्टयदन्ताब्धि (४३२००००) संख्यया च महायुगम् ॥७॥

CC-0. Nepal Sanskrit Academy, Kathmandu

खत्रयाक्षिनवतत्त्व (२५६२०००) वर्जिते
शेषतः कृतयुगाख्यवत्सराः ॥८॥

खखाम्बराक्षित्रिकृतै (४३२०००) विहीने
शिष्टं भवेत्त्रेतयुगप्रमाणम् । ॥९॥

खत्रयाक्षिशिखिवेद (४३२०००) वर्जिते
द्वापराख्ययुगसंमितिर्भवेत् ।
द्वापरेण युगसंख्ययाधिताः
शेषतः कलियुगाब्दकाः क्रमात् ॥१०॥

अथ वृष्टयाद्यानयनक्रमः ।

त्रिघ्ने शकाब्दे मुनिभिर्विभक्ते द्विघ्नः स शेषः शरयुक्तवृष्टिः ।
धान्यं तृणं शीतमथोष्णवायू प्रजा समृद्धिः क्षयराजविग्रहौ

उग्रश्च पुण्यं परतश्च पापः क्रमेण लब्धाच्छकवत्सराच्च । ॥११॥

ग्रन्थान्तरे–

शाकं त्रिगुण्यं मुनिभाजितं च शेषं द्विनिघ्नं शरसंयुतं च ॥१२॥

वर्षो धान्यं तथा शीतं तृणमूष्मा च मारुतः ।
प्रजावृद्धिः क्षयश्चैव राजविग्रह एव च ॥१३॥

अत्युग्रपुण्यपापानि वर्षे वर्षे पुनः पुनः ।
व्याधयस्तदुपशमनमाचारं दुष्प्रवर्तकम् ॥१४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

मरणं जन्मसंज्ञं च देशोपद्रवमेव च ।
देशस्वास्थ्यं चौरभयं चौरनाशनमेव च ॥१५॥

वर्षाद्यं द्वयहीनं स्यात् व्याध्याद्या दशसंज्ञिताः ॥१६॥

अथ नवमेघानयनम् ।

शाकाब्दे वसुगुणिते नवभिर्भाजिते शिष्टम् ॥१७॥

ततश्चावर्तसंवर्तपुष्करद्रोणकालकाः ।
नीलश्च वरुणो वायुस्तमो मेघाः प्रकीर्तिताः ॥१८॥

आवर्तो मन्दतोयश्च संवर्तो वायुपीडितः ।
पुष्करो मध्यतोयश्च द्रोणो वृष्टिसुखो भवेत् ॥१९॥

अल्पवृष्टिश्च कालेन, नीलश्च प्रतिवर्षति ।
वारुणश्चार्णवः प्रोक्तो वायुर्वर्षविनाशनः ॥२०॥

तमोमेघे न वृष्टिश्च मेघानां फलमादिशेत् ॥२१॥

चैत्रादिमेषादिकुलीरतौलिमृगादिवाराधिपतिः क्रमेण ।
राजा चमूपोऽप्यथ सस्यनाथो रसाधिपो नीरसनायकश्च ॥२२॥

आर्द्रादिनाथो[1] घननायकश्च धान्याधिपश्चापदिनादिवारः ॥२३॥

वसिष्ठः–

वर्षाधिपो मेषदिनस्य वारश्चमूपतिश्चैत्रदिनादिवारः ।
हुणेषु वङ्गेषु खसेषु मागधेष्वेवं च पौड्रेष्वथ टङ्कणेषु[2] ॥२४॥

[1]आर्द्राद्युनाथो पा. । [2]टङ्कणेष्वपि ख

CC-0. Nepal Sanskrit Academy, Kathmandu

मीनं भुक्त्वा रविर्मेषं येन वारेण गच्छति ।
तस्य वाराधिपो ज्ञेयश्चैत्रादौ करणाधिपः ॥२५॥

अब्देशराशीश्वरवर्षपत्यौ[1] गुणैः प्रवृद्धः शरयुग् दिनाप्तम्ः ।
शेषोऽत्र लाभः फलतो गुणघ्नाच्छराऩ्विता स्यात्तिथिहृद् हृतिश्च ॥२६॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने वृष्ट्याद्यानयनाध्यायः

अथ चतुर्थोऽध्यायः

गर्गः--

चैत्रशुक्लादिदिवसे यो वारः सोऽब्दपः स्मृतः ।
शुभं वाऽप्यशुभं वाऽपि तस्मादेव फलं वदेत् ॥१॥

प्रतिपच्चैत्रमासे तु वासरद्वयमिश्रिते ।
तौ चास्मिन् वत्सराधीशौ बलवान् वत्सराधिपः ॥२॥

चैत्रमासे तु संप्राप्ते प्रतिपद्भास्करोदये ।
तस्मिन् काले तु यो वारः स तु संवत्सराधिपः ॥३॥

वसिष्ठः--

सिद्धान्ततन्त्रकरणे मासे चैत्रे समागते ।
द्युगणाद् दृश्यते वारो नायको वत्सराधिपः ॥४॥

देवक्रियासमर्थायां प्रतिपद्यर्कदर्शने ।
चैत्रारम्भे तु यो वारः स राजा हायनस्य तु ॥५॥

---

[1] अब्देराशीश्वरवर्षयोगौ ख । २६ श्लोक प्र पुस्तके नास्ति

CC-0. Nepal Sanskrit Academy, Kathmandu

कमलासनः--

चैत्रे शुक्लप्रतिपदि यो वारो भास्करोदये ।
अब्दनाथः स विज्ञेयो विना वङ्गकलिङ्गयोः ॥७॥

च्यवनः--

यस्मिन् संवत्सरे चैत्रे प्रतिपच्चेद् द्विधा कृता ।
तत्रोत्तमः परोज्ञेयः पूर्वः स्यात् तु मलिम्लुचः ॥८॥

काश्यपसंहितायाम् --

चैत्रशुक्लाद्यदिवसे सकिंस्तुघ्नेऽथवा बवे ।
अर्कोदये तु यो वारः सोब्दपः परिकीर्तितः ॥९॥

द्वयोरह्नोस्तु किंस्तुघ्ने वत्सरादौ युते यदि ।
फाल्गुनान्ते तु यो वारो मासवत्सरपौ तथा ॥१०॥

व्यासः--

चैत्राद्यप्रतिपद्दिने भवति वै यत्खेटवारे सति
क्रौञ्चे चाङ्कुरौ विकर्तयवने राष्ट्रेषु वर्षाधिपः ।
सर्वेषामपि संमतं च विदुषामन्येषु देशेषु च
यः सूर्योदयकालजस्य तु भवेद् वर्षाधिपो विश्रुतः ॥११॥

अमाप्रयुक्ताप्रतिपद्विशेषात् संवत्सरादौ मधुमासयुक्ते ।
सूर्योदये यस्य ग्रहस्य वारस्तन्नाथमब्दाधिपतिं च कुर्यात् ॥१२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

पराशरः—

चैत्रमासे तु संप्राप्ते मुहूर्तत्रयसंयुते ।
प्रतिपद्यस्य यो वारः स तु वर्षाधिपो भवेत् ॥१३॥

विन्ध्यस्य सौम्यदिग्भागे किंस्तुघ्नो नायकः स्मृतः ।
तस्य दक्षिणदिग्भागे कमलोद्भवमिश्रिते ॥१४॥

भूरेखापूर्वभागे तु बवाद्यब्दो भवेन्नृपः ।
रेखायास्त्वपरे भागे किंस्तुघ्नो वत्सराधिपः ॥१५॥

इति वत्सराधिपतिनिर्णयः ।

रोहिण्यानलभं च वत्सरतनुर्नाभिस्त्वषाढाद्वयं
सार्पं हृत् पितृदैवतं च कुसुमं शुद्धैः शुभं तैःफलम्[1] ।
देहेक्रूरनिपीडितेऽग्न्यनिलजं नाभ्यां भयं क्षुत्कृतं
पुष्पे मूलफलक्षयोऽथ हृदये सस्यस्य नाशो ध्रुवम् ॥१६॥

वक्रग्रहस्थे फलमुग्रमेतत् सौम्यग्रहेष्वेषु च संस्थितेषु ।
सर्वं फलं मिश्रफलं च मिश्रैः क्रूरग्रहे याति[2] फलं तथैव ॥१७॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने वत्सराधिपतिनिर्णयाध्यायः

अथ पञ्चमोऽध्यायः

संवत्सरनाम

[3]नारदगर्गसंहितयोः —

प्रभवो १ विभवः २ शुक्लः ३
प्रमोदो ४ थ प्रजापतिः ५ ।

---

[1]तत्फलम् पा. । [2] क्रुरग्रहाङ्गानि प्र क्रुरग्रहांशानि पा. । [3]प्रभवादीनां

CC-0. Nepal Sanskrit Academy, Kathmandu

अङ्गिराः ६ श्रीमुखो ७ भावो ८
युवा ९ धाता १० तथेश्वरः ११ ॥१॥

बहुधान्यः १२ प्रमाथी १३ च
विक्रमो १४ वृषभस् १५ तथा ।
चित्रभानुः १६ सुभानुश् १७ च
तारणः १८ पार्थिवो १९ व्ययः २० ॥२॥

सर्वजित् २१सर्वधारी २२ च
विरोधी २३ विकृतः २४ खरः २५ ।
नन्दनो २६ विजयश् २७ चैव
जयो २८ मन्मथ २९ दुर्मुखौ ३० ॥३॥

हेमलम्बो ३१ विलम्बी ३२ च
विकारी ३३ शार्वरी ३४ प्लवः ३५ ।
शुभकृच् ३६ छोभकृत् ३७ क्रोधी ३८
विश्वावसु ३९ पराभवौ ४० ॥४॥

प्लवङ्गः ४१ कीलकः ४२ सौम्यः ४३
साधारण ४४ विरोधकृत् ४५ ।
परिधावी ४६ प्रमादी ४७ स्या–
दानन्दो ४८ राक्षसो ४९ नलः ५० ॥५॥

नामकीर्तनश्लोका नारदसंहितायां वसिष्ठसंहितायां चेम एव सन्ति । पाठान्तरमपि स्वल्पं दृश्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पिङ्गलः ५१ कालयुक्तश् ५२ च
सिद्धार्थो ५३ रौद्र ५४ दुर्मती ५५ ।
दुन्दुभी ५६ रुधिरोद्गारी ५७
रक्ताक्षः ५८ क्रोधनः ५९ क्षय ६० ॥६॥

संवत्सरफलम्

[1] उक्तानां प्रभवादीनां फलं वक्ष्यामि संग्रहात् ।
जलदा बहुतोयाः स्युर्बहुसस्या च मेदिनी ॥७॥

---

[1] नारदसंहितात् तीयाध्याये संवत्सराणां फलमित्थं वर्तते
तेषां फलानि प्रोच्यन्ते वत्सराणां पृथक् पृथक् ।
क्वचिद् वृध्दिः क्वचिद् हानिः क्वचिद् भीतिः क्वचिद् गदः ॥१७
तथापि मोदते लोकः प्रभवाब्दे विमत्सरः ।
आन्वीक्षिकीषु निरताः सप्रजा स्युः क्षितीश्वराः ॥१८
कर्षकाभिमता वृष्टिर्विभवाब्दे विवैरिणः ।
सकलत्रात्मजाञ्छ्श्वल्लालयन्त्यबलाजनाः ॥१९
अमरस्पर्धिनः शुक्ले वत्सरे विगतारयः ।
अतिव्याध्यर्दिता लोकाः क्षितीशाः कलहोत्सुकाः ॥२०
प्रमोदाब्दे प्रमोदन्ते तथापि निखिला जनाः ।
क्लेशान् क्वचिन्न मेक्ष्यन्ते स्वजनानामनामयः ॥२१
एवं वै मोदते लोकः प्रजापतिशरद्यतः ।
अतिथिस्वजनैः सार्धमन्नं बोभुज्यते मधु ॥२२
पेपीयन्ते कामिनीभिरङ्गिराब्दे निरन्तरम् ।
इतः परं मूल एव वर्तन्ते नारदसंहितास्थश्लोकाः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

बहुक्षीरास्तथा गावो रोगपीडाविवर्जिताः ।
प्रशान्ताः पार्थिवाश्चैव प्रभवे परिकीर्तिताः ॥८॥

सुभिक्षं क्षेममारोग्यं प्रशान्ताश्च नरेश्वराः ।
हृष्टाः पुष्टाः जनाः सर्वे विभवे परिकीर्तिताः ॥९॥

रोगैर्बहुविधैर्घोरैर्मनुष्या वाजिकुञ्जराः ।
सर्व एव प्रणश्यन्ति शुक्लेऽब्द इति निश्चितम् ॥१०॥

उन्मत्तं च जगत् सर्वं धनधान्यसमाकुलम् ।
नित्योत्सवः प्रजावृद्धिः प्रमोदे जायते नृणाम् ॥११॥

नीरोगाश्च निराबाधा मानवा विगतद्विषः ।
बहुक्षीरास्तथा गावो जायन्तेऽब्दे प्रजापतौ ॥१२॥

निरातङ्कं जगत्सर्वं धनधान्यसमन्वितम् ।
नित्योत्सवाः प्रजाः सर्वा अङ्गिरोवत्सरे ध्रुवम् ॥१३॥

सुभिक्षं क्षेममारोग्यं वर्षाकालः सुशोभनः ।
सस्यवृद्धिः समीचीना श्रीमुखे वत्सरे भवेत् ॥१४॥

श्रीमुखाब्देऽखिला धात्री बहुसस्यार्घवृद्धिदा ।
अध्वरे निरता विप्रा वीतरोगा विवैरिणः ॥१५॥

बहुक्षीरास्तथा गावो धान्यं च बलवत्तरम् ।
जीवन्ति सर्वसस्यानि भावे वर्षे न संशयः ॥१६॥

भावाब्दे प्रयता गावो मध्यसस्यार्घवृष्टयः ।
राजानो युद्धनिरतास्तथा पि सुखिनो जनाः ॥१७॥

CC-0. Nepal Sanskrit Academy, Kathmandu

महर्घं विन्दते सर्वं घृततैलरसादिकम् ।
प्रजानां च भवेद् वृद्धिर्युवसंवत्सरे ध्रुवम् ॥१८॥

प्रभूतपयसो गावः सुखिनः सर्वजन्तवः ।
सर्वकामप्रियासक्ता युवाब्दे युवतीजनाः ॥१९॥

इक्षुक्षीरगुडादीनां बाहुल्यमुपजायते ।
निष्पत्तिः सर्वसस्यानां मध्या धातरि वत्सरे ॥२०॥

धातृवर्षेऽखिलक्ष्मेशाः सदा युद्धपरायणाः ।
सम्पूर्णा धरणी वारिबहुसस्यार्धवृष्टिभिः [1] ॥२१॥

सुभिक्षं क्षेममारोग्यं कार्पासस्य महर्घता ।
लवणं मधु गव्यं च दुर्लभं चेश्वरे ध्रुवम् ॥२२॥

ईश्वराब्दे खिलाञ्जन्तून् धात्री धात्री च सर्वदा ।
पोषयत्यति वै सस्यं फलशालीक्षुवारिभिः ॥२३॥

सुभिक्षं क्षेममारोग्यं प्रसन्नाश्च नरेश्वराः ।
तस्करोपहतं सर्वं बहुधान्ये तु वत्सरे ॥२४॥

अनीतिरतुला वृष्टिर्बहुधान्याख्यवत्सरे ।
विविधैर्धान्यनिचयैः सुसंपूर्णाखिऽला धरा ॥२५॥

राष्ट्रभङ्गोऽथ दुर्भिक्षं तस्करैश्च प्रपीडनम् ।
रिपवश्च महाघोराः स्युः प्रमाथिनि वत्सरे ॥२६॥

मुञ्चन्तेऽति पयोवाहाः कुत्रचित् कुत्रचिज्जलम् ।
मध्यमा वृष्टिरर्घश्च नूनमब्दे प्रमाथिनि ॥२७॥

---

[1] वारिबहुसस्यार्धवृष्टय पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

जायन्ते सर्वसस्यानि मेदिनी निरुपद्रवा ।
लवणं मधु गव्यं च महर्घं विक्रमाभिधे ॥२८॥

विक्रमाब्दे धराधीशा विक्रमाक्रान्तभूमयः ।
सर्वत्र सर्वदा मेघा मुञ्चन्ति प्रचुरं जलम् ॥२९॥

कोद्रवाः शालिमुद्गाश्च सकुल्माषास्तथैव च ।
महर्घं प्राप्नुवन्त्येवं वत्सरे वृषभाभिधे ॥३०॥
वृषाब्दे निखिला भूपा युध्यन्ते वृषभा इव ।
मखैः प्रयुक्तैर्विप्रेन्द्रैर्युज्यन्ते सततं सुराः[1] ॥३१॥

चणका मुद्गमाषाश्च अन्यच्च द्विदलं बहु ।
महर्घं जायते सर्वं चित्रभानौ तु वत्सरे ॥३२॥
चित्रार्घवृष्टिसस्याद्यैर्विचित्रा निखिला धरा ।
निराकुलोऽखिलो लोकश्चित्रभानौ तु वत्सरे ॥३३॥
सुभिक्षं क्षेममारोग्यं विश्वं च निरुपद्रवम् ।
व्यवहारो भवेच्छ्रेष्ठः सुभानौ वत्सरे ध्रुवम् ॥३४॥

सुभानौ शस्त्रसंभूत्या नृपतीनां च विग्रहः ।
विभाति भूरिसस्यौघैर्विविधैश्च पयोधरैः ॥३५॥

अतिवृष्टिश्च जायेत धान्यस्याप्यथ पीडनम् ।
सस्यं भवति सामान्यं वत्सरे तारणाभिधे ॥३६॥

सततं वृष्टिरतुला स्थलधान्यानि सर्वदा ।
तारणेऽब्दे सदा व्याधिर्नृपाणां दारुणं रणम् ॥३७॥

---

[1] मखैः प्रसक्ता विप्रेन्द्रा युध्यन्ते सततं सुराः पा

CC-0. Nepal Sanskrit Academy, Kathmandu

बहुसस्यानि जायन्ते सर्वदेशेषु सर्वदा ।
सौराष्ट्रे लाटदेशे च पार्थिवाब्दे विशेषतः ॥३८॥

अतिवृष्ट्यर्घसंपूर्णा महोत्साहाश्च जन्तवः [१]।
भीतिमोहान्नृपाद् वैरं प्रलापैश्चैव पार्थिवे ॥३९॥

दुर्भिक्षं जायते घोरं विश्वं चोपद्रवाकुलम् ।
अनावृष्टिर्महाघोरा वत्सरे व्ययसंज्ञके ॥४०॥

व्ययाब्दे निखिला भूपा बहुयुद्धपरायणाः ।
वरमत्तेभतुरगतन्त्रैर्भूतानि सर्वदा ॥४१॥

वर्षत्यपि महामेघे सस्यं नैवोपजायते ।
महर्घं जायते सर्वं सर्वजित्संज्ञके ध्रुवम् ॥४२॥

सर्वजिद्वत्सरे सर्वजनास्तिष्ठन्ति भीरवः ।
राजानो विलयं यान्ति घोरसंग्रामराजिषु ॥४३॥

कोद्रवाः शालिमाषाश्च कङ्गुमुद्गास्तथैव च ।
जायन्ते सुलभा सर्वे सर्वधारिणि वत्सरे ॥४४॥

सर्वधारिसमे भूपाः प्रजापालनतत्पराः ।
शान्तवैराश्च सर्वत्र बहुसस्यार्घवृष्टयः ॥४५॥

कालाग्निसदृशो वायुर्धान्यौषधिप्रपीडनम् ।
जायते मानुषे कष्टं वत्सरे च विरोधिनि ॥४६॥

विरोधिवत्सरे लोकाः परस्परविरनोधिनः ।
भूरिभारयुता भूमिर्भूरिवारिसमाकुला ॥४७।

---

[१] महच्छाः सर्वजन्तवः पा.

CC-0. Nepal Sanskrit Academy, Kathmandu

सर्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्च जायते ।
शिरोवस्त्यक्षिरोगाश्च पापाश्च विकृते जनाः ॥४८॥

प्रकृतिर्विकृतिं याति विकृतिः प्रकृतिं तथा ।
तथा पि सुखिनो लोकाः नित्यं विकृतिवत्सरे ॥४९॥

उपद्रुतं जगत्सर्वं तस्करैः सबलैः शुकैः ।
पीडिताश्च प्रजाः सर्वा देशभङ्गः खराभिधे ॥५०॥

खराब्दे निखिला भूपाश्चान्योन्यं समरोत्सुकाः ।
मध्यमा वृष्टिरत्युग्राः सर्वे भूपाश्च दारुणाः ॥५१॥

सुभिक्षं क्षेममारोग्यं जगद् भवति शोभनम् ।
बहुक्षीरास्तथा गावो वत्सरे नन्दनाभिधे ॥५२॥

नन्दनाब्दे सदा पृथ्वी बहुसस्यार्घवृष्टियुक् ।
कामुका निखिला लोकाः सर्वे कन्दर्पसन्निभाः ॥५३॥

अतोयाश्च तथा मेघा वर्षन्ते खण्डमण्डलाः ।
नश्यन्ति सर्वसस्यानिवत्सरे विजयाभिधे ॥५४॥

आनन्दनिर्भरा लोकाः प्रतापाग्नियुताः सदा ।
विजयाब्दे सदा पृथ्वी बहुसस्यार्घसंयुताः ॥५५॥

क्षत्रियाश्च तथा वैश्या शूद्राश्च नटनर्तकाः ।
पीडिता बहुभिर्दुःखैर्वत्सरे जयसंज्ञके ॥५६॥

CC-0. Nepal Sanskrit Academy, Kathmandu

सततं दीर्घरोगं च दाहज्वरसमन्वितम् ।
अभिभूतं जगत् सर्वं वत्सरे मन्मथाभिधे ॥५७॥

मन्मथाब्दे जनाः सर्वे सत्केलीलीललोलुपाः ।
शालीक्षुयवगोधूमैः पाण्डुभूमिः समृद्धिदा ॥५८

सर्वधान्यक्षयश्चापि सर्वधान्यमहर्घता ।
व्यवहाराश्च नश्यन्ति दुर्मुखे दुर्मुखाः प्रजाः ॥५९

दुर्मुखाब्दे मध्यवृष्टिरतिघोररणाकुलम् ।
महावैरं महीनाथ[1] वीरवारणघोटकैः ६०

पीड्यन्ते सर्वधान्यानि देशे देशे च सर्वतः ।
क्षीयन्ते च प्रजा सर्वा हेमलम्बे च वत्सरे ॥६१

हेमलम्बे त्वीतिभीतिर्मध्यसस्यार्घवृष्टयः ।
भ्रान्तिभीत्या सुसंक्षोभा खेटहिंसापरायणाः ६२

तस्करैः पार्थिवैश्चैव, अभिभूतं जगद् बहु ।
अर्घो भवति सामान्यो विलम्बिनि महद्भयम् ॥६२

विलम्बिवत्सरे भूपाः परस्परविरोधिनः ।
प्रजापीडा त्वनर्घत्वं तथापि सुखिनो जनाः ॥६४

विषमस्थं जगत्सर्वं विरोधभयसंकुलम् ।
सर्वदोषसमायुक्तं विकार्याख्ये तु वत्सरे ॥६५

---

[1] महानाट्च प्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu

विकार्यब्दे ऽखिला लोका रोगिणो वृष्टिभीतयः ।
पूर्वसस्यफलं स्वल्पं बहुलं चापरं फलम् ॥६६॥

क्वचिद् वर्षति पर्जन्यो देशे स छिन्नमण्डलः ।
व्यवहारविपर्यासः शार्वर्याख्ये तु वत्सरे ॥६७॥

सार्वरीवत्सरे पूर्णा धरा सस्यार्घवृष्टिभिः ।
सर्वाः प्रजाः सुखिन्यश्च राजानः स्युर्विवैरिणः ॥६८॥

दुर्भिक्षं जायते, सर्वा मेदिनी शुष्यति ध्रुवम् ।
संप्लवन्ते च तोयानि पीडिता मानवाः प्लवे ॥६७॥

प्लवाब्दे त्वखिला धात्री वृष्टिभिः फलसंमिता
रोगाकुला त्वीतिभीतिः संपूर्णमपरं फलम् ॥७०॥

सुवर्णरूप्यधान्यानि जगत् सर्वं सुशोभनम् ।
ब्राह्मणा वणिजस्तुष्टाः शुभकृद्वत्सरे ध्रुवम् ॥७१॥

शुभकृद्वत्सरे पृथ्वी राजते विविधोत्सवैः ।
आतङ्कचौरभयदा राजानः समरोन्मुखाः ॥७२॥

सुभिक्षं क्षेममारोग्यं तृप्ता गावो द्विजा बहु ।
सुस्थिराश्च प्रजाः सर्वाः शोभकृद्वत्सरे ध्रुवम् ॥७३॥

शोभकृद्वत्सरे धात्री प्रजानां रोगशोकदा ।
तथापि सुखिनो लोका बहुसस्यार्घवृष्टयः ॥७४॥

विषमस्थं जगत् सर्वं व्याकुलत्वं सुदारूणम् ।
जनानां जायते न्योऽन्यं ऽ क्रोधः क्रोध्याख्यवत्सरे ॥७५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

क्रोध्यब्दे निखिला लोकाः क्रोधलोभपरायणाः ।
ईतिदोषेण निहता मध्यसस्यार्घवृष्टयः ॥७६॥

सर्वत्र जायते क्षेमं सर्वसस्यमहर्घता ।
कार्पासस्य महर्घत्वं समे विश्वावसौ ध्रुवम् ॥७७॥

अब्दे विश्वावसौ विश्वा चौररोगाकुला धरा ।
अन्योन्यसमरे भूपाः शत्रुभिर्हतभूमयः[1] ॥७८॥

राजानो मन्त्रिसहिताः सामन्तैः खण्डमण्डलैः ।
पीडचन्त च प्रजाः सर्वा भयभीताः पराभवे ॥७९॥

शूकधान्यानि पीडचन्ते स्वल्पं वर्षति वारिदः ।
मानवाः पीडिताः सर्वे प्लवङ्गाख्ये तु वत्सरे ॥८०॥
उपद्रवप्लवं सस्यं गजवाजिधनक्षयः
अशोभना जनास्तत्र प्लवङ्गे मर्कटोपमाः ॥८१॥

कीलकाब्दे त्वीतिभीतिः प्रजाक्षोभो नृपाहवैः ।
तथापि वर्धते लोकः समधान्यार्घवृष्टयः ॥८२॥

जायन्ते सर्वसस्यानि सुभिक्षं निरुपद्रवम् ।
राज्ञाँ सुदृष्टिः, सर्वत्र सौम्यं[2] सौम्याख्यवत्सरे ॥८३॥
सौम्याब्दे सुखिनो लोका बहुसस्यार्घवृष्टयः ।
विवैरिणो धराधीशा बिप्राश्चाध्वरतत्पराः ॥८४॥

---

[1]हृतमूमय. प्र. । [2]सौख्यं पा ।

पराभवाब्दे राजानः प्राप्नुवन्ति पराभवम् ।
आमयः क्षुद्रधान्यानि प्रभूतानि सुवृष्टयः ॥ ना. सं. ३

CC-0. Nepal Sanskrit Academy, Kathmandu

तोयपूर्णो भवेन्मेघो न वर्षति दिने दिने ।
जायन्ते सर्वसस्यानि सम्यक् साधारणाभिदे ॥८५॥

साधारणाब्देऽर्घवृद्धिर्वायुः साधारणो ध्रुवम् ।
विवैरिणो धराधीशाः प्रजाः स्युः स्वस्थचेतसः ॥८६॥

वासवो वर्षते देशे देशे चाखण्डमण्डलः ।
अहिच्छत्रे कान्यकुब्जे कृषिर्न स्याद् विरोधिनि[1] ॥८७॥

विरोधकृद्वत्सरे तु परस्परविरोधिनः ।
सर्वे जना नृपाश्चैव, मध्यसस्यार्घवृष्टयः ॥८८॥

अभिव्याप्तं जगत् सर्वं क्लेशैर्बहुविधैः खरैः ।
मारुतैः कफदाहैश्च परिविनि वत्सरे ॥८९॥

भूपाहवमहारोगा मध्यसस्यार्घवृष्टयः ।
दुःखिनो जन्तवः सर्वे वत्सरे परिधाविनि ॥९०॥

प्रमादिवत्सरे तस्मिन् मध्यसस्यार्घवृष्टयः ।
प्रजाः कथंचिज् जीवन्ति समात्सर्याः क्षितीश्वराः ॥९१॥

---

[1] विरोधकृतीत्यर्थः ।

अनर्घ्यामयरोगेभ्यो भीतिरीतिर्निरन्तरम् ।
तथापि दुःखमाप्तोति प्रमादिवत्सरे जनः ॥ ना. सं. ३
सस्यानामीतिभयं क्षुद्यमखिलप्रजानां च ।
चौरभयं धनिकानां राजभयं च प्रमाद्यब्दे ॥ व.सं.६

CC-0. Nepal Sanskrit Academy, Kathmandu

निष्पत्तिः सर्वसस्यानां सर्वधान्यमहर्घता ।
साम्य च घृततैलानामानन्दे नन्दिताः प्रजाः ॥९२॥

आनन्दाब्दे खिला लोकाः सर्वदाऽऽ नन्दचेतसः ।
राजानः सुखिनः सर्वे बहुसस्यार्घवृष्टयः ॥९३॥

कोद्रवाः शालयो मुद्गा पीडचन्ते सर्वदाभृशम् ।
सर्वौषधानि धान्यानि राक्षसे निष्ठुराः प्रजाः ॥९४॥
राक्षसाब्दे खिला लोका राजानो निष्कृपाः सदा ।
स्वकार्यनिरताः सर्वे मध्यसस्यार्घवृष्टयः ॥९५॥

दुर्भिक्षं जायते घोरं धान्यौषधिनिपीडितम् ।
अनलो पि प्रवधाधेत वत्सरे नलसंज्ञके ॥९६॥
नलाब्दे मध्यसम्यार्घवृष्टयः प्रचुरं गताः ।
नृपसंक्षोभसंजातभूरितस्करभीतयः ॥९७॥

पिङ्गले देशभङ्गश्च दुर्भिक्षं नर्मदातटे ।
गोनर्तके महिष्यादिनाशः स्यात् कालनर्तके ॥९८॥

पिङ्गलाब्दे त्वीतिभीतिर्मध्यसस्यार्घवृष्टयः ।
राजानो विक्रमाक्रान्ताः भुञ्जन्ते शत्रुमेदिनीम् ॥९९॥

वत्सरे कालयुक्ताख्ये सुखिनः सर्वजन्तवः ।
फलिता वृक्षजातिस्तु सस्यवृद्धिः सुभिक्षकृत् ॥१००॥

तोयपूर्णस्थिता मेघा बहुसस्या च मेदिनी ।
निष्ठुराः पार्थिवा नित्यं सिद्धार्थे वरवर्णिनि ॥१०१॥

९४, ९५ श्लोकौ प्र प पुस्तकयोर्नस्तः

CC-0. Nepal Sanskrit Academy, Kathmandu

सिद्धार्थे वत्सरे भूपाः शान्तवैरास्तथा प्रजाः ।
सकला वसुधा चापि बहुसस्यार्घवृष्टयः ॥१०२॥

अल्पतोयाः सदा देशाः कीटकाः प्रबलाः स्मृताः ।
विरुद्धाः पार्थिवाः क्रूरा रौद्रसंवत्सरे प्रिये ॥१०३॥

रौद्राब्दे नृपसंक्षोभसंभूतक्लेशभागिनः ।
सततं त्वखिला लोका मध्याः सस्यार्घवृष्टयः ॥१०४॥

सुभिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्तते ।
भवेद् वै मध्यमा वृष्टिर्दुर्मतौ समुपस्थिते ॥१०५॥

दुर्मत्यब्देऽखिला लोका भूपा दुर्मतयस्तथा ।
तथापि सुखिनः सर्वे मध्यसस्यार्घवृष्टयः ॥१०६॥

सुभिक्षं जायते, लोकः सर्वोपद्रववर्जितः ।
प्राणिनाँ जायते सौख्यं दुन्दुभ्याख्ये तु वत्सरे ॥१०७॥

सर्वसस्ययुतां धात्रीं पालयन्त्यवनीश्वराः ।
पूर्वदेशस्य नाशः स्यात् तस्मिन्दुन्दुभिवत्सरे ॥१०८॥

महत् सुभिक्षं सर्वत्र क्रूरचेष्टो नराधिपः ।
संग्रामं च करोत्युग्रं रक्तोद्गारिणि वत्सरे ॥१०९॥

रुधिरोद्गारिणि समे मर्कटानां समा नराः ।
नृपसंग्रामसंभूतभीभाजः सकला जनाः ॥११०॥

रोगो मरणदुर्भिक्षं धान्यौषधिनिपीडनम् ।
पापरोगो भवेन्नित्यं रक्ताक्ष्याख्ये तु वत्सरे ॥१११॥

CC-0. Nepal Sanskrit Academy, Kathmandu

रक्ताक्षिवत्सरे भूपा अन्योन्यं कलहप्रियाः ।
ईतिरोगाकुला धात्री, स्वल्पाः सस्यार्धवृष्टयः ।।११२।।

रोगो मरणदुर्भिक्षं सर्वोपद्रवसंकुलम् ।
विषमं च जगत्सर्वं क्रोधनाख्ये तु वत्सरे ।।११३।।

क्रोधनाब्दे मध्यवृष्टिः पूर्वसस्यविनाशनम् ।
सम्पूर्णमपरं सस्यं भूपाः क्रोधाभिभूतयः ।।११४।।

मेदिनी चलते प्रायः सर्वतः सचराचरम् ।
देशभङ्गश्च दुर्भिक्षं जायते क्षयवत्सरे ।।११५।।

क्षयाब्दे मध्यसस्यार्घवृष्टयः स्युः क्षयं गताः ।
तथापि लोका जीवन्ति कथंचिदेनकेनचित् ।।११६।।

इति श्री शारङ्गसाधुवचनामृतेन भट्टष्ठीलक्ष्मणाचार्य-विरचिते
जगन्मोहने संवत्सरफलमाध्यायः

अथ षष्ठोऽध्यायः

गणितप्रयोजनमाह विश्वामित्रः—

प्रस्तुतमेतत् संख्याशास्त्रं साङ्गेषु सर्ववेदेषु ।
शब्दार्थशास्त्रजाले गान्धर्वे नाटके पुराणेषु ।।१।।

छन्दसि तर्ककाव्यालङ्कारन्यायमन्त्रशास्त्रेषु ।
सकलासु कलाविद्यास्वायुर्दाये दशाविपाकेषु ।।२।।

CC-0. Nepal Sanskrit Academy, Kathmandu

६ नृपादिफलाध्यायः

खेगणिते भूगणिते खाते भित्तौ प्रकीर्णके मिश्रे ।
त्रैराशिके तु गणिते सौपे शास्त्रे च मान्मथे शास्त्रे ॥३॥

आयुर्वेदे कार्मुकविद्यायां वास्तुशास्त्रविद्यायाम् ।
मणिरत्नकनकमुक्ताधान्यतुलाद्याश्रितेषु शास्त्रेषु ॥४॥

वहुनोक्तेन किमत्र त्रिभुवनमध्येऽखिलेषु कार्येषु ।
गणितेन विना नास्ति व्यवहारो गणितशास्त्रविद् ब्रह्मा ॥६॥

नामधेयानि संख्यानामेकं दश शतं ततः ।
सहस्रमयुतं चैव लक्षं च दशलक्षकम् ॥७॥

कोटिश्च दशकोटिश्च शतकोटिस्तथार्वुदम् ।
न्यर्वुदं खर्वसंज्ञं च महाखर्वं चतुर्दशम् ॥७॥

पद्ममन्त्यं महापद्मं क्षोण्यन्त्या महदादिका[१] ।
शङ्खं तथा महाशङ्खं क्षितिश्चैव महाक्षितिः ॥८॥

क्षोभं ततो महाक्षोभं निधिश्चैव महानिधिः ।
समुद्रं पुस्करं तस्मादचिन्त्यममितं तथा ॥९॥

अनन्तं च परार्धं च द्वात्रिंशत् समुदाहृतम् ।
एकादिसंख्याः क्रमशो गणयेत् तान् विलोमतः ॥१०॥

---

[१] महाक्षौणिरित्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ संवत्सराधिपफलमाहुर्गर्गवसिष्ठनारदयवनाचार्याः-

मेघाः स्वल्पोदका धान्यं स्वल्पं स्वल्पफलाः द्रुमाः
चौराग्निशंका नृपतेर्भास्करे भूपतौ सति ॥११॥
अन्योन्यवैरं क्षितिपालकानामत्यम्बुमुञ्चन्ति वलाहकाश्च ।
राज्ञां भयं चौरभयं [1]जनानां चौराग्निबाधाब्दपतौ पतङ्गे ॥१२॥

बहुधान्यं महावृष्टिः पङ्कजश्रीर्नृपोदयः ।
सौख्यं व्याधिविनिर्मुक्तिः सोमे च नृपतौ सति ॥१३॥
धाराधरः क्ष्मामखिलां प्रकुर्याद् धाराधरक्षेमसुखं सुभिक्षम् ।
सम्पूर्णसस्यानि भवन्ति भूमौ नित्योत्सवो ह्यब्दपतौ शशाङ्के ॥१४॥

खण्डमण्डलवृष्टिः स्याद् वह्निभीताश्च मानवाः ।
दुःखव्याध्यादिसन्तप्ता भौमे भूमिपतौ सति[2] ॥१५॥
वातोद्धतो वह्निरतिप्रचण्डो दहत्यलं ग्रामपुरं वनानि ।
न वारि मुञ्चन्ति घना, महर्घं युद्धे नृपाणां क्षितिजेऽब्दनाथे ॥१६॥

विवाहादि शुभं कर्म धनधान्यसमृद्धयः ।
सुभिक्षं सर्वसौख्यं च बुधे राजनि जायते ॥१७॥
सदागतिः सार्धसकृत्प्रजानां नराः स्त्रियो वा रतिकर्महीनाः ।
धाराधरश्चाप्यविमुक्तधारा मध्यानि सस्यानि बुधेऽब्दनाथे ॥१८॥

बहुक्षीरा धेनवः स्युः सुवृष्टिर्वेदगा द्विजाः ।
श्रौतनिष्ठा, मनःसौख्यं जाग्रते नृपतौ गुरौ ॥१९॥

---

[1] शस्त्रभयं ख । [2] भौमे च सति भूपतौ पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

द्विजातयः कर्मरताः सधर्माः सन्मार्गगाश्चापि मिथो नरेन्द्राः ।
सुभिक्षमारोग्यसुखं प्रजानां सुवृष्टिरब्दाधिपतौ सुरेज्ये ॥२०॥

नवमेघाः[1] प्रसूयन्ते सस्यपूर्णा च मेदिनी ।
श्रीवृक्षाः सफला वृष्टिर्जायतेभार्गवे नृपे ॥२१॥

समृद्धसस्या वसुधाऽतिवृष्टिर्गावो हि सपूर्णपयोधराश्च ।
स्त्रियः प्रियाणां जनयन्ति तोषं कामोपचारैर्भृगुजेऽब्दनाथे ॥२२

अलं महीतले रोगो बहुजन्तुनिपीडने ।
युद्धं नृणां मनोदुःखं जायते च शनौ नृपे ॥२३॥

महर्धमत्यल्पतरा च वृष्टिरधर्मं युक्ता मनुजाः कुवृत्ताः ।
ते नीचकर्मस्वपि यान्ति तोषं म्लेच्छादिकानां सुखमर्कजेशे ॥२४॥

अथ मन्त्रिफलम्

राज्ञामन्योन्यवैरत्वमनावृष्टेर्भयं तथा ।
अधर्मनिरता मर्त्या जायन्ते रविमन्त्रितः ॥२५॥

राजा वा सचिवो वापि सस्यपो वा दिवाकरः ।
तस्मिन्नब्दे नृपक्रोधः स्वल्पाःसस्यार्धवृष्टयः ॥२६॥

सुवृष्टिः सर्वसस्यानि फलितानि भवन्ति च ।
क्षेमारोग्यं सुभिक्षं च जायते शशिमन्त्रितः ॥२७॥

---

[1] नववध्वः प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अधर्मनिरता भूपाः लदाङ्कुरजनाकुलाः।
चौराग्निशस्त्रबाधाश्च भूमिपुत्रस्य मन्त्रितः ॥२८॥

वायुना पीडिता मेघाः सर्वे पापरता जनाः।
मध्यसस्यफलं लोके चन्द्रपुत्रस्य मन्त्रितः ॥२९॥

भवन्ति गावः सुदुहाः फलिता धान्यजातयः।
पादपाः फलिता रम्या जायन्ते गुरु मन्त्रितः ॥३०॥

भवन्ति गावः सुदुहाः फलिता धान्यजातयः।
क्षेमारोग्यं प्रजानां च जायते भृगुमन्त्रितः ॥३१॥

मध्यवृष्टिर्मध्यसस्यं[1] पीडा गोषु जनेषु[2] च।
म्लेच्छानां जायते वृद्धिः सूर्यपुत्रस्य मन्त्रितः ॥३२॥

सस्याधिपफलम्

सस्याधियो यदा सूर्यः फलितानि भवन्ति च
शूकधान्यानि सर्वाणि शिम्बिधान्यानि यानि च ॥३३॥

जलधान्यानि सर्वाणिस्थलधान्यानि यानि च।
पाण्डुभूमिस्तु फलिता चन्द्रे सस्याधिपे सति ॥३४।

रक्तशालिमहाशालिप्रियङ्गुचणकादयः।
सस्याधिपे सदा[3] भौमे फलिता रक्तभूमयः ॥३५॥

---

[1] मन्दसस्यं पा.। [2] नरेषु प्र। [3] यदा पा.।

CC-0. Nepal Sanskrit Academy, Kathmandu

मध्यसस्यं मध्यवृष्टिर्मेघा वातेन पीडिताः
क्षेमत्वं सर्वजन्तूनां बुधे सस्याधिपे सति ॥३६॥

भवन्ति गावः सुदुहाः फलिता वृक्षजातयः
नितियुक्ताः सदा भूपा जीवे सस्याधिपे सति ॥३७॥

बहुतोयास्तथा मेघा बहुसस्या च मेदिनी ।
बहुक्षीरयुता[1] गावः शुक्रे सस्पाधिपे सति ॥३८॥

तिलमाषकुलत्थादिकृष्णधान्यानि यानिच ।
कृष्णभूमिस्तु फलिता मन्दे सस्याधिपे सति ॥३९॥

अथ रसाधिपतिफलम्

घृतं तैलं गुडः क्षौद्रम् ये चान्ये मधुरादयः ।
अर्धवृद्धचा प्रजावन्ते सूर्ये सति रसाधिपे ॥४०॥

अर्घवृद्धिः सदा धात्रीशर्करालवणादिषु[2] ।
घृततैलमधुक्षीरवृद्धिश्चन्द्रे रसाधिपे ॥४१॥

राजिकाल लवणं सर्पिस्तिलतैलगुडादिकम् ।
अग्निना दह्यते ग्रामो भौमो यदि रसाधिपः ॥४२॥

घृततैलगुडक्षौद्रपयांसि दधिशर्कराः ।
अर्घवृद्धचा प्रजायन्ते बुधो यदि रसाधिपः ॥४३॥

---

[1] बहुक्षीरघृता श्र क, बहुक्षीरघृता प्र. ।

[2] धात्रीशर्करालवणादयः पा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

भवन्ति गावः सुदुहाः फलिता धान्यजातयः
क्षेमारोग्यं प्रजानां च जीवो यदि रसाधिपः ॥४४॥

सितादधिघृतादिनामर्घवृद्धिः प्रजायते ।
वृक्षजातिस्तु फलिता शुक्रो यदि रसाधिपः ॥४५॥

घृततैलतिलेक्षुश्च लवणदि रसादि यत् ।
शुष्यन्ति चौरबाधाश्च रसेशे सूर्यनन्दने ॥४६॥

अथ नीरसाधिपफलम्

नीरसस्याधिपे सूर्ये ताम्रचन्दनयोरपि ।
रक्तमाणिक्यमुक्तादेरर्घवृद्धिः प्रजायते ॥४७॥

शुक्लवर्णादिवस्तूनां[1] मुक्तारजतवाससाम् ।
अर्घवृद्धिः प्रजायेत शशाङ्के नीरसाधिपे ॥४८॥

नीरसेशे सदा भौमे प्रवालं रक्तचेलकम् ।
रक्तचन्दनताम्राणि वर्धन्ते च दिने दिने ॥४९॥

[2]चित्रवस्त्रादिकं चैव शङ्खचन्वनकादिच ।
अर्धवृद्ध्या प्रजायन्ते नीरसेशो बुधो यदि ॥५०॥

हरिद्रा पीतवस्तूनि पीतवस्त्रादिकं तथा ।
नीरसेशे सदा जीवे सर्वेषां वृद्धिरुत्तमा ॥५१॥

कर्पूरागरुगन्धानां हेममौक्तिकवाससाम् ।
अर्घवृद्धिः प्रजायेत भार्गवे नीरसाधिये ॥५२॥

---

[1] शुक्लवर्णादिरत्नानाम् प्र. । [2] इतः सप्तमाध्यायस्य ६$\frac{1}{2}$ श्लोकपर्यन्तं क च पुस्तकयोर्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अयःपिण्डादिलोहानां कृष्णवर्णादिवस्तुनः ।
अर्धवृद्धिः प्रजायेत मन्दे च नीरसाधीपे ॥५३॥
अब्दाब्देशचमूनाथसस्यपानां बलाबलम् ।
तत्कालग्रहचारं च सम्यग् ज्ञात्वा फलं वदेत् ॥५४॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने नृप-मन्त्रि-सस्य-रस-नीरसाधिपफलकथनाध्यायः

अथ सप्तमोऽध्यायः

अथाषाढशुक्ल-पञ्चमीफलम् ।

आषाढमासे सितपञ्चमी च रव्यादिवारादियुताक्रमेण ।
अत्यल्पवृष्टिह्यतिवृष्टियुद्धे[1] क्षेमं सुभिक्षं सुखदं [2]विनाशम् ॥१॥

आषाढशुक्लपञ्चम्यां शुभवारे शुभेक्षिते ।
वारिपूर्णाऽखिला धात्री धान्यवृद्धिसुभिक्षकृतम् ॥२॥
क्रूरग्रहयुते वारे लग्नेक्रूरेक्षिते यदा ।
दुर्भिक्षं मरणं व्याधिश्चोरबाधा सदा तदा ॥३॥

आर्द्राप्रवेशफलम्

प्रतिपदि यद्यार्द्रायां प्रवेशः शुभदो रवेः ।
द्वितीये सस्यवृद्धिः स्यात् तृतीये तु शुभिक्षदः ॥४॥
चतुर्थ्यां रोगदः प्रोक्तः पञ्चम्यांमुत्तमो मतः ।
यष्ठ्यां धान्यसमृद्धिः स्यात सप्तम्यां क्षेममुत्तमम् ॥५॥

---

[1] छन्दोभङ्गोऽत्रवर्तते । [2]मखदं अ पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अष्टम्यामल्पवृद्धिः स्यान्नवम्यां नीतिबाधता ।
दशम्यां शुभदः प्रोक्तस्त्वेकादश्यां सुभिक्षकृत् ॥६॥

द्वादश्यां शुभदः प्रोक्तस्त्रयोदश्यां जलप्लुतम् ।
भूते त्वर्घविनाशाय पूर्णे पूर्णफलप्रदः ॥७॥

अमायां राजनाशाय पक्षयोरुभयो[1]रपि ।
रौद्रेऽर्के भानुवारे च प्रवेशे पशुनाशनम् ॥८॥

सोमे सुभिक्षदः प्रोक्तो भौमे निधनमाप्नुयात् ।
बुधे क्षेमं सुभिक्षं च गुरौ चार्घसमृद्धये ॥९॥

शुक्रे शान्तिकरः प्रक्तो मन्दे मन्दफलं भवेत् ।
प्रवेशो रौद्रनक्षत्रे, अश्विन्यां यदि चेच्छुभम् ॥१०॥

भरण्यामशुभं प्रोक्तं कृत्तिकायां निवर्षणम् ।
धातृद्वये सुभिक्षं च रौद्रर्क्षे रौद्रकृत् ततः ॥११॥

पुष्ये जलप्लवा लोका अदितिश्चार्घवृद्धये ।
सार्पभे दारूणं प्रोक्तं कैश्चित् सौख्यविनाशनम् ॥१२॥

मघायां स्वल्पवृष्टिः स्याद् भाग्ये कीर्तिकरं भवेत् ।
उत्तरात्रितये वृष्टिः करे सर्वसुखावहः ॥१३॥

चित्रायां चित्रधान्यानि सदा शुभफलं भवेत् ।
स्वातौ सस्याभिवृद्धिः स्पाद् वैशाखे[2] रोगनाशनम् ॥१४॥

---

[1] राज्ञाम्, उभयोः पक्षयोः स्वपक्षपरपक्षयोरित्यर्थः अपुस्तकस्था टिप्पणी । [2] विशाखायाम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

७ आर्द्राप्रवेशफलाध्यायः

मैत्रे सर्वमहीपालाः सन्तुष्टाः सर्वजन्तवः ।
ऐन्द्रे सर्वभयं कुर्यान्मूले सर्वभयावहः ॥१५॥

जलर्क्षे चाति युद्धं स्याद् विश्वश्रवणयोः शुभः ।
वासवर्क्षे तु धरणी संपूर्णफलदायिनी ॥१६॥

शतभे[1] जलसंकीर्णं पूर्वभाद्रे सुशोभनम् ।
नृपविद्वज्जनादीनां सन्तुष्टं कुरुतेऽन्त्यभम् ॥१७॥

अथार्द्राप्रवेशकालिकयोगफलम्

विस्कुम्भप्रीतीरायुष्मान् सौभाग्यः शोभनस्तथा ।
विष्कुम्भपञ्चके चास्मिन् रौद्रक्षेत्रं विशेद् यदि ॥१८॥

सुभिक्षं जलसंपूर्णं[2] नृपाः स्वस्थाः शुभप्रदाः ।
अतिगण्डेऽति युद्धं स्याद् धृतियोगे सुभिक्षकृत् ॥१९॥

शूलगण्डौ दोषकरौ वृद्धिश्चातीव शोभना ।
व्याघातो जननाशाय हर्षणः परितोषदः ॥२०॥

वज्रयोगे सर्वजनाऽवृद्धिः सस्याभिवृद्धये ।
सिद्धौ सर्वत्र सिद्धिः स्याद् व्यतिपाते धनक्षयः ॥२१॥

अल्पवृष्टिर्वरीयांस्तु परिघश्चार्थनाशनः ।
शिवश्च तस्य नाशाय सिद्धिसाध्यौ सुभिक्षदौ ॥२२॥

---

[1]शततारकायाम् । [2]जलसंकीर्णं प्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu

शुभशुक्लौ वृष्टिकरौ जनानन्दकरौ तदा ।
ब्रह्मयोगे मध्यफलमैन्द्रे त्विन्द्रफलं भवेत् ॥२३॥

वैधृतौ च महारौद्रं सूर्यर्क्षे सूर्यदर्शने ।
दुर्भिक्षं मरणं व्याधिं कुर्यादार्द्रा फलं तथा ॥२४॥

अथार्द्रासमयफलम्

पूर्वाह्णकाले जगतो विपत्तिर्मध्यन्दिने चाल्पफला च पृथ्वी ।
अस्ते गताऽऽर्द्रा बहुसस्यसंपत्क्षेमं सुभिक्षं स्थिरमर्धरात्रे ॥२५॥

आर्द्राप्रवेशे यदि भास्करस्य चन्द्रे त्रिकोणे यदि केन्द्रगे वा ।
जलाशये सौम्यनिरीक्षिते वा संपूर्णसस्या वसुधा भवेच्च ॥२६॥

अर्द्राप्रवेशे वृष्टिः स्यात् सार्धमासन्निवर्षणम्[1] ।
दिवार्द्रा सस्यनाशाय रात्रौ सस्याभिवृद्धये ॥२७॥

अस्तमानेऽर्धरात्रे वा महदर्घसुभिक्षकृत्[2] ।
आर्द्रानक्षत्रगे सूर्ये यदि वृष्टिर्भवेत्तदा ॥२८॥

अनर्घमल्पवृष्टिः स्यादीतिरोगस्त्वनर्घता ।
आर्द्राप्रवेशलग्ने तु शुभषड्वर्गसंयुते ॥२९॥

सुभिक्षं कुरुते भूमौ वृष्टिः कर्षकसंमता ।
दस्रभद्वितयस्थेऽर्के यदि वृष्टिर्भवेत् तदा ॥३०॥

---

[1]निवर्तनम् प्र. । [2]सा महर्घसुभिक्षकृत् पा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

७ आर्द्राप्रवेशफलाध्याय:

क्षेमं सुभिक्षमतुलमीतिदोषोऽग्निधिष्ण्यगे ।
रोहिणीद्वितयस्थेऽर्के सस्यवृद्धिर्मनोजय: ॥३१॥

आदित्यादिद्विदैवाख्ये रुद्रर्क्षे संस्थिते रवौ ।
सस्यवृद्धि: सुभिक्षं च विना सिंहप्रवेशनम् ॥३२॥

मित्रभत्रितयस्थेऽर्के सस्यवृद्धिर्मनोजय: ।
पूर्वाषाढागते भानौ जीमूतै: परिवेष्टिते ॥३३॥

तुषारफलमुक्तावानृक्षेऽखिलदिनेष्वपि[1] ।
विश्वभादृक्षषट्केऽर्के स्थिते वृष्टिर्भवेद् यदि ॥३४॥

सुवृष्टि: क्षेममारोग्यं, नृपास्तुष्टास्तु सर्वदा ।
रेवतीसंयुते सूर्ये यदि वृष्टिर्भवेत् तदा ॥३५॥

पूर्वाषाढासु भङ्ग: स्यादार्द्राद्येषु निवर्षणम् ।
रेवत्यां यदि वृष्टि: स्याद् दशर्क्षेषु निवर्षणम् ॥३६॥

भाग्यश्रवणहस्तार्द्राभरण्यां वायुभेषु च ।
शनैश्चरे गते नृणां सुभिक्षारोग्यवृष्टिकृत् ॥३७॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने रवेरार्द्राप्रवेशफलकथनाऽध्याय: ।

---

[1] दिनखिले स्वपि पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथाष्टमोऽध्यायः

गुरूदयाब्दफलम्

वसिष्ठ-नारदौ—

[1]द्विभा ऊर्जादिमासाः स्युः पञ्चान्त्यैकादशस्त्रिभाः ।
यद्धिष्ण्येऽभ्युदितो जीवस्तन्नक्षत्राख्यवत्सरः । ॥१॥

मासेषु चोर्जादिषु कृतिकादि द्वयं द्वयं वै क्रमशो द्विभात्स्यात् ।
त्रिभा नभस्येषतपस्यमासाः शुक्लान्तयुक्तर्क्षवशादजस्रम् ॥२॥

उदेति धिष्णेन महेन्द्रमन्त्री तेनैव तन्नाम भवेत्तु वर्षम् ।
ज्ञेयानि तत्कार्तिकपूर्वकाणि भवन्ति तेषां च फलानि सम्यक् ॥३॥

पीडा स्यात् कार्तिके वर्षे तथा गोऽग्न्युपजीविनाम्
क्षुच्छस्त्राग्निभयं वृद्धिः[2] पुष्पकौसुम्भजीविनाम् । ॥४॥

अनावृष्टिः सौम्यवर्षे मृगाखुशलभाण्डजैः ।
नाशं प्रयान्ति सस्यानि राजानो युद्धदुर्मदाः ॥५॥

पौषेऽब्दे सुखिनः सर्वे द्विजाश्चाध्वरतत्पराः ।
निवृत्तवैरा राजानो बहुसस्यार्घवृष्टयः ॥६॥

माघेऽब्दे जन्तवः सर्वे गुरुपूजनतत्पराः ।
क्षेमं सुभिक्षमारोग्यं वृष्टिः कर्षकसम्मता ॥७॥

---

[1] अपुस्तकस्था टिप्पणी—

का	मा	पौ	मा	फा	चै	वै	ज्ये	आ	श्रा	भा	आ
३	५	७	९	११	१४	१६	१८	२०	२२	२४	२७
४	६	८	१०	१२	१५	१७	१९	२१	२३	२५	१
				१३						२६	२

[2] वृष्टिः पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

फाल्गुनेऽब्दे चौरभीतिः स्त्रीणां दौर्भाग्यता भृशम् ।
क्वचिदवृष्टिः क्वचित् सस्यं क्वचिद् वृद्धिश्च जायते ॥८॥

चैत्रेऽब्दे मध्यमा वृष्टिरुत्तमान्नं सुदुर्लभम् ।
सस्यार्घवृष्टयः स्वल्पा राजानः क्षेमकारिणः ॥९॥

वैशाखे धर्मनिरता राजानः सप्रजा भृशम् ।
निष्पत्तिः सर्वसस्यानामध्वरोद्युक्तचेतसः ॥१०॥

ज्येष्ठेब्दे धर्मतत्त्वज्ञा सनृपाः पीडिताः परैः ।
क्वचिद् वृष्टिः क्वचिद् वृद्धिः क्वचिद् भीतिः क्वचिद् गदः ॥११॥

आषाढेऽब्दे तु राजानः सर्वदा कलहोत्सुकाः ।
पूर्वसस्यसमृद्धिः स्यान्नाशयत्यपरं फलम् ॥१२॥

अनेकसस्यसंपूर्णा सरसादिसमाकुला ।
पापपाषण्डहन्त्री भूः श्रावणेऽब्दे विराजते ॥१३॥

अब्दे भाद्रपदे लोके[१] क्षेमारोग्यं क्वचित् क्वचित् ।
धनधान्यसमृद्धिश्च सुभिक्षमतिवृष्टयः ॥१४॥

भवन्त्याश्वयुजे वर्षे सन्तुष्टाः सर्वजन्तवः ।
मध्यमं पूर्वसस्यं स्यात् संपूर्णमपरं फलम् ॥१५॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने गुरूदयाब्दफलाध्यायः

---

[१] वृष्टिः प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ नवमोऽध्यायः

अथ रविचारः

वसिष्ठ–वराहौ —

राहो सुतास्तामसकीलकाख्याः कबन्धकाकोष्ट्रसृगालरूपाः ।
यदा रवेर्मण्डलगास्तदानीमातङ्कभूपाहवभीतिदाः स्युः ॥१॥

छत्रध्वजेभाङ्कुशगोवृषाश्वदण्डास्त्रभद्रासनसिंहरूपाः ।
दृष्टा रवेर्मण्डलगा यदा ते जगद्विपत्तीतिभयप्रदाः स्युः ॥२॥

श्वेता द्विजान्घ्नन्ति नृपांश्च रक्ताः पीताश्च वैश्यानसिताश्च शूद्रान् ।
चमूपतिं चोर्ध्वमुखा सरक्ताः पुरोधसं तेऽपि विचित्रवर्णाः ॥३॥

अधोमुखा धूम्रनिभाः क्षितीशं वृष्टिं पिशङ्गाश्च तथाविधास्ते ।
उक्त्वाफलं तामसकीलकानां फलं तु तन्मण्डलवर्णतश्च ॥४॥

लोहितवर्णो ग्रीष्मे लोकानां भीतिरीतिदः शश्वत् ।
हेमन्ते व्याधिभयं पीतं प्रावृष्यवृष्टिकृत् कृष्णः ॥५॥

आखण्डलचापनिभो भूपविरोधं परस्परं तत्र ।
यदि पत्रनिभो वर्हेर्द्वादशवर्षं न वर्षति क्षोण्याम् ॥६॥

शशरक्तनिभो युद्धं राजन्यत्वं विधूपभः सविता ।
श्यामनिभः कीटभयं भस्मनिभो भयदमासुरं जगतः ॥७॥

भानोरुदयास्तमये चोल्कापतनं महाहवं राज्ञाम् ।
परिवेषयति प्रकटं पक्षं पक्षार्धमेव वा सततम् ॥८॥

CC-0. Nepal Sanskrit Academy, Kathmandu

यद्युपसूर्यकमस्यां सन्ध्यायामर्घनाशनं प्रचुरम् ।
क्षितिपतिकलहं शीघ्रं सलिलभयं वा भवेन्नूनम् ॥९॥

ऋतौ वसन्ते खलु कुङ्कुमाभः शुभप्रदः कापिलसन्निभो वा ।
आनन्ददस्ताम्रनिभो विवस्वान् यः शशिरे वा कपिलः सुतीक्ष्णः ॥१०॥

ग्रीष्मे सदा हेमनिभो विचित्रवर्णो नृणां क्षेमसुभिक्षदश्च ।
अम्भोजगर्भोपमशोभनश्च प्रावृष्यतीवाखिलसस्यवृद्ध्यै ॥११॥

रक्तः सूर्यः शरदि विपुलाः कीर्तिसौभाग्यदश्च ।
हेमन्तेऽपि त्वखिलजगतः सस्यसंपद्विवृद्ध्यै ।
ज्ञात्वा चारं दशशतकरस्याखिलं दैववेदी
पश्चात् सर्वं सुशुभमशुभं वाऽऽदिशेत् कालरूपम् ॥१२॥

दस्रादिऋक्षद्वयगे दिनेशे वृष्टिर्भवेत् क्षेमकरी प्रजानाम् ।
वह्न्यृक्षसंस्थे यदि वृक्षभीतिर्ब्राह्मद्वयस्थेऽप्यमलं सुभिक्षम् ॥१३॥

प्रवेशकाले यदि रौद्रभस्य वृष्टिर्भवेदीतिरनर्धता च ।
शेषेषु पादत्रितयेषु भीतिरत्यल्पवृष्टिर्महतां गदश्च ॥१४॥

आर्द्राप्रवेशोऽह्नि जगद्विपत्तिसस्यस्य नाशं कुरुतेऽल्पवृष्टिम् ।
क्षेमं सुभिक्षं निशि सस्यवृद्धिं सुवृष्टिरत्यन्तजनानुरागम् ॥१५॥

पुनर्वसोर्भाद् दशधिष्ण्यवृन्दे प्रीतिर्जनानां कलहो नृपाणाम् ।
मैत्रादिऋक्षत्रितये जननां विभावसोः साध्वसमामयश्च ॥१६॥

जलाधिदैवर्क्षगते पतङ्गे विद्युन्मरुद्वारिघनैश्च युक्ते ।
दिनेषु सार्धत्रिदशेषु पश्चाद् रौद्रादिभेषु क्रमशः सुवृष्टिः ॥१७॥

CC-0. Nepal Sanskrit Academy, Kathmandu

भङ्गोऽस्य पौष्णर्क्षदिनेष्वथैते भिन्नेषु रात्रावपि वीक्षणीयम् ।
विश्वादिऋक्षत्रितये गदः स्यात् ततः सुभिक्षं त्रिषु वारूणर्क्षात् ॥१८॥

तुलाघनुःस्थेषु शुभग्रहेषु रवावलं प्राप्तमपि प्रजानाम् ।
शुभं भवेत् सस्यवती च पृथ्वी क्रूरेषु सर्वं विपरीतमेतत् ॥१९॥

भानौ विशाखासु भृगौ करस्थे बुधेज्ययुक्ते दिशि वासवस्य ।
महीतले सर्वजनाभिवृद्धिर्बहूनि सस्यानि बलाधिकानि ॥२०॥

कन्यागतेऽर्के सिंहस्थे गुरौ शुक्रे तुलागते ।
वारिदा वारि मुञ्चन्ति सर्वजीवहितैषिणः ॥२१॥

चरस्थिरद्विदेहेषु लग्नेषु मकरं रविः ।
प्रविशेद्यदि वाऽस्यार्घं सुवृष्टिः संमताऽक्षया ॥२२॥

यदा नक्रं विशत्यर्कस्तदा जीवसुधाकरौ ।
तुलां च वृषसिंहस्थौ नृणां स्यात् प्रीतिरुत्तमा ॥२३॥

इषे मासि यदि स्यातां सितज्ञौ रविसंयुतौ ।
भवेदवग्रहो लोके सस्यं शलभपीडितम् ॥२४॥

अलिगतस्यरवेः पुरतो भृगौ
चरमभागगते शशिनन्दने ।
भवतिवृष्टिरतीवमहीतले
सकलसस्यसमूहसमृद्धिदा ॥२५॥

इति श्री सारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने रविचाराध्यायः

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ दशमोऽध्यायः

चन्द्रचारः

वसिष्ठः—

अमृतकिरणचारं खेटचारेषु सारं
विपुलनिखिललोकानन्ददं सुन्दरीयम् ।
सदसदखिललोकाभोगदं[1] यत् फलं तत्
कथितविषमकालज्ञानदीपं प्रवच्मि ॥१॥

हिमद्युतेरभ्युदितेऽस्य शृङ्गे याम्योन्नते मेषझषे सुभिक्षम् ।
जनानुरागं वृषकुम्भयोश्च तुल्ये विषाणे जगतोऽखिलस्य ॥२॥

याम्योन्नतौ युग्ममृगास्ययोश्च मासद्वयं स्वास्थ्यमुपैति लोकः ।
सौम्योन्नते शीतनिभे सुवृष्टिःक्षेमं सदा कर्कटचापयोश्च ॥३॥

सस्याभिवृद्धिर्हरिकीटयोश्च सौम्योन्नते चापनिभे सुवृष्टिः
अनामया वृष्टिरतीव कन्यातुलाद्वयोः[2] शूलनिभे तथैव ॥४॥

एवंक्रमेणाभ्युदितः शशाङ्कः क्षेमं सुभिक्षं जगतः करोति ।
व्यस्तोदितः प्रोक्तफलं समस्तं करोति नाशं कलहं नृपाणाम् ॥५॥

शृङ्गे[3] व्रीहियवाकारे वृष्टिः स्यान्महदर्घता ।
तस्मिन् पिपीलिकाकारे पूर्वोक्तफलनाशनम् ॥६॥

विशालशुक्ले वृष्टिः[4] स्यादविशाले त्वनर्घता ।
अधोमुखे भूपहानिर्दण्डाकारे नृपाहवः ॥७॥

---

[1] भोगाभोगदं पा. । [2] कन्यामासद्वये पा. । [3] शुक्ले पा. । [4] वृद्धि पाः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

लमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशम् ।
यन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः ॥८॥

जतोऽर्कतलं शशिनः पश्चादवलम्बते तथा शौक्ल्यम् ।
दनकरवशात्तथेन्दोः प्रकाशतेऽधःप्रभृत्युदयः ॥९॥

प्रतिदिवसमेवमर्कात्स्थानविशेषेण शौक्ल्यपरिवृद्धिः ।
भवति शशिनोऽपराह्णे पश्चाद्भागे घटस्येव ॥१०॥

प्रत्यन्तान् कुनृपाँश्च हन्त्युडु पतिः शृङ्गे कुजेनाहते
शस्त्रक्षुद्भयकृद् यमेन[1] शशिजेनावृष्टिदुर्भिक्षकृत् ।
श्रेष्ठान हन्ति नृपान् महेन्द्रगुरुणा शुक्रेण चाल्पान्नृपान्
शुक्ले याम्यमिदं फलं ग्रहकृतं कृष्णे यथोक्तागमम् ॥११॥

भिन्नः सितेन मगधान् यवनान् पुलिन्दान्
नेपाल भृङ्गिमरुकच्छसुराष्ट्रमद्रान् ।
पाञ्चालकेकयकुलूतकपूरूषादान्[2]
हन्यादुषीनरजनानपि सप्त मासान् ॥१२॥

गान्धारसौवीरकसिन्धुकीरान् धान्यानि शैलान् द्रविडाधिपांश्च ।
द्विजाश्च मासान् दश शीतरश्मिः सन्तापयेद् वाक्पतिना विभिन्नः ॥१३॥

उद्युक्तान् सह वाहनैर्नरपतींस्त्रैगर्तकान् मालवान्
कालिङ्गान्[3] गणपुङ्गवानथ शिबीनायोध्यकान् पार्थिवान् ।

---

[1]क्रमेण पाः. । [2]पौरूषादीन् पा. [3]कौलिन्दान् पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

हन्यात् कौरवमत्स्य शुक्त्यधिपतीन् राजन्यमुख्यानपि
प्रालेयांशुरसृग्ग्रहे तनुगते षण्मासमर्यादया ॥१४॥

यौधेयान् सचिवान् सकौरवान् प्रागीशानथ चार्जुनायनान् ।
हन्यादर्कजभिन्नमण्डलः शीतांशुर्दशमासपीडया ॥१५॥

मगधान् मथरांश्च पीडयेल्लङ्कायाश्च तटं शशाङ्कजः ।
अपरत्र कृतं युगं वदेद यदिभित्त्वा शशिनं विनिर्गतः ॥१६॥

क्षेमारोग्यसुभिक्षविनाशी शीतांशुः शिखिना यदि भिन्नः ।
कुर्यादायुधजीविविनाशं चौराणामधिके[1]नच पीडाम् ॥१७॥

[2]उल्कया यदा शशी ग्रस्त एव हन्यते ।
हन्यते तदा नृपो यस्य जन्मनि स्थितः ॥१८॥

भस्मनिभः परूषोऽरूणमूर्तिः शीतकरः किरणैः परिहीणः ।
श्यावतनुः स्पूटितः स्फुरणो वा क्षुड्डामरामयचौरभयाय ॥१९॥

विश्वाम्बुमूलेन्द्र विशाखमैत्रभानां यदा दक्षिणभागगेन्दुः ।
वह्नेर्भयं त्वीतिभयं जनानां करोति दुर्भिक्षमतीव युद्धम् ॥२०॥

अनुक्तभानां यदि सौम्यवर्ती करोति वृष्टिं कलहं नृपाणाम् ।
प्रजापतेर्भं यदि पैत्रभं वा भिनत्ति चन्द्रोऽन्तकरः प्रजानाम् ॥२१॥

---

[1]चोराणामधिपेन पा. । [2]उल्कया विनिहतो यदा शशी ग्रस्त एव विनिहन्यते तदा । हन्यते च शशिना स वै नृपो यस्यजन्मनि खलुस्थित शशी. ।। पा.

CC-0. Nepal Sanskrit Academy, Kathmandu

भानां यदा सौम्यगतिस्तदानीं जनानुरागः सततं करोति ।
सदाऽऽमयाप्रीतिरतीव दुःखं करोति याम्योपगतस्च भानाम् ॥२२॥

रोहिणीशकटमध्यसंस्थिते चन्द्रमस्यशरणीकृता[1] जनाः ।
क्वापि यान्ति शिशुयाचिताशनाः[2] सूर्यतप्तपिठराम्बुपायिनः ॥२३॥

उदितं यदि शीतदीधितिं प्रथमं पृष्ठत एति रोहिणी ।
शुभमेव तदा स्मरातुराः प्रमदा कामवशेन संस्थिताः ॥२४॥

अनुगच्छति पृष्ठतः शशी यदि कामी वनितामिव प्रियाम् ।
मकरध्वजबाणपीडिताः प्रमदानां वशगास्तदा नराः ॥२५॥

आग्नेय्यां दिशि चन्द्रमा यदि भवेत् तत्रोपसर्गो महान्
नैर्ऋत्यां समुपद्रुतानि निधनं सस्यानि यान्तीतिभिः ।
प्राजेशानिलदिक्स्थिते हिमकरे सस्यस्य मध्यश्चयो[3]
याते स्थाणुदिशं गुणाः सुबहवः[4] सस्यार्घवृष्टयादयः ॥२६॥

दृश्यते न यदि रोहिणीयुतश्चन्द्रमा नभसि तोयदावृते ।
रुग्भयं महदुपस्थितं तदा भूश्च भूरिजलसस्यसंयुता[5] ॥२७॥

भानां यथासम्भवमुत्तरेण यातो ग्रहाणां यदि वा शशाङ्कः ।
प्रदक्षिणं तच्छुभदं नृपाणां याम्येन यातो न शिवः शशाङ्कः ॥२८॥

चन्द्रमा यदि कुजस्य यात्युदक् पर्वतीयबलशालिनां जयः ।
क्षत्रियाः प्रमुदिताः सयायिनो भूरिधान्यमुदिता वसुन्धरा ॥२९॥

---

[1]चन्द्रमस्यवनिसंस्थिता पा. । [2]शिशुयाचिता जना पा. । [3]सस्यं च मध्यं यथो पा. । [4]मताश्च बहव पा. । [5]भूश्च भूरिजलदैश्च संप्लुता पा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

उत्तरतः स्वसुतस्य शशाङ्कः पौरजयाय सुभिक्षकरश्च ।
सस्यचयं[1] कुरुते जनहार्दिः कोशचयं[2] च नराधिपतीनाम् ॥३०॥

बृहस्पतेरुत्तरगे शशाङ्के पौरद्विजक्षत्रियपण्डितानाम् ।
धर्मस्य देशस्य च मध्यमस्य वृद्धिः सुभिक्षं मुदिताः प्रजाश्च ॥३१॥

भार्गवस्य यदि यात्युदक् शशी कोशयुक्तगजवाजिवृद्धिदः ।
यायिनां च विजयो धनुष्मतां सस्यसम्पदपि चोत्तमा तदा ॥३२॥

रविजस्य शशी प्रदक्षिणं यदि कुर्यात् पुरभूभृतां जयः ।
शकबाल्हिक सिन्धुपल्लवा मदभाजो यवनैः समन्विताः ॥३३॥

येषामुदग्गच्छति भग्रहाणां प्रालेयरश्मिर्निरुपद्रवश्च ।
तद्द्रव्यपौरेतर भक्तिदेशान्[3] पुष्णाति याम्येन निहन्ति तानि ॥३४॥

शशिनिफलमुदक्स्थे यद्ग्रहस्योपदिष्टं
भवतितदपसव्ये सर्वमेव प्रतीपम् ॥
इति शशिसमवायाः कीर्तिता भग्रहाणां
न खलु भवति युद्धं साकमिन्दोर्ग्रहर्क्षैः ॥३५॥

दिवसकरेणास्तमयः समागमः शीतरश्मिसहितानाम् ।
कुसुतादीनां युद्धं निगद्यतेऽन्योन्ययुक्तानाम् ॥३६॥

कुजादीनां तु संयोगो युद्धमित्यभिधीयते ।
समागमः शशाङ्केन सूर्येणास्तमनं सह ॥३७॥

इतिसूर्यसिद्धान्ते

---

[1]याम्यभयं । [2]कोशभयं [3]तद्रव्यसौम्येतरभुक्तिदेशपुष्टानि पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

यदा गुर्ल्भिद्यति चन्द्रमण्डलं शनैश्चरो मङ्गलशुक्र एव वा ।
तदा मही शोणितकर्दमाकुला परस्परं घ्नन्ति तदा नराधिपाः । ॥३८॥

चन्द्रो यदा दक्षिणमार्गगामी कुजस्य राज्ञामरिजं भयं च ।
बुधस्य गावोऽपि पयोविहीनाः सुरेन्द्रपूज्यस्य च धान्यनाशः ॥३९॥

भृगोर्यदा दक्षिणतः शशी चेदवग्रहो लोक भयङ्करः स्यात् ।
शनेर्महर्घं गदभीश्च चौरभयं भवेदर्थवतां जनानाम् ॥४०॥

यद्रोहिणीयोगफलं तदेव स्वातावषाढासहिते च चन्द्रे ।
आषाढशुक्ले निखिलं विचिन्त्यं यस्मिन् विशेषस्तमहं प्रवक्ष्ये ॥४१॥

स्वातौ निशांशे प्रथमे प्रवृष्टे सस्यानि सर्वाण्युपयान्ति वृद्धिम् ।
भागे द्वितीये तिलमुद्गमाषा ग्रैष्मं तृतीयेऽस्ति न शारदानि ॥४२॥

वृष्टे[1]ऽह्निभागे प्रथमे सुवृष्टिस्तद्वद्द्वितीये तु सकीटसर्पा[2] ।
वृष्टिस्तु मध्या परभागवृष्टे[3] निश्छिद्रवृष्टिर्द्युनिशं प्रवृष्टे[4] ॥४३॥

सममुत्तरेण तारा चित्रायाः कीर्त्यते ह्यपां वत्सः ।
तस्याऽसन्ने चन्द्रे स्वातौ योगः सुभिक्षकरः ॥४४॥

स्वातावषाढास्वथ रोहिणीषु पापग्रहा योगगता न शस्ताः ।
ग्राह्यं तु योगद्वयमप्युपोष्य यदाधिमासो द्विगुणीकरोति ॥४५॥

प्रालेयकुन्दकुमुदामलपुण्डरीकशङ्खप्रतप्तरजतामलवज्रकान्तिः ।
एवं विधो भ्युदितशीतकरः प्रजानां क्षेमं सुभिक्षमतुलं कुरूत्यत्रमासे ॥४६॥

---

३८ श्लोकोऽयं प्र. ख. प. पुस्तकेषु न वर्तते । [1]दृष्टे पा. । [2]किल कीटसर्पा पा. । [3]परभागसस्यं पा. । [4]निशीथकाले महदर्घवृष्टिः पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणचार्यं
विरचिते जगन्मोहने चन्द्रचाराध्यायः

अथैकादशोऽध्यायः

भौमचारः

यस्माद विना भूमिसुतस्य चारं शुभाशुभं यज्जगतः सुसम्यक् ।
न ज्ञायते ज्ञानमनुत्तमं तत् तस्मात् प्रवक्ष्यामि समासतोऽत्र ॥१॥

स्वस्वोदयर्क्षान्नवमेऽष्टमें वा सप्तर्क्षगे वा क्षितिजे प्रतीपे ।
तद्वक्त्रमुष्णाह्वयमेव तत्र वह्नेर्भयं व्याधिभयं जनानाम् ॥२॥

[1]एकादशे द्वादशगे प्रतीपे दशर्क्षगे वा क्षितिजे प्रतीपे[2] ।
तदाश्रुवक्त्रे सुखवृद्धिसर्वरसादिकं नाशमुपैति नूनम् ॥३॥

त्रयोदशे वाथ चतुर्दशर्क्षे वक्रे कुजे व्यालमुखाभिधानम् ।
तेभ्यो भयं तत्र सुवृष्टिसस्यसमृद्धिरर्घं च जनानुरागम् ॥४॥

प्रतीपगे पञ्चदशेऽथ धिष्ण्ये धरासुते षोडशधिष्ण्यके च ।
रक्ताननं नाम भवेत् तु तत्र सुभिक्षमत्यामयशत्रुवृद्धिः ॥५॥

अष्टादशे सप्तदशे प्रतीपे निस्त्रिंशपूर्वं मुशलाह्वयं च ।
तत्रार्घभीतिः क्षितिपालकानां युद्धे क्षयं याति समस्तलोकः ॥६॥

---

[1]द्वादशदशमैकादशनक्षत्राद् वक्रिते कुजेश्रुमुखम् । दूषयति रसानुदये करोति रोगानवृष्टिं च ॥२॥ वृ. सं. छ. [2]ऽश्रवमुखं प्रतीपम पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

भूमिसुते फल्गुन्योरूदयं कृत्वाऽथ वक्रिते वैश्वे ।
प्राजापत्येऽस्तमिते करोति निखिला धरा भ्रमणम् ॥७॥

अभ्युदितः श्रवणर्क्षे पुष्ये वक्रं गतः क्ष्मातनयः ।
निखिलधराधिपवर्यं प्रलयकरः प्रतिदिनं प्रजानां च ॥८॥

अभ्युदितः पितृधिष्ण्ये तस्मिन्नेव प्रतीपगः क्षितिजः ।
पाण्ड्यक्षितिपतिं मरणं करोति कलहं क्षितीशानाम् ॥९॥

यस्मिन् दिग्द्वारनक्षत्रे क्षितिजोऽभ्युदयं गतः ।
तद्दिगीशस्य भयदो यदि तेषु प्रतीपगः ॥१०॥

भिनत्ति योगतरां तां पितृधातृभयोः कुजः ।
तदा नृपाहवैर्भूमिर्नूनं भ्रमति चक्रवत् ॥११॥

विशाखाविश्वधिष्ण्यान्तषण्णां याम्यचरः कुजः ।
दुर्भिक्षवृष्टिं भयकृदाहवैर्भुवि भूभुजाम् ॥१२॥

शुभदः सर्वधिष्ण्यानां सौम्यमार्गचरन् कुजः ।
अभीष्टफलदः सर्वजन्तूनां याम्यमार्गगः ॥१३॥

मेषसिंहझषचापसंस्थिते वक्रिते क्षितिसुतेऽथवा शनौ ।
गोनराश्वगजपक्षिसमूहंनाशमेति निखिलं च दलं वा ॥१४॥

अस्तं गते वक्रिणि भूमिपुत्रे मन्दज्ञशुक्रेज्यसमन्विते वा ।
अब्दाधिपो वा गतभीः प्रजानां भवेत् तथैवाखिलसस्यहानिः ॥१५॥

---

[1] निशिना पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

११भौमचारा ध्यायः

कुजेश्वराध्यक्षगते द्विदैवे सुरारिपूज्येऽनिलभे पतङ्गे ।
भवन्ति रोगा विविधा नाराणामवृष्टिभीतिप्रभवं च युद्धम् ॥१६॥

ज्ञशुक्रयोर्वा भानोर्वा पुरतो दैवपूजितः ।
तस्य पश्चिमगे भौमे वसुधा वारिपूरिता ॥१७॥

बुधस्य पुरतो भौमे भवेत् सस्यविनाशनम् ।
गुरुशुक्रार्कपुत्राणां युद्धावृष्टिरुजः क्रमात् ॥१८॥

कुजो बुधेज्यासुरपूज्यमन्दान् द्यूनस्थितः पश्यति चेत् तदानीम् ।
क्रमान्महर्घं कलहं नृपाणामवग्रहः स्यान्नृपचौरबाधा ॥१९॥

रवेः प्राग् दैत्यमन्त्री चेत् ततः प्राग् भूमिनन्दनः ।
तदा राजभयं नृणां वृष्टिनाशो भवेद् ध्रुवम् ॥२०॥

महीसुतस्यापरभागवर्तिनो यदा सितेज्याम्बुजसम्भवाः स्युः ।
गुरौ धनस्थे सति चन्द्रशेखरेऽप्यनन्तवृष्टिर्भवतीति वक्तुम् ॥२१॥

महीजनिर्जिते मन्दे वुधशुक्रजिते कुजे ।
प्रावृषीन्दुयुते जीवे सुवृष्टिः स्यादसंशयः ॥२२॥

द्विदैवभे भानुयुते महीजे मैत्रस्थिते दानवपूजिते च ।
चन्द्रात्मजे स्वातिससन्विते च वृष्टिर्भवेत् खल्वपरा न पूर्वा ॥२३॥

कुजो भृगुं पश्यति चेत् सुरेज्ये पतङ्गपुत्रेण समन्विते च ।
शुभान्तरस्थेष्वशुभग्रहेषु क्वचित्प्रवर्षन्ति पयोधरास्तु ॥२४॥

ताशनाजसौम्येषु भिन्नवीथिगतः कुजः ।
प्राणिजालं तृतीयांशशेषं कुर्यादसंशयः ॥२५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

गुरुज्ञयोर्मध्यगते महीजे सितज्ञयोः पश्चिमभागगे वा ।
भवेत् तदा वृष्टिरतीव लोके विपर्ययेऽस्ते तु विपर्ययः स्यात् ॥२६॥

सिंहादित्रितये भौमे रविशुक्रान्तरस्थिते ।
भुवि सर्वत्र वृष्टिः स्यादिति निःसंशयं वदेत् ॥२७॥

शनिं सुरेज्यं सितमिन्दुजं वा जयेद् यदा संयति भूमिपुत्रः ।
तदा नृगाणां मथनं प्रजानां रोगा भवेयुर्भुवि वृष्टिनाशः ॥२८॥

पुरोङ्गारे त्वनावृष्टिः पुरः शुक्रे प्रवर्षणम् ।
बुधे वायुः कुजे हानी रक्तेऽङ्गिरसि मध्यमम् ॥२९॥

अशोकबन्धूकमणिप्रवालसंतप्तताम्रांभलकिंशुकाभः ।
एवं विधः सन्नुदितो महीजः शुभाय वृष्टिर्भवति प्रजानाम् ॥३०॥

विपुलविमलमूर्तिः किंशुकाशोकवर्णः
स्फुटरुचिरमयूखस्तप्तताम्रप्रभावः ।
विचरति यदिमार्गं चोत्तरं मेदिनीजः
शुभकृदवनिपानां हार्दिदश्च प्रजानाम् ॥३१॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने भौमचारा ध्यायः

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ द्वादशोऽध्यायः
बुधचारः

वसिष्ठ :—

बुधोदयः सर्वजगद्विपत्यै भवेत् कदाचिद् भृशमन्यथा वा
वृष्ट्यम्बुध्वाट्वग्निभयप्रदः स्यात्[1] तेभ्यो भयं कुत्रचिदन्यथा वा ॥१॥

पुरन्दरश्रीपतिवैश्वदेववसुस्वयम्भूडुषु चन्द्रसूनुः ।
चारं करोति प्रचुरार्धवृष्टिं नृपाहवाद्भीतिमतीव पीडाम् ॥२॥

आर्द्रादितीज्याहिमघासु भेषु चरन् प्रजानामतुलां च पीडाम्[2] ।
करोति शीतांशुसुतो बलीयान् क्षुच्छस्त्रवृष्ट्यामयशत्रुभीश्च ॥३॥

हस्तद्वयस्वातिविशाखमैत्रसुरेशधिष्ण्यानि निपीडयञ्ज्ञः[3]
करोति तैलाद्यरसादिवस्तुसमृद्धिदस्तत्र गवां च पीडाम् ॥४॥

[4]हौतभुगजपादार्यमयाम्यर्क्षेषु शीतदीधितेस्तनयः ।
अतिविपुलकरोनिध्नन् देहभृतां सप्तधातु विकलकरः ॥५॥

वारुणनैर्ऋतपौष्णान्यनुमृद्नन् साश्विना निचन्द्रसुतः ।
सलिलजभेषजतुरगक्रयविक्रयजीविनां च नाशकरः ॥६॥

विशदं चाहिर्बुध्न्यभमेकं चन्द्रात्मजो विमृद्नीयात् ।
विपुलामयशस्त्रभयं क्षुद्भूयमतुलं प्रजानां च ॥७॥

([1] सः प्र. प. पाठः । [2] प्रजानामतुलार्घपीडाम् प्र. । [3] बुधः । [4] आर्यम्णं हौतभुजं भद्रपदामुत्तरां यमेशं च । चद्रस्य सुतो निघ्नन् प्राणभृता धातुसंक्षयकृत् ॥५॥ (वृ. सं. ७)

CC-0. Nepal Sanskrit Academy, Kathmandu

प्राकृतमिश्रसंक्षिप्ततीक्ष्णयोगान्तकाख्यघोरपापाश्च ।
सप्तविधा गतिभेदा हिमकरतनयस्य विविधफलदाः स्युः ॥८॥

अनिलानलकमलभवयमधिष्ण्यैः प्राकृताभिधानगतिः ।
पितृशशिशंकरभुजगैर्धिष्ण्यैर्गतिरपरमिश्रसंज्ञा च ॥९॥

भाग्यद्वितयादितिभद्वितयैः संक्षिप्तसंज्ञका विपुला ।
भाद्रपदद्वयवासवभान्त्यद्वितयैश्च विमलतीक्ष्णाख्या ॥१०॥

योगान्तिक गतिरतुला नै ऋंतमारभ्यभत्रितयम् ।
श्रवणत्रितयं त्वाष्ट्रभमृक्षचतुष्कं घोरसंज्ञा सा[१] ॥११॥

दिनकरमैत्रविशाखाभत्रितयं भवति पापरूपाख्या ।
प्राकृतगत्यां राज्यप्रवृद्धिरारोग्यसस्यसमृद्धिः स्यात् ॥१२॥

मित्रविरोधं सततं भवति तयोः संक्षिप्तमिश्रयोर्गत्योः ।
अपरासु गतिषु नियतं विपरीतं भवति सर्वजन्तूनाम् ॥१३॥

विकला ऋज्वनुवक्रा वक्राख्या बोधनस्य गतिभेदाः ।
विविधफलं तासु करोत्यविकलमेवं बलीयांश्चेत् ॥१४॥

शस्त्रभयामयजननी विकला ऋज्वी च देहिनां शुभदा ।
अर्घविनाशनकारी त्वनुवक्रा भूपयुद्धदा वक्रा ॥१५॥

आषाढमासद्वितये सपौषे वैशाखमासे यदि चन्द्रसूनुः ।
दृष्टः करोत्यामय राजपीडां निवर्षणं तस्करभीतिमुग्राम् ॥१६॥

---

[१] घोरसंज्ञाऽस्य प्र. ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

१२ बुधचाराध्यायः

बुधस्यार्द्रादिमघान्तेषूदयोवृष्टिनाशनम् ।
हस्तादिषु च ज्येष्ठान्तेषूदयो वृष्टिकृद्भवेत् ॥१७॥

यदा भरण्यादि चतुष्टये बुधे दिवाकरस्यापरभागवर्तिनि ।
सितान्विते सत्युदयं गते तदा धनाघना भूरिफलं दिशन्ति ॥१८॥

चन्द्रपुत्रसहिते भृगुपुत्रे निर्गतं खरकरांशुनिकायात् ।
वृष्टिरस्ति भुवि सस्यसमूहो वृद्धिमेति फलदो मनुजानाम् ॥१९॥

सुरगुरुभृगुपुत्रौ सांपराये बुधश्चे –
ज्जयति विविधरोगैर्मानवाः पीडिताः स्युः ।
तरणितनयभौमौ निर्जितौ चन्द्रजेन
क्षितिरधिकफलाढ्या सस्यवृद्धिः सुवृष्टिः ॥२०॥

चन्द्रान्विते चन्द्रसुते कुलीरे युग्मस्थितेऽर्के वृषभे तु शुक्रे ।
वृष्टिर्भवेत् सस्यनिकायवृद्ध्यैः शुक्रज्ञयोगेन यथा तथैव ॥२१॥

अब्दाधिपश्चन्द्रसुतो यदा भवेद् वाचस्पतौनक्र नृयुग्घटालिषु ।
उद्गच्छति प्रागसुरार्चितो यदि प्रभूतवृष्टिर्भवतीति निश्चयः ॥२२॥

माणिक्यसस्यकनकामलपुष्पराग –
कुन्देन्दु सन्मरकतोपम शुद्ध कान्तिः ।
स्निग्धः शशाङ्कतनयः प्रचुरार्घदश्च
लोकेऽन्यमूर्तिरुदितो भयरोगकृत्सः ॥२३॥

इति श्री सारङ्गसाधुवचतामृतेन भट्टश्रीलक्ष्मणाचाय विरचिते
जगन्मोहने बुधचाराध्यायः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ त्रयोदशोऽध्यायः

गुरुचारः--

भानां यदा सौम्यगतिः सुरेज्यस्तदा जनानामभयप्रदःसः ।
व्याधिप्रदो दक्षिणमार्गगामी भूदेवभूमिश्वरनाशदश्च ।।१।।

वन्हेर्भयं वन्हिसमानवर्णः पीतस्तुरोगं हरितोऽरिभीतिम् ।
श्यामस्तु युध्दं सततं करोति रक्तः क्षितीशद्विजकायपीडाम् ।।२।।

वृष्टेर्भयं धूमनिभः पिशङ्गस्त्वीतेर्भयं पङ्कनिभोऽन्नभीतिम्
क्षिप्रं नृपस्यान्तकरो ह्यदृष्टश्चित्रो विचित्रं क्षितिपालयुध्दम् ।।३।।

रोहिण्यानलभं च वत्सरतनुर्नाभिस्त्वषाढाद्वयं
सार्पं हृत् पितृदैवतं च कुसुमं शुद्धैः शुभं तैः फलम्[१] ।
देहे क्रूरनिपीडितेऽन्यनिलजं नाभ्यां भयं क्षुत्कृतं
पुष्पे मूलफलक्षयोऽथ हृदये सस्यस्य नाशो ध्रुवम् ।।४।।

वक्रग्रहस्थे फलमुग्रमेतत् सौम्यग्रहेस्वेषु च संस्थितषु ।
सर्वं फलं मिश्रफलं विमिश्रैः[२] क्रूरग्रहाङ्गानि फलं तथैव ।।५।।

कन्याचापगतो गुरूः शशियुतः संत्यज्य तं शीघ्रगो
नक्रं तौलिनमागतो यदि महावृष्टिश्च वर्षो नृणाम् ।
कन्यायुग्मगतं सुरेन्द्र सचिवं युध्दे जयत्यर्कज –
श्चेत् सर्वां कुरूते महीं क्षयमयीमेतत्तदा निश्चयः ।।६।।

चन्द्रं विहाय भौमादी ञ्जयेद्यदि गुरर्बली ।
तदा भवति सस्याढ्या वसुधा वारिपूरिता ।।७।।

---

[१] शुद्धे शुभं तत्फलम् पा. । [२] मिश्रफलं च मिश्रैन्पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

१३ गुरुचाराध्याय

जीवो जयेद्यदि सुरारिपुरोहितं वा
सौम्येन्दुभार्गवयुतो यदि वा सुरेज्यः ।
तारां भिनत्यथ महार्णवमेखलायां
भूमौ सुवृष्टिरति सस्यसमृध्दयः स्युः ॥८॥

मन्दान्विते देवगुरौ धनुस्थे कुजार्कयोः प्राक् सितचन्द्रजौच
सार्पादिषटकेऽस्तगते भृगौवा भौमो रवेः प्राग् यदि वृष्टिनाशः ॥९॥

सुराचार्ये चापे दिनकरतनूजेन सहिते
नृयुग्मे कन्यास्थे क्षितिजसहिते वृष्टिविलयः ।
भवेदाप्ये धिष्ण्ये दितिजपतिभे वा सुरगुरौ
समन्दे क्षुत्पीडा भुवि खलुनृणां सर्वभयदा ॥१०॥

यदा गुरुः शुक्रसमन्वितः स्याद् भानोः पुरस्ताद्बहुसस्यवृष्टिः ।
पश्चाद् रवेःसौम्यसमन्वितो वा वसुन्धरा स्याद्घनवारिपूर्णा ॥११॥

जामित्रे गुरूशुक्रे वा जामित्रे ऽर्के गुरावपि ।
जामित्रेऽर्के ग्रहाः सर्वे त्वनावृष्टि जनक्षयम् ॥१२॥

गुरुशुक्र युतो दोषस्त्रिभिर्वर्षैर्भयावहः ।
गुरुरुत्तरतः श्रेष्ठस्त्रिभिर्वर्षैः सुखावहः ॥१३॥

मीनान्ते वृश्चिकान्तेच वृषकुम्भे च मध्यमे ।
यावत् तिष्ठन् गुरुः सौरिस्ताव द्दुर्भिक्षमादिशेत् ॥१४॥

बुधशुक्र युतश्चैव मतिवृष्टिर्विनिर्दिशेत् ।
भृग्विन्दुगुरवः सौम्यो महावृष्टिं महोत्सवम् ॥१५॥

विधोरस्तमयः प्राच्यां प्रतीच्यामुदयो भवेत् ।
अन्यथेज्यार्कि भौमानां विद्भृग्वोरुभयत्र च ॥१६॥

CC-0. Nepal Sanskrit Academy, Kathmandu

यदा च सौरिः सुरराजमन्त्री यद्येकराशौ समसप्तगे वा ।
अवन्ति लङ्कापुर मध्यदेशे क्षुधाभयं शस्त्रभयं जनानाम् ॥१७॥

कुन्देन्दुशङ्खस्फटिक प्रतार नीहार मुक्ताफलसन्निभाभः ।
एवं विधो देवगुरूर्जनानां शुभप्रदः क्लेशनिवारकश्च ॥१८॥

अकलुषांशुजटिलः पृथुमूर्तिः कुमुदकुन्दकुसुमस्फटिकाभः ।
ग्रहहतो न यदि सत्पथवर्ती हितकरोऽमरगुरुर्मनुजानाम्[1] ॥१९॥

अथ गुरोर्मेषादि राशिफलानि

नारदः--

मेषराशिगते जीवे ततो मेषविनाशनम् ।
ईतिभीतिर्ज्वरभयं तथापि सुखिनो जनाः ॥२०॥

वृषराशि गते जीवे शिशुस्त्रीपशुनाशनम् ।
सस्यहानिर्मध्यवृष्टिर्नृपाणां दारुणं रणम् ॥२१॥

ईतिभीतिर्विप्रपीडा सततं नृपविग्रहः ।
तथापि मोदते लोकः सुरेज्ये मिथुनस्थिते ॥२२॥

कर्किणीज्येऽखिला गावः प्रभूतपयसो, जनाः ।
मोदन्ते स्वजनैः सार्धं राजानः स्युर्विवैरिणः ॥२३॥

सिंहराशिगते जीवे निःस्वाभूसुर सज्जनाः ।
अति वृष्टिर्व्यालभयं नृपा युद्धे लयं ययुः[2] ॥२४॥

---

[1] ग्रहवरो यदि सत्पथवर्ती हितकरो न गुरुर्मनुजानाम् । पा [2] ग्रन्थान्तरे – सिंहर शिगते जीवे युद्धे भूपग्लयं ययुः । क ख पुस्तकयोरितिपाठोऽधिको वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

१३ गुरुचाराध्यायः

जीवे कन्यागते पुष्टा वृष्टिः स्वस्थाः क्षितीश्वराः ।
महोत्सुकाः क्षितिसुरा मखकर्मणि तत्पराः ॥२५॥

जीवे तुलागते सर्वे धातुविक्रयजीविनः ।
तथापि धात्री संपूर्णा धन धान्यार्घ वृष्टिभिः ॥२६॥

कीटेज्ये स्यात् कीटभयं युद्धे जनपदक्षयः ।
क्षामडामरमातङ्क मल्पसस्यार्घवृष्टयः ॥२७॥

जीवे चाप गते भीतिरीतिर्भूपभयावहः ।
वसुधा मन्दफलदा क्रूरा निःस्वाः क्षितीश्वराः ॥२८।

विवैरिणो धराधीशा धात्री पूर्णफलप्रदा ।
वातरोगभयाः सर्वे मकरस्थे सुरार्चिते ॥२९॥

हृदयानन्दिनी धात्री फलशालीक्षुवृष्टिभिः ।
अजात शत्रवः सर्वे कुम्भगे देवपूजिते ॥३०॥

धान्यार्घ वृष्टिसंपूर्णा त्वीतिरोगयुता धरा ।
न्यायमार्गरताभूपाः सर्वे मीनस्थिते गुरौ ॥३१॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्ट श्री लक्ष्मणाचार्य विरचिते जगन्मोहने गुरुचारा ध्यायः।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ चतुर्दशोऽध्यायः

शुक्रचारः

[1]मध्यमरेखानियतं गोवीथिर्भवति मध्यरेखातः।
वृषभैरावतगजनागाख्या वीथयः कवेरुदग्भागे ॥१॥

दक्षिण तोऽपि जरद्गवमृगाजदहनाश्वनवभेदाः।
वीथेरेकैकस्यास्त्रितयक्रमेण सर्वधिष्ण्यानि ॥२॥

दिनकरधिष्ण्यात्त्रितयं गोवीथिगतं द्विदवनक्षत्रात्[2]।
द्वादशभानिक्रमशो दक्षिणवीथेश्चतुष्टयस्थानि ॥३॥

आश्विन भादि द्वादशधिष्ण्या न्युत्तरवीथि चतुष्टयस्थानि।
अथ कथयामि नवानां वीथिनां फलानि यानि तान्यत्र ॥४॥

---

[1] अपुस्तकस्था टिप्पणी —

	अश्विन्यादि		
उत्तरवीथीः	वृषभ	३	४
	ऐरावत	३	३
	गज	३	२
—	नाग	३	१
	मध्ये गजवीथिः	३	५
दक्षिणवीथीः	जरद्गव	३	६
	मृग	३	७
	अज	३	८
	अश्व (अनल)	३	९

[2] द्विदैवधिष्ण्यतः।

CC-0. Nepal Sanskrit Academy, Kathmandu

नागवीथिविचरन् भृगोः सुतः पश्चिमे दिशि च वृष्टिनाशकृत् ।
क्षेमकृत् सुखकरो गजवीथ्यामर्घवृद्धिमतुलां[1] कुरुते सः ॥५॥

शालीक्षुगोधूमयवादि सस्यसंपूर्णधात्री नितरां विभाति ।
ऐरावतोक्षाह्वययोश्च वीथ्योः स्थिते सिते संयति राजनाशः ॥६॥

गोवीथिगे दानवपूजिते भूर्विभाति नानाविधवृष्टि सस्यैः ।
जरद्गवायां मृगसंज्ञितायां मध्यार्घवृष्टिर्महदाहवः स्यात् ॥७॥

क्षितीशसंग्रामजभीतिरीतिर्वन्हेर्भयं वारिभयं जनानाम् ।
अजाग्निवीथ्योरतुलान्नभीतिः[2] क्वचित् क्वचिद् वर्षति वासवोऽपि ॥८॥

उदग्वीथिषु दैतेज्य श्चास्तगश्चोदितोऽथवा ।
सुभिक्षकृन्मध्यवीथ्यां सामान्यो याम्यगोऽशुभः ॥९॥

स्वातित्रये पूर्वगते तु पश्चिमे मघादिपञ्चस्वपि वृष्टिनाशः ।
तथैव वैलोमगते भृगोः सुते जनानुरागो भुवि वारिपूर्णे ॥१०॥

दृष्टः समस्तजगतो भयदश्च शुक्रः
चौरामयैर्विविधराष्ट्रविनाशदो वा ।
पाञ्चालमागधकलिङ्ग नृपान्निहन्ति
श्री शूरसेनकुरुपांश्च दिनार्धकाले ॥११॥

शुक्रो भिनत्ति शकटं पितृदैवतं च
नाशं करोति विविधान् गजगोकुलाश्वान् ।

---

१ सर्ववृद्धिमतुलां प्र. । २ रमलान्न भीतिः प्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu

मर्त्यान् द्विजान् मगधमालवपाण्ड्यदेशान्
निर्हन्ति पक्षनिवहान् मरुदेशमल्लान् ।।१२।।

कृष्णाष्टम्यां चतुर्दश्याममायां यदि भार्गवः ।
उदयास्तमयं याति तदा जलमयी क्षितिः ।।१३।।

प्राक्पश्चिमस्थौ सुरदानवेज्यौ परस्परं सप्तमराशिसंस्थौ ।
तदा प्रजानां भयदौ जलाग्निरोगास्त्रचौराहिनिशाचरेभ्यः ।।१४।।

अग्रगाः पृष्ठगा वापि खेटाः सन्निहिता रवेः ।
तदातिवृष्टिं कुर्वन्ति न चेन्नीचारिराशिगाः ।।१५।।

चत्वारः पञ्च खेटा वा बलिनस्त्वेकराशिगाः ।
राजाहवभयं दद्युरथवा भयभीतिदा : ।।१६।।

यदा प्रतीपगौ खेटौ नृपसंक्षोभदौ तदा ।
प्रतीपगास्त्रयो यत्र युद्धवृष्टिभयप्रदा ।।१७।।

राजान्यत्वं च कुर्वन्ति चत्वारो यदि वक्रिताः ।
प्रतीपगाः पञ्चखेटा राजराष्ट्रविनाशनाः ।।१८।।

यदा स्थिता जीवबुधारसूर्यजाः सितस्य सर्वेऽग्रपथानुवर्तिनः ।
नृनागविद्याधरसंगरास्तदा भवन्ति वाभाश्च समुच्छ्रितान्तकाः ।।१९।।

नारदः–

कुजज्ञजीवरविजाः शुक्रस्याग्रेसरा यदि ।
दुर्भिक्षवायुमरणजलनाशकरास्तदा ।।२०।।

१४–१६ श्लोकाः ख पुस्तके न सन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

न भिन्नभावे सुहृदो व्यवस्थिताः क्रियासु सम्यङ्नरता द्विजातयः ।
न चाल्पमप्यम्बु ददाति वासवो भिनत्ति वज्रेण शिरांसि भूभृताम् ।।२१।

शनैश्चरे मेषविडालकुञ्जराः खरामहिष्योऽसितधान्यसूकराः ।
पुलिन्दशू श्च सदक्षिणापथाः क्षयं व्रजन्त्यक्षिमरुद्गदोद्भवैः ।।२२।।

निहन्ति शुक्रः क्षितिजेऽग्रतः प्रजा हुताशशस्त्रक्षुदवृष्टितस्करैः ।
चराचरं व्यक्तमथोत्तरापथं दिशोऽग्निविद्युद्रजसा च पीडयेत् ।।२३।।

बृहस्पतौ हन्ति पुरःस्थिते सितः सितं समस्तं द्विजगोसुरालयान् ।
दिशं च पूर्वां, करकासृजोऽम्बुदा गले गदा, भूरि भवेच्च शारदम् ।२४

सौम्योऽस्तोदययोः पुरो भृगुसुतस्यावस्थितस्तोयकृद्
रोगान् पित्तजकामलांश्च[1] कुरुते पुष्णाति च ग्रैष्मिकान् ।
हन्यात् प्रव्रजिताग्निहोत्रिकभिषग्रङ्गोपजीव्यान् हयान्
वैश्यान् गाः सह वाहनैर्नरपतीन् पीतानि पश्चाद्दिशम् ।।२५।।

शिखिभयमनलाभे शस्त्रकोपश्च रक्ते
कनकनिकषगौरे व्याधयो दैत्यपूज्ये ।
हरित कपिलरूपे श्वासकासप्रकोपः
पतति न सलिलं खाद्भस्मरूक्षासिताभे ।।२६।।

वज्रेन्दुकुन्दकुमुदस्फटिकप्रतार–
वैडूर्यशङ्खदधिपुष्पहिमोपमाभः ।

---

१ कामलपित्तजांश्च पा. वाताधिकश्लेश्मक म्ग्रक, श्लेश्मकृत प्र.

CC-0. Nepal Sanskrit Academy, Kathmandu

मुक्ताफलप्रकरतुल्यविशालकान्ति–
रेवंविधो भृगुसुतः शुभदो नराणाम् ॥२७॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने शुक्रचाराध्यायः ।

अथ पञ्चदशोऽध्याय;

शनिचारः

रौद्रार्कवारीशमरुद्द्विदैव मुकुन्दभेष्वर्कसुतः करोति ।
चरन् सुभिक्षं विपुलं पृथिव्यां गौडास्मकाश्मीरपुलिन्दहानिम् ॥१॥

मैत्राख्यसंक्रन्दनपौष्णभेषु चरंस्तदा सूर्यसुतः करोति ।
ईतेर्भयं व्याधिभयं जनानां कलिङ्गबाह्लीकजनाभिवृद्धिम् ॥२॥

तयोरहिर्बुध्न्यभयामयोश्च धराधिपानां कलहस्त्ववृष्टिः ।
अनुक्तभेष्वर्कसुतः प्रजानां चरंस्तदा मध्यमवृष्टिदः स्यात् ॥३॥

कीटाजपञ्चाननकर्कटेषु चरञ्छनिः क्षुद्भयदः प्रजानाम् ।
वृष्टेर्भयं कुत्रचिदामयश्च तथापि जीवन्ति जनाः कथञ्चित् ॥४॥

कन्यानृयुग्गोधटचापसंस्थ स्वक्षेत्रसंस्थोऽपि शुभप्रदः स्यात् ।
वङ्गाङ्गकाश्मीरकलिङ्गगौडसौराष्ट्रदेशेष्वशुभप्रदः स्यात् ॥५॥

प्रक्षुभ्यन्ति क्षितीशाः प्रचलतिवसुधा मोदत दस्युवर्गो
धीभ्रंशो[1] बुद्धिभाजां जनपदहरणं चित्रवर्षी पयोदः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

चन्द्रार्कौ मन्दरश्मी ग्रहगणसहितौ वान्ति वाताः प्रचण्डा·
श्चक्राकारं समस्तं भ्रमति जगदिदं मीनगे सूर्यसूनौ ॥६॥

गर्गः

यदा मन्दाहिसंयोगो भवेत् सस्यविनाशनम् ।
पण्यद्रव्याः समर्घाश्च जायापत्योश्च शात्रवम् ॥७॥

यदा विशाखासु महेन्द्रमन्त्री सुतश्च भानोर्दहनर्क्षयातः ।
तदा प्रजानामनयोऽतिघोरः पुरप्रभेदो गतयोर्भमेकम्[२] ॥८॥

अण्डजहा रविजो यदि चित्रः क्षुद्भयकृद् यदि पीतमयूखः ।
शस्त्रभयाय च रक्तसवर्णो[३] भस्मनिभो बहुवैरकरश्च ॥९॥

वैडूर्यकान्तिरमलः शुभदः प्रजानां
बाणातसीकुसुमवर्णनिभश्च शस्तः
यं चापि वर्णमुपगच्छति तत्सवर्णान्
सूर्यात्मजः क्षपयतीति मुनीन्द्रवादः[४] ॥१०॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्ट श्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने शनिचाराध्यायः

अथ षोडशोऽध्यायः

राहुचारः

प्रच्छन्नामररूपं भूत्वा राहुः सुधाप्रदानसमयेऽभूत् ।
हरिरपि निखिलं ज्ञात्वा छिन्नश्चक्रेण तच्छीर्षम् ॥१॥

---

१ दिग्भ्रंशो पा। २ पुरप्रभेदोद्गमयोग एषः, वा पुरप्रभेदोद्भ्रमयोग एषः पा.। ३ शुभ्रसवर्णो पा.। ४ मुनिप्रवाद पा.

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहने

अमृतमयत्वान्नत्वा हरिं शिर उवाच विस्मिते सदसि ।
दातव्या ग्रहसमता गतोऽस्मि मां रक्ष तव शरणम् ॥२॥

दत्वाऽष्टमग्रहत्वं प्रीतो विससर्ज तं राहुम् ।
धातृवराच्चन्द्रमसं तुदति ततः सर्व पर्वणिच ॥३॥

अवनति विक्षेपवशाद्दुराद्दूरं गतः शततम् ।
षड्मासाभ्यन्तरिताद् ग्रहणं प्रायेण सम्भवति ॥४॥

राहुरसौ दनुजत्वाद् भुजगाकारेण गृह्णाति ।
भूगोलाधोभागे दर्पणसदृशे रवौ यदा भ्रमति । ॥५॥

उद्भूताऽखिलधरणीच्छाया छादयति सेन्दुमुपरिस्थम् ।
स्थगयति रविमुपरिस्थं पश्चादागत्य शीघ्रगश्चन्द्रः ॥६॥

पर्वेशानयनम्

गणितस्कन्धाज्ज्ञात्वा सृष्ट्यादेरिष्टपर्वपर्यन्तम् ।
पर्वसमूहं यत् तत् सप्तभिरवशिष्टमिष्टप्रवेशः ॥७॥

खनवदशोनशकाब्दा सकृता रवावुदग्गोले ।
सशरा याम्येऽजाद्याः पर्वेशाः सप्तभिः शिष्टाः । ॥८॥

ब्रह्म शशीन्द्रकुवेरा वरुणाग्नियमाश्च[1] विज्ञेयाः ।
एषां पर्वेशानां क्रमशस्तु फलानिवक्ष्यन्ते ॥९॥

---

[1] वरुणाग्नियमाह्वयाश्च पा० ।

CC-0. Nepal Sanskrit Academy, Kathmandu

१६ राहुचारा ध्यायः

ब्राह्मेपर्वणि सस्यग् द्विजगोपशुवृद्धिरपरिमिता।
सौम्ये पर्वणि तद्वत् सज्जनहानि[१]स्त्ववृष्टिजाड्यीतिः ।।१०।।

शारदसस्यविनाशः क्षितिपतिकलहः सुवृष्टिरैन्द्रेस्यात्।
धनिकानां धनहानिस्त्वतुलावृष्टिश्च कौबेरे ।।११।।

निखिलजनानांवृद्धिः क्षेमकरी वारूणेच नृपहानिः।
आग्नेयेचाग्निभयं त्वतुलावृष्टिः क्षितीशकलहश्च ।।१२।।

दुर्भिक्षकरं याम्यं लोकानां भीतिरीतिदं सततम्।
पर्वाधिपफलमुक्तं यज्ज्ञातव्यं द्वयोर्ग्रहयो[२] ।।१३।।

यद्येकस्मिन्मासे चन्द्रार्को पप्लवो यदा भवति।
आतङ्कानर्घभयं क्षितिपतिकलहं विजानियात् ।।१४।।

उदगयनेऽर्कग्रहण भवति च यदिवा शशाङ्कस्य।
नृपसज्जनगणहानिर्भवति परेषां च दक्षिणत्वयने ।।१५।।

ग्रस्तोदयगेऽस्तमिते शारदशस्यावनीशनाशः स्यात्।
क्षुद्भयमामयभयदं निखिल ग्रहणं भवेद् यदि वा ।।१६।।

ऊर्जेऽपि मासेग्रहणं कृशानोर्भीतिं च सापत्न्यजनात् करोति।
काम्बोजकाश्मीरकमागधाँश्च सशूरसेनान् द्रविडान्निहन्ति ।।१७।।

सुभिक्षकृत् क्षेममतीववृष्टिर्मासि सहे[३]पर्वणि रुक् प्रदः स्यात्।
काश्मीरकान् कौशलकान् सपौड्रान् धुनोतिराहुः खलुयायजूकान् ।।१८।।

---

[१]क्षुज्जनहानिः पा०। [२]द्वयोर्ग्रहणयोः पा०। [३]मार्गशीर्षे पा०।

CC-0. Nepal Sanskrit Academy, Kathmandu

पौषे द्विजक्षत्रजनोपतापस्त्वनर्घवृष्टिः क्षितिपालभीतिः ।
ध्वंसं व्रजन्त्यत्र विदेहपौड्रमद्रत्रिगर्तप्रभवाः सगौडाः ॥१९॥

गजाश्वसंधान् द्विजदेवभक्तान् धर्मे रतांस्तान्पितृमातृभक्तान् ।
दुनोति राहुर्मनुजांश्च माघे सस्यार्घवृष्टिं प्रचुरां करोति ॥२०॥

तपस्यमासे द्विजसज्जनानां काम्बोजबाल्हीककलिङ्ग[1]जानाम् ।
हानिप्रदः सस्यसुवृष्टिदश्च दृष्टं तमो भूपविरोधकृच्च ॥२१॥

रूपोपजीवाखिलपण्यजीवि–हास्यज्ञशिल्पाखिललेखकानाम् ।
पीडाप्रदो देवपतिश्च राहुर्मासे मधौ पर्वणिमन्दवृष्टिः ॥२२॥

कार्पाशमुद्गाः सतिला विनाशमायान्ति मूल्यान्यखिलानितत्र ।
वैशाखमासे ग्रहणे कलाज्ञाश्चेक्ष्वाकुयोधाश्च तथा सुभिक्षम् ॥२३॥

नरेन्द्रपत्नीद्विजसस्यवृद्धिः सौम्याजनाश्चोरकिरातसंघाः ।
प्रध्वंसमायान्ति तथा सुवृष्टिर्ज्येष्ठे च मासे ग्रहणं यदि स्यात् ॥२४॥

आषाढमासे ग्रहणं तडागवापीनदीदीर्धिकवप्रपूर्णाः ।
काश्मीरगान्धारपुलिन्दचीना लयं प्रयान्त्यलपजनाः सुतुष्टाः ॥२५॥

काम्बोजकान् मागधशूरसेनान् पुलिन्दचीनानथकौरवांश्च ।
निहन्ति देवोऽपि च मन्दवर्षी दृष्टो नभोमासि ससैंहिकेयः ॥२६॥

म्लेच्छान् सुराष्ट्रांश्च कलिङ्गवङ्गान् खशाश्च सौवीरभवान् किरातान्
स्त्रीणां च गर्भं विनिहन्ति राहुर्नभस्यमासे भुविभूरिवृष्टिः ॥२७॥

---

[1]कलिङ्गा प्रा। [2]ययुश्चान्त्यजनाः पाः

CC-0. Nepal Sanskrit Academy, Kathmandu

काम्बोजचीनान् यवनान्सशल्यान्त्रैगर्तकान्दर्दुरमागधाँश्च
आनर्तपौड्रान्भिषजश्चराहुर्निहन्ति मासे त्विषसंज्ञितेच । ॥२८॥

अथ राशिफलानि

वराहः—

पाञ्चालकलिङ्गशूरसेनाः काम्बोजोड्र[1]किरातशस्त्रवार्ता ।
जीवन्ति च ये हुताशवृत्या ते पीडामुपयान्ति (मेषसंस्थे ॥२९॥

गोपाः पशवोऽथ गोमिनो मनुजा ये च महत्वमागताः ।
ते पीडामुपयान्ति[2]) भास्करे ग्रस्ते शीतकरे थवा वृषे ॥३०॥

मिथुने प्रवराङ्गना नृपा नृपमात्रा वलिनः कलाविदः ।
यमुनातटजाः सबाल्हिका मत्स्याः सुह्मजनैः[3] समन्विता ॥३१॥

आभीराञ्छबरान्सपल्लवान्मल्लान्मत्स्यकुरुञ्छकानपि ।
पाञ्चालान् विकलाँश्च पीडयन्त्यन्नं[4] चापि निहन्ति कर्कटे ॥३२॥

सिंहे पुलिन्दगणमेकलसत्व युक्तान् राजोपमान्नरपतीन्वनगोचरांश्च
षष्ठे तु सस्यकविलेखक गेयसक्तान्हन्त्यस्मक त्रिपुरशालियुताँश्च देशान् ३३

तुलाधरेऽवन्त्यपरान्त्यसाधून्वणिग्दशार्णान्मरुकच्छपांश्च
अलिन्यथोदुम्बरमद्रचोलान्द्रुमान्सयौधेयविषायुधीयान् ॥३४॥

न्विन्यमात्यवरवाजिविदेहमल्लान्
पाञ्चालवैद्यवणिजो विषमायुधीयान्

---

[1] काम्बोजान्ध्र पा [2] चापान्तर्गतः पाठः प्रपुस्तके नास्ति [3] कुरुमत्स्याः स्वजनै पाः [4] पा पीडयेदन्यांश्चापि पा

CC-0. Nepal Sanskrit Academy, Kathmandu

हन्यान्मृगे तुङ्गझषमन्त्रिकुलानि नीचान् ।
मन्त्रौषधीषु[1] कुशलान् स्थविरायुधीयान्[2] ॥३५॥

कुम्भेन्तर्गिगरिजान्सपश्चिमजनान्[3] भारोद्व हांस्तकरानाभीरान्दरदार्य-
सिंहपुरका[4]न्हन्यात्तथा बर्बरान् ।
मीने सागरकूलसागरजलद्रव्याणि वन्याञ्जनान्प्राज्ञान्वार्युपजीविनश्च
भफलं कुर्मोपदेशाद्वदेत् ॥३६॥

नारदः—

(प्राङमुखस्य च कूर्मस्य नवाङ्गेषु धरामिमाम् ।)
विभज्य नवधा खण्डंमण्डलानि प्रदक्षिणम् ॥३७॥

अन्तर्वेदी च पाञ्चालं तस्येदं नाभिमण्डलं ।
प्राच्यां मागधलाटादि देशास्तन्मुखमण्डलम् ॥३८॥

त्रिकलिङ्गकिराताख्या देशास्तद्बाहुमण्डलम् ।
अवन्तीद्राविडा भिल्ल देशास्तत्पार्श्वमण्डलम् ॥३९॥

गौडकोङ्कणशाल्वो- ष्ट्रपुण्ड्रास्ततपादमण्डलम् ।
सिन्धुकाशीमहाराष्ट्रसौराष्ट्राः पुच्छमण्डलम् ॥४०॥

पुलिन्दभिल्लयवनगुर्जराः पादमण्डलम् ।
कुरुकाश्मीरमाद्रेयमत्स्यास्तत्पार्श्वमण्डलम् ॥४१॥

---

[1]बुधमन्त्रिकुलानि चीनमन्त्रौषधीषु पा० । [2]विषमायुधीयान् पा० । [3]स पश्चिमभवान् पा० । [4]सिंह तुरगान् पा० । [5]चापान्तर्गतं श्लोकार्धं कपुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

खशाङ्गवङ्गवाल्हीककाम्बोजाः पाणिमण्डलम् ॥
कृत्तिकादीनि धिष्ण्यानि त्रीणि त्रीणि क्रमान्न्यसेत् ॥४२॥

नाभ्यादिषु[1] नवाङ्गेषु पापैर्दुष्टं शुभैः शुभम् ॥४३॥

सव्यापसव्यलेह्यग्रसन विरोधावमर्दनामर्दाः ।
आघ्रातं मध्यतमस्तमोऽन्त्य इति ते दशग्रासाः ॥४४॥

सव्यगते तमसि सति सव्यो ग्रासः शुभप्रदो जगतः ।
अपसव्ये तमसि सति त्वपसव्याख्या क्षितिजसंक्षोभः ॥४५॥

परितो जिह्वालीढः स ग्रासो मण्डलस्य लेहनो नामा ।
प्रीतीदमखिलजनानां सुवृष्टिदं च सस्यानाम् ॥४६॥

अर्धादूनग्रहणं ग्रसनं विविधामयप्रदं जगतः ।
स्पर्शविमर्दान्मोक्षोविमर्दमधिकं यदा भवति ॥४७॥

स विरोधो विज्ञेयस्त्वनिष्टदस्त्वखिलजनानाम्[2] ।
मण्डलमधिकं पीत्वा किञ्चित् कालं विलम्ब्य स निवृत्तः ॥४८॥

अवमर्दो विज्ञेयः स च हानिकारश्च जन्तूनाम् ।
मागधगौडकिरातद्रविडानामामयश्च नियमेन ॥४९॥

आवृत्याऽऽरोहवच्चक्राकारेण दृश्यते तमः पटलम् ।
स च मर्दो विज्ञेयः समस्तराष्ट्रस्य नाशकरः ॥५०॥

---

[1] नाभ्यां दिक्षु पा० । [2] भूतानां प्र० ।

CC-0. Nepal Sanskrit Academy, Kathmandu

मुकुरोपरिनिः श्वासानिलसदृशं दृश्यते तमश्छन्नम् ।
श्राघ्राताह्वयमतुलं शुभप्रदं निखिलजन्तूनाम् ॥५१॥

मध्ये तमसाविष्टं वितमस्कं सर्वमण्डलं परितः ।
तन्मध्यतमस्पर्शो मध्यदेशस्य नाशकरः ॥५२॥

पर्यन्ते भवति तमो न तु मध्ये तमोऽन्तसंज्ञकः सोऽपि ।
ईतिभयं सस्यानां डामर[1] मधिकं भवेत्तत्र ॥५३॥

क्षेमसुभिक्षं श्वेते राहौ पीडा च विप्रमुख्यानाम् ।
श्रनलभयं त्वनलनिभे पीडास्याद् वह्निजीविनां सम्यक् ॥५४॥

हरिते त्वामयभीतिः सस्यानामीतिरोगभयम् ।
कपिले शीघ्रगसत्त्वैर्भयमत्युग्रं च शवरजातीनाम् ॥५५॥

दिनकररश्मिसमाने दुर्भिक्षं पक्षिसंघपीडा स्यात् ।
धूम्रनिभः क्षेमकरः सस्यानां मन्दवृष्टिदः[2] सततम् ॥५६॥

कापोतारुणसदृशः श्यामनिभो वा भयं च दुर्भिक्षात्[3] ।
श्रतिकृष्णं शूद्राणां व्याधिकरं भीतिदं च नृपतीनाम् ॥५७॥

मरकतमणिपीतश्चेद् वैद्यध्वंसी सुभिक्षकरः ।
(गैरिकसदृशे युद्धं विद्युत्सदृशे च वह्निभयम् ॥५८॥

दूर्वासमानवर्णे हरिद्रे वाऽथ रुग्भयं जगतः ।
पाटलकुसुमसमानस्त्वशनेर्भीतिप्रदो राहुः[4]) ॥५९॥

[1]डामरः मरकः । [2]मन्ददृष्टिदः प्र. [3]दुर्भिक्षम् प्र. । [4]चापान्तर्गतः पाठः प्र पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पङ्कर्विदूषितरूपः[1] क्षत्रियकुलनाशदस्त्ववृष्टिकरः ।
बालार्काम्बुजसदृशस्त्वाहवदस्त्विन्द्रचापसदृशश्च ॥६०॥

ग्रहणसमयेऽतिवृष्टिः पवनोत्पाता भवन्ति यदा ।
अन्तकमरकभीतिर्विपुला स्यात्क्षुद्भयं चैव ॥६१॥

आवन्तिककावेरी नर्मदातीराश्रयाश्च ये जनाः ।
सह कौसलिकाविलयं प्रयान्ति वसुधात्मजे ग्रस्ते ॥६२॥

शशितनये ग्रस्ते सति सरयूनेपालसिन्धुतीराश्च ।
श्रीबुधसज्जनशिशवः पीड्यन्ते विविधरोगैश्च ॥६३॥

ग्रहणोपगते जीवे बुधमन्त्रिसमुद्रतीरसंभूताः ।
डामरभूतविकारैर्विलयं यान्ति प्रकौलिकाद्यैश्च ॥६४॥

भृगुतनये राहुगते दशार्णजाः कैकयाः समाद्रेयाः ।
आर्यावर्ताः सुखिनः पीड्यन्ते सलिलनिलयाश्च ॥६५॥

दिनकरतनये ग्रस्ते सौराष्ट्रा संकराश्च कैवर्ताः ।
वर्बर कुत्सित धान्यं विलयं यान्ति प्रभूतधानुष्काः ॥६६॥

हनू च कुक्षिस्त्वथ पायुभेदसंछादनं यज्जरणं ततश्च ।
मध्ये विदारं च विदारमन्त्ये मोक्षप्रभेदा दश चन्द्रभान्वोः ॥६७॥

दक्षिणतो हनुभेदसंज्ञितमाग्न्येयामपगमनमिन्दोश्च ।
अपि रुक्सस्यविमर्दनमतिवृष्टिर्नरपतेः क्षोभः ॥६८॥

---

[1] पङ्कजविषतन्तुचयः ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अभिगमनं चैशान्यां वामो हनुभेदसंज्ञितः[1] सोऽपि ।
शस्त्रभयं रोगभयं करोति वृष्टिं च राजहानिं च ॥६९॥

दक्षिणपार्श्वविमोक्षो दक्षिणकुक्षिप्रभेदः स ?[2] ।
नृपतिकुलेभ्यः पीडां करोति सापत्न्यजनसंघान् ॥७०॥

उत्तरमार्गे विचरति राहौ वामाख्यकुक्षि प्रभेदः स्यात् ।
गर्भविपत्तिः स्त्रीणां मध्यानि च तानि पूर्वसस्यानि ॥७१॥

दक्षिणपाय्वाख्यः स च नैर्ऋतकोणान्च याम्यदिग्गमनम् ।
बहुविघसस्यामयकृदपरसस्यनाशकरः ॥७२॥

आरभ्यानिलककुभश्चोत्तरमार्गस्थितो यदा राहुः ।
उत्तरपाय्वाख्यः स च नानामयभूपभीतिदः सततम् ॥७३॥

ग्रहणं चेत्प्राच्यां दिशि कृत्वा प्रागेव सर्पति च ।
संछादनमोक्षः[3] स च सुभिक्षदः सर्वजन्तूनाम् ॥७४॥

प्रागेव प्रग्रहणं कृत्वा त्वपसर्पणं प्रतीच्यां च ।
जरणाख्यो विज्ञेयः स च जन्तु विनाशनं कुरुते ॥७५॥
आदौ मध्यविकाशः पश्चादन्तं च विदारणं मध्यम् ।
सततं स्वन्तः कलहं करोति सौभिक्षमतिवर्षम् ॥७६॥

प्रत्यन्ते विमलतरः पश्चान्मध्यं च विदारणं चान्ते ।
मध्यान्तदेशनाशं करोति सस्यस्य नाशं च ॥७७॥

---

[1]वामे हनुभदतः प्र. । [2] कुक्षिभेद संज्ञकः पा । [3]संछर्दनमोक्षः ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

दशविधमोक्षः कथितो विज्ञेयो भास्करग्रहणे।
प्रग्रहणं प्रागिन्दोर्मोक्षः पश्चाद्विपर्ययाद् द्युमणेः ॥७८॥

भगवान् गर्गः–

तिष्यमाजपदं चैव मघाभाग्यं यमाधिपम् ।
इद्राग्नी अग्निदैवत्यं सप्तैतान्यनलो गणः ॥७९॥

अनले मण्डले दृष्टं ग्रहणं रविचन्द्रयोः।
राज्ञां भयकरं विद्यात्प्रजानां बहुदोषकृत् ॥८०॥

अहिर्बुध्न्यं तथा पौष्णं मूलमाप्यं च शांकरम् ।
वारुणं सर्पदैवत्यं वारुणं मण्डलं स्मृतम् ॥८१॥

एतस्मिन्नुपरागश्चेन्मण्डले सोमसूर्ययोः ।
दुर्भिक्षामयनाशः स्यात्प्रजानामिति निश्चयः ॥८२॥

दस्त्रर्क्षमर्यमादीनां चतुष्कं च पुनर्वसुः ।
सौम्यविध्यधिदैवत्यं[1] वायव्यं मण्डलं भवेत् ॥८३॥

समरं सभयं चैव दुर्भिक्षं कुरुते चिरात् ।
व्याधिरस्त्राग्निकोपं च मण्डलेऽस्मिन्नुपस्थिते ॥८४॥

ऐन्द्रं मैत्रं च प्राजेशं वासवं वैष्णवं तथा।
वैश्वदेवं च विज्ञेयं पुरुहूतस्य मण्डलम् ॥८५॥

मण्डलेऽस्मिन्समुत्पन्नं ग्रहणं जगतां शुभम् ।
आनन्दं सर्वभूतानां विदधाति विशेषतः ॥८६॥

---

[1]विश्वाधिदैवत्यं पा.।

CC-0. Nepal Sanskrit Academy, Kathmandu

होरायां गृह्यते यस्य नक्षत्रे वा निशाकरः।
प्राणसन्देहमाप्नोति रोगं वा मृत्युमेव वा ॥८७॥

यस्य त्रिजन्मनक्षत्रे ग्रस्येते शशिभास्करौ।
तस्य रोगो भवेन्नूनं यो मर्त्यः शान्तिवर्जितः ॥८८॥

सूर्यस्य संक्रमो वापि ग्रहणं चन्द्रसूर्ययोः।
यस्य त्रिजन्मनक्षत्रेतस्य रोगोऽथ वा मृतिः ॥८९॥

तस्य दानं च होमं च देवार्चनजपास्तथा।
उपरागाभिषेकं च कुर्याच्छान्ति शुभप्रदाम् ॥९०॥

स्वर्णेन वाऽथ पिष्टेन कृत्वा सर्पस्य चाकृतिम्।
ब्राह्मणाय दिशेत्तस्य न रोगादिश्च तस्कराः ॥९१॥

मण्डलाधिपदैवत्यैर्मन्त्रैर्मृत्युञ्जयादिभिः
होमं कुर्यात्प्रयत्नेन तत्तन्मन्त्राञ्जपेत्सुधीः। ॥९२॥

यस्य राशिं समासाद्य भवेद् ग्रहण संभवः।
तत्र स्नानं प्रवक्ष्यामि मन्त्रौषधि विधानवत् ॥९३॥

चन्द्रोपरागं संप्राप्य कृत्वा, ब्राह्मणवाचनम्।
संपूज्य चतुरो विप्राञ्छुक्लमाल्यानुलेपनैः ॥९४॥

पूर्वमेवोपरागस्य समासाद्यौषधादिकम्।
स्थापयेच्चतुरः कुम्भानव्रणान्सागरानिति ॥९५॥

गजाश्वरथ्यावल्मीक[1] सङ्गमाद्ध्रदगोकुलात्।
राजद्वारप्रदेशाच्च मृदमानीय निःक्षिपेत् ॥९६॥

[1]गजाश्वरथवल्मीकात् ग्र.।

CC-0. Nepal Sanskrit Academy, Kathmandu

पञ्चगव्यं च कुम्भेषु शुद्धमुक्ताफलानि तु ।
गोरोचनां पद्मशङ्खौ पञ्चरत्न समन्वितम् ॥९७॥

स्फटिकं चन्दनं श्वेतं तीर्थवारि ससर्षपम् ।
गजदन्तं सकुमुदं तथैवोशीरगुग्गुलौ
तत्सर्वं निक्षिपेत्पूर्वं कुम्भेष्वावाहयेत्सुरान् । ॥९८॥

सर्वे समुद्राः सरितस्तीर्थानि जलदा ह्रदाः
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥९९॥

योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः ।
सहस्रनयनः शक्रो ग्रहपीडां व्यपोहतु । ॥१००॥

मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः ।
चन्द्रोपरागसंभूतामग्निः पीडां[1] व्यपोहतु । ॥१०१॥

यः कर्मसाक्षी भूतानां धर्मो महिषवाहनः
यमश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु । ॥१०२॥

निर्ऋतिः कौणपो देवः प्रलयानलसंप्रभः
खड्गव्यग्रोऽतिभीमश्च रक्षः पीडां व्यपोहतु । ॥१०३॥

नागपाशधरो देवः सदा मकरवाहनः
स जलाधिपतिश्चन्द्रग्रहपीडां व्यपोहतु । ॥१०४॥

प्राणरूपो हि लोकानां तथा कृष्णमृगप्रियः

---

[1] अग्निपीडां पा. । श्लोको प्र पुस्तके नास्ति

CC-0. Nepal Sanskrit Academy, Kathmandu

वायुश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु । ॥१०५॥

योऽसौनिधिपतिर्देवः खड्गशूलगदाधरः
चन्द्रोपरागकलुषं धनदोऽत्र व्यपोहतु । ॥१०६॥

यो्ऽसाविन्दुयुतो देवः पार्वतीपतिरीश्वरः[1]
चन्द्रोपरागजां पीडां स नाशयतु शंकरः । ॥१०७॥

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च
ब्रह्मविष्णवर्कयुक्तानि तानि पापं हरन्तु वै । ॥१०८॥

एवमामन्त्रितैः कुम्भैरभिषिक्तो गुणान्वितैः
ऋग्यजुः साममन्त्रैश्च गन्धमाल्यानुलेपनैः । ॥१०९॥

पूजयेद् वस्त्रगोदानैर्ब्राह्मणानिष्टदेवताः
एतानेव ततो मन्त्रान्विलिख्य कनकान्वितान्। ॥११०॥

यजमानस्य शिरसि विदध्युस्ते द्विजोत्तमाः
ततोऽतिवाहयेद् वेलामुपरागानुगामिनीम् ॥१११॥

प्राङ्मुखः पूजयित्वा तु नमस्यन्निष्टदेवताः ।
चन्द्रग्रहे निवृत्ते तु कृतशौचातिमङ्गलः ॥११२॥

कृतस्नानश्च तत्सर्वं ब्राह्मणाय निवेदयेत् ।
अनेन विधिना यस्तु ग्रहस्नानं समाचरेत् ॥११३॥

न तस्य ग्रहपीडा स्यान्न च बन्धुधनक्षयः ।
परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥११४॥

---

[1] भवानीपतिरीश्वरः पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

सूर्यग्रहे सूर्यनाम सदा मन्त्रेषु कीर्तयेत् ।
पठित्वा चैवमेकाग्रं शक्रलोको महीयते ॥११५॥

इति श्री सारङ्गसाधुवचनामृतेन भट्टश्री लक्ष्मणाचार्य विरचिते जगन्मोहने राहुचाराध्यायः ।

अथ सप्तदशोऽध्यायः

केतुचारः

केतोरुदयास्तमनं ज्ञातुं गणितान्न शक्यते यस्मात् ।
दिव्यान्तरिक्षभौमास्तस्मात्त्रिविधाः केतवो जगति ॥१॥

एकोत्तरशतभेदा दृश्यन्ते वा सहस्रभेदास्ते ।
औत्पातिकरूपत्वाद् भवन्ति बहवस्तथैको वा ॥२॥

दिविऋक्षग्रहास्ते दिव्याख्याः केतवो महाफलदाः ।
परिवेषेन्द्रधनुरुल्का गन्धर्वनगराणि निर्घाताः ॥३॥

गगनविकारजमेतन्मध्यमफलदं तथान्तरीक्षं च ।
भूमिभवा भौमाः स्युश्चरस्थिरवस्तु संभवा ये च ॥४॥

तथेमे फलदास्तेषां कथयामि फलानि रूपाणि ।
वर्षैर्मासैः पक्षैः क्रमशः परिपाकमुपयान्ति ॥५॥

स्निग्धः प्रशन्नरूपः शुक्लनिभो ह्रस्वदण्डवत् सौम्यः ।
उदयास्तमये त्वेवं सुभिक्षसौख्यावहः केतुः ॥६॥

CC-0. Nepal Sanskrit Academy, Kathmandu

धूमनिभो धूमाख्यः केतुर्दोषप्रदो भवति ।
इन्द्रशरासनरूपः स्थूलनिभो वा्यर्घभीतिदुःखदः[1] सम्यक् ॥७॥

बहुभिः शिखाभिरतुला विद्युन्मणिहारहेमनिभाः ।
अपरैन्द्रदिशोर्दृश्या महाहवं तद्दिगीशानाम् ॥८॥

शुकमुखबन्धूकनिभा वह्निसुताः क्षतजसन्निभा रूक्षाः ।
दृश्यन्ते यद्यमदिशि तावन्तस्तेऽपि शिखिभयदाः ॥९॥

मृत्युसुता चन्द्रशिखाः कृष्णा रूक्षाः प्रहरणाकाराः ।
दृश्यन्ते याम्यायां जनमरकभयप्रदास्तेऽपि ॥१०॥

क्षितितनया द्वात्रिंशद्दर्पण सदृशाः सरश्मयो विशिखाः ।
क्षुद्भयदाः सशिरस्का[2] यमतनया मृत्युदाश्च तैलनिभाः ॥११॥

शशितनयाः कुसुमनिभाः कुन्देन्दुक्षीररजतनिभाः ।
उत्तरभागे शिखिनो जन्तूनां ते सुभिक्षकराः ॥१२॥

त्रिशिखत्रिवर्णयुक्तो ब्रह्मसुतो ब्रह्मदण्डनिभः ।
अनियतदिक्प्रभवो्ऽसौ शान्तिकरो[3] ब्रह्मदण्डाख्यः ॥१३॥

शशितनयास्ताराख्याः शुक्ला ऋजवश्च षट्संख्याः ।
दृश्यन्ते द्वित्रिदिनैः शुभदा मासैश्च रुग्भयदाः ॥१४॥

जीवसुता विकचाख्याः शुक्लास्तारास्थिताः स्निग्धाः ।
याम्यायां दिशि संस्था बहवस्ते पापदाः सततम् ॥१५॥

---

[1] वर्चभीतिदः पा. । [2]सशिरस्था पा. । [3]लोकान्तकरो पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वुधतनयाश्चौराख्याः शुक्लाः सूक्ष्मा यथेष्टदिक्प्रभवाः ।
आमयभयदाः सततं जन्तूनां पञ्चपञ्चाशत् ॥१६॥

कुजतनयाः कौन्तेयाः क्षतजानलसन्निभास्त्रिशूलधराः ।
याम्यायां दिशि संस्थाः क्षुद्भयदाः षष्टि संख्याकाः ॥१७॥

तामसकीलकसंज्ञा राहुसुताः सूर्यमण्डले दृष्टाः ।
तेषां तन्निखिलफलं सम्यक्कथितं च सूर्यचारेऽपि ॥१८॥

अग्निसुतास्त्वाग्नेय्यां विंशत्यधिकाश्च शतसंख्याकाः ।
प्रलयानलसदृशाभा भुवि वह्निभयप्रदास्तेऽपि ॥१९॥

अरुणाख्याः श्यामनिभाः शुक्रसुता विविधरूपसंकीर्णाः ।
शस्त्रक्षुद्भयदास्ते सप्तोत्तरसप्ततीश्च संख्याताः ॥२०॥

दण्डकसंज्ञाश्चाष्टौ तारासदृशाः प्रजापतेस्तनयाः ।
द्विचत्वांरिसदुत्तरशताधिकाः पापदा विधातृसुताः ॥२१॥

वरुणभवाः कङ्काख्या द्वात्रिंशद् वंशगुल्मयष्टिनिभाः ।
शशिवत्प्रभासमेता राजान्यत्वं प्रकुर्वन्ति ॥२२॥

कालभवाः षण्णवतिःसंख्याकास्ते कबन्धनिभाः ।
तन्नामानः शिखिनो युद्धाख्यभीतिदा जगतः ॥२३॥

विमलास्ताराकारा दशदिक्षु समुद्भवाः शिखिनः ।
एवं सहस्रभेदाः पापाश्चैषां विशेषभेदास्ते ॥२४॥

पश्चिमदिशि संभूतश्चोत्तरनम्रश्च सौम्यकेतुः सः ।
कुरुते क्षुद्भयमतुलं सितवर्णोऽसौ महास्निग्धः ॥२५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

दक्षिणनम्रः प्राच्यां तथाविधो याम्यकेतुः सः।
रूक्षः क्षुद्भयदायी मरकभयं करोत्येव ॥२६॥

धूमनिभो मायावी कपालकेतुर्बृहत्तनुः स्निग्धः।
दिक्षु विदिक्षुप्रभवः क्षुन्मरकावृष्टिरोगकरः ॥२७॥

प्राच्यां दिशि संभूतः प्रदक्षिणं भ्रमति चक्रवद्रूक्षः।
स चक्रकेतुरनिशं भ्रमति चाप्रदक्षिणम् ॥२८॥

धूमनिभो विषमाख्यः केतुर्भूभारमपनयति।
कतिपयदिवसं गत्वा गमननिवृत्तं करोति धूम्रनिभः। ॥२९॥

नरपतिकलहाज्जगतः करोति विलयं स चक्राख्यः
गगनत्रिभागदीर्घः श्यामनिभोऽसौ महासटाकारः।
ऋजुवक्रगतिं कुरुते क्रमशो जगतस्त्रिभागहरः। ॥३०॥

गतिरहितो ध्रुवकेतुः प्रमाणवर्णाकृतिर्नभवेत्।
ग्रहनक्षत्रोपगमे नैवाऽशुभदो भवेत्केतुः ॥३१॥

उपकरणेषु च राज्ञां सुरगृहतरुपर्वतेषु सदनेषु
दर्शनमुपैति नियतं विनाशमेव नियमेन। ॥३२॥

कुमुदनिभः कुमुदाख्यो दिनाधिके पश्चिमे दृष्टः
प्रागुत्तरदिशि यदि वा सुभिक्षमतुलं करोत्येव। ॥३३॥

तारोपरि मणिकेतुर्याम्यायां दिशि सकृद्दृष्टः।
उदयास्तमनसमये वा शुभदोऽसौ क्षीरधारेव ॥३४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

जलधारेवहि ऋज्वीनतया शिखया परेण दृष्टः सः ।
जलकेतुर्जलसदृशः सुभिक्षकरस्तु सर्वजन्तूनाम् ।।३५।।

हरिलाङ्गूलनिभो बलकेतुः क्रकचसन्निभोवाऽपि ।
बहुरोगभयं कुरुते सर्पाकारस्तु तद्भयदः ।।३६।।

अपरोऽपि पद्मकेतुः पद्मनिभः पद्मगर्भसंकाशः ।
क्षेमकरो नृपतीनां सुभिक्षदः सर्वजन्तूनाम् ।।३७।।

आवर्तकेतुरयं प्रादक्षिण्येन दीप्तिमाञ्छुक्लः ।
शुभदो व्यत्ययकेतुस्त्वतुलामयभीतिरीतिकरः ।।३८।।

आक्रम्य गगनमखिलं संवर्ताख्यः स धूम्रनिभः ।
शूलाग्रस्त्वितरोवा सकेतुरसकृद्भयप्रदो जगतः ।।३९।।

शुभदाः शुक्लनिभा ये कृष्णास्त्वशुभप्रदा जगतः ।
केतूनां फलमुक्त्वा वक्ष्ये यदत्र भेषु जातानाम् ।।४०।।

अश्विन्यां यदिकेतुर्जातस्तानश्वजीविनो हन्यात् ।
याम्ये म्लेच्छाधिपतिं बहुलायां तं कलिङ्गपतिम् ।।४१।।

रोहिण्यामतुलबलं निहन्ति केतुश्च शूरसेनेशम्
औशीनरमुख्य पतीन् सौम्ये चान्द्रे च जलजन्तून् ।।४२।।

अश्मकदेशाधिपतिं त्वादित्ये पुष्यभेषु मगधपतिम्
आर्याधिपतिं सार्पे पाण्ड्याधिपतिं च पैत्र्यधिष्ण्येषु ।।४३।।

भाग्यर्क्षे तूज्जयिनीमर्यमभे[1] दण्डनायकाँस्त्वखिलान् ।
हस्तर्क्षे धनिकवराञ्चित्रायां कुरुभवानखिलान् ।।४४।।

[1]उत्तरभे पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

काम्बोजनृपतिमुख्यं प्रभञ्जने जातकेतुरपि ।
इक्ष्वाकुवंशनाशं द्विदैवभे मित्रभे च खसगौडेशान् ॥४५॥

ज्येष्ठायां यदि जातः स निहन्ति सर्वमण्डलाधीशम् ।
मूले मद्राधिपतिं कलिङ्गदेशाधिपतिं च जलदैवे ॥४६॥

गुर्जरकान् यौधेयान् निहन्ति वैश्वधिष्ण्यजः सोऽपि ।
अभिजिन्नक्षत्रभवो टङ्कणदेशं निहन्ति न चिरात् ॥४७॥

केकयनाथं हन्याच्छ्रवणर्क्षे वसुभवोऽखिलान् द्रविणान् ।
नैमिषनृपतिं हन्याच्छतभिषजस्त्वजाङ्घ्रिजश्च पाञ्चालान् ॥४८॥

अहिर्बुध्न्यर्क्षभवः सङ्करकिरातकोङ्कणभवान् ।
पौष्णप्रभवः केतुर्द्विजसज्जनधर्मसार्गस्थान् ॥४९॥

ये केतवश्चाश्विमुखर्क्षजाता
स्ताराग्रहादिष्वपि संभवाश्च ।
कुर्वन्ति ते तीक्ष्णफलं जनाना–
मन्येऽपि सामान्यफलप्रदाः स्युः ॥५०॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने केतुचाराध्यायः ।

अथाष्टादशोऽध्यायः

ग्रहणफलम्

श्रुतयः खलु यज्ञकर्मणे स च यज्ञः क्रियते तु पर्वणि ।
स्फुटता ग्रहणस्य तत्फलं विहितो ज्ञातुमतोऽयमागमः ॥१॥

CC-0. Nepal Sanskrit Academy, Kathmandu

चन्द्रार्कयोर्यदिग्रहः प्रथमं खमार्गे[1]जानाति यः खलु नरो
गणकः स एव ।
लोकः प्रपूजयति, दिक्षु तनोति कीर्तिं चन्द्रार्कयोर्ग्रहणमेव
फलं पठन्ति ॥२॥

पर्वफलं यः श्रुत्वा गोदानभूमिदानसदृशाः स्युः ।
फलमिति वाच्यं मुनिभिः सर्वत्र स्नानदानकार्याणि ॥३॥

ह्रस्वस्तमः प्रसन्नः स्निग्ध ऋजुरुचिरसंस्थितः शुक्लः ।
उदितोऽप्यति दृष्टिसुभिक्षसौख्यावहः केतुः ॥४॥

इति श्री सारङ्गसाधुवचनामृतेन भट्ट श्री लक्ष्मणाचार्यविरचिते
जगन्मोहने ग्रहणफलाध्यायः

अथैकोनविंशोऽध्यायः

परिवेषफलम्

तत्र भृगुः--

अहन्युदक्प्रतिरविं जलं वायुं च दक्षिणे ।
दद्यादुभयतस्तोयात्तत्तदूर्ध्वं गतो यदि ॥१॥

निहन्याद्भूपतिं चाधः स्थितः सर्वान्नरानपि ।
प्रतिसूर्यः सूर्यनिभः स्निग्धः पार्श्वे शुभप्रदः ॥२॥

---

[1]चन्द्रार्कयोः प्राग्ग्रहणं खमार्गे पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वैडूर्यसदृश: स्वच्छः श्वेतो वापि सुभिक्षकृत् ।
पीतो महर्घकृत्कृष्णो मृत्युदो युद्धदो ऽरुणः ॥३॥

माला चेत्प्रतिसूर्यस्य चन्द्रस्यैवा ऽथवा यदि ।
परिवेषः प्रदुष्येत तद्राष्ट्रमवसीदति ॥४॥

उदयास्तमयोर्मध्ये सूर्याचन्द्रमसोर्यदि ।
परिवेषः प्रदुष्येत तद्राष्ट्रमवसीदति ॥५॥

दिवा सूर्ये परीवेषो रात्रौ चन्द्रे यदा भवेत् ।
एकस्मिश्चेदहोरात्रे तदा नश्यति पार्थिवः ॥६॥

एतेन विधिना नित्यं सप्ताहं परिविश्यते '
सर्वभूतविनाशः स्यात्तस्मिन्नुत्पातदर्शने ॥७॥

अहर्निशं प्रतिदिनं चन्द्रार्कावरुणौ यदा ।
परिविष्टौ नृपवधं कुर्वाते लोहितौ तदा ॥८॥

द्विमण्डलश्चमूनाथं नृपं हन्यात्त्रिमण्डलः ।
परिवेषगतः सौरिः क्षुद्रधान्यविनाशकृत् ॥९॥

रणकृद्भूमिजो, जीवः सर्वेषामभयप्रदः ।
ज्ञः सस्यहानिदः, शुक्रो नृपाणां कलहप्रदः ॥१०॥

परिवेषगतः केतुर्दुर्भिक्षकलहप्रदः ।
पीडां नृपवधं राहुर्गर्भच्छेदं करोति च ॥११॥

द्वौ ग्रहौ परिवेषस्थौ क्षितीशसमरप्रदौ ।
कुर्वन्ति कलहानूर्ध्वं परिवेषगतास्त्रयः ॥१२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

१९ परिवेषे फलाध्यायः

चत्वारः परिवेषस्था नृपस्यमरणप्रदाः ।
परिवेषगताः पञ्च जगत्प्रलयदा ग्रहाः ॥१३॥

एवं चेद्वक्रिणस्तत्र पूर्वमुक्तफलं वदेत् ।
नृपहानिः कुजादीनां फलमुक्तं पृथक् पृथक् । ॥१४॥

परिवेषेषु धिष्ण्यानां फलमेवं तयोस्त्रिषु ।
परिवेषो द्विजादीनां नेष्टः प्रतिपदादिषु ॥१५॥

पञ्चम्यादिषु शुभदस्तिथिषु प्रतिपत्क्रमात् ।
अष्टम्यादिचतसृषु परिवेषोऽप्यनिष्टदः ॥१६॥

ततस्तिसृषु तिथिषु नृपाणामशुभप्रदः ।
पुरोहितस्य द्वादश्यां निधनायाशुभाय वा ॥१७॥

सैन्यरोधस्त्रयोदश्यां नृपरोधमथापि वा ।
राजपत्न्याश्चतुर्दश्यां परिवेषो गदप्रदः ॥१८॥

परिवेषः पञ्चदश्यां क्षितीशानामनिष्टदः ।
परिवेषस्य मध्ये वा वाह्ये रेखा भवेद् यदि ॥१९॥

स्थायिनां मध्यमानेष्टा यायिनां पार्श्वसंस्थिता ।
प्रावृड्तौ च शरदि परिवेषौ जयप्रदौ । ॥२०॥

प्रायेणान्येषु ऋतुषु तदुक्तफलदायकौ ।
एवं संक्षेपतः प्रोक्तं परिवेषस्य लक्षणम् ॥२१॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्ट श्री लक्ष्मणाचार्यविरचिते जगन्मोहने परिवेषफलाध्यायः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ विंशोऽध्यायः

अथ चन्द्रदर्शनम्

त्वं सोमेति च सूक्तेन पश्येच्चन्द्रमुपागतम् ।
उपतिष्ठेत्[१] समित्पाणिर्मासि मासि नवं नवम् ॥१॥

मासं तस्य न दुःखं हि न जातु त्रिविधं भवेत् ।
गौतमेन पुरा दृष्टं मृत्योर्नाशनमात्मनः ॥२॥

उद्यन्तमुपतिष्ठेत पूर्णं चैव समाहितः ।
वासांसि तु स विन्देत चन्द्रस्यैति सलोकताम् ॥३॥

मासि मासि नवस्येन्दो द्वितीयायां पुरोहितः ।
नृपेण दापयेदर्घमायुरारोग्यवृद्धये ॥४॥

संस्काराभिनवं चन्द्रं भूम्यां गोमयमण्डले
रोहिणीसहितं देवं चन्दनेन सुशोभनम् ॥५॥

पुष्पचन्दनधूपैश्च दीपाक्षत जलैः शुभैः
दूर्वाङ्कुरै रत्नवरै र्दध्ना वस्त्रैश्च पाण्डुरैः ॥६॥

दध्योदनेन, मन्त्रेण नृपोऽर्घं सपुरोहितः ।
नवो नवोऽसि मासान्ते जायमानः पुनः पुनः ॥७॥

आप्यायस्व समेत्येवं सोमराज नमोऽस्तु ते ।
इत्यर्घं मासि मासीन्दोः प्रयच्छन्नृपसत्तमः ॥८॥

सर्वान्कामानवाप्नोति जीवेच्च शरदां शतम् ।
भक्त्या तद्दर्शनं कुर्याच्छक्तः फलमवाप्नुयात् ॥९॥

---

[१] उपतिष्ठेत

CC-0. Nepal Sanskrit Academy, Kathmandu

शुक्ले तिथीनां वृद्धिश्च कृष्णे हानिश्च शोभनः ।
वैपरित्यं तु लोकानामशुभायेति निश्चितम् ॥१०॥

इति चन्द्रदर्शनम्

अगस्त्योदयः ।

उज्जयिन्यां सिंहराशौ त्रयोविंशतिभागगे ।
द्युमणावुदितो ज्ञेयो मुनिः कलशसंभवः ॥११॥

रोगान् करोति कलुषः कपिलः पादवृष्टिकृत् ।
गवामशुभकृद्धूम्रः स्फुरणो भयकृत्तदा ॥१२॥

शङ्खकुन्देन्दुगोक्षीरमृणालरजतप्रभः ।
दृश्यते यद्यगस्त्यः स सुभिक्षक्षेमकारकः ॥१३॥

वैश्वानरर्चिप्रतिमो मांसशोणितकर्दमैः ।
रणैर्भयैश्च विविधैः किञ्चिच्छेषयुताः प्रजाः ॥१४:॥

उदेति सूर्ये हस्तस्थे रोहिणीस्थेऽस्तमेति च ।
कृष्णाष्टमीपञ्चदश्योराश्विने न्वाऽऽह कश्चन ॥१५॥

वत्सरे वत्सरे दद्यादगस्त्यायार्घमादृतः ।
आरोग्यं विजयं पुत्रानायुष्यं च लभेत सः ॥१६॥

कन्यायामागते सूर्ये अर्वाग्वै सप्तमे दिने ।
प्रत्यूषसमये विद्वान्कुर्यात्तस्योदये निशि ॥१७॥

प्रातः शुक्लतिलाम्भोभिः शुक्लमाल्याम्बरो गृही ।
स्नापयेदव्रणं कुम्भं वस्त्रमाल्यविभूषितम् ॥१८॥

CC-0. Nepal Sanskrit Academy, Kathmandu

पञ्चरत्नसमायुक्तं घृतपात्रेण संयुतम् ।
अङ्गुष्ठमात्रं पुरुषमत्यायतचतुर्भुजम् ॥१९॥

कमण्डलुकुशाक्षस्रग्वरदाभयधारिणम् ।
सौवर्णपञ्चरत्नाढ्यं सुकुम्भं चन्दनार्पितम् ॥२०॥

अर्चयेज्जातिकुसुमैर्धूपैर्गन्धैः सदीपकैः ।
ततः खर्जूरकुष्माण्डनारिकेलैर्विदाडिमैः ॥२१॥

त्रपुषैः कारवेल्लैश्च कर्कटीर्वारुकैस्तथा ।
बीजपूरकवृन्ताकनारङ्गकदलीफलैः ॥२२॥

दूर्वाङ्कुरैः कुशैः काशैः पद्मैर्नीलोत्पलैस्तथा ।
नाना प्रकारैर्भक्ष्यैश्च गोभिर्वस्त्रै रसैः शुभैः ॥२३॥

विरूढैः सप्तधान्यैश्च वंशपात्रनिधापितैः ।
पाकैरामैर्यथायोग्यं पायसेन घृतेन च ॥२४॥

सौवर्णरौप्यपात्रेण ताम्रवंशमयेन वा ।
मूर्ध्नि स्थितेन नम्रेण जानुभ्यां धरणींगतः ॥२५॥
इति अगस्त्यर्घः ।

अथ कालनिर्णयः

शुभे काले कर्माचरितमचिरात्पुष्कलफलं
भवेद्दोषः किं नो विफलमपि कर्मैहिकफलम् ।
नृसंस्कारादिष्वप्यपरमनपेक्ष्योभयविधं
फलं कालो यच्छेदिति निगदिताः कालविषयः ॥१॥

CC-0. Nepal Sanskrit Academy, Kathmandu

२० कालनिर्णयाध्याय

कालः शुभो गुणैर्युक्तो बलवद्भिः शुभप्रदः ।
दोषैर्युक्तोऽपि वा प्राणैर्बहुभिर्व्यत्ययं द्वयोः ॥२॥

दश गुर्वक्षरः प्राणः षट् च ते हि विनाडिका ।
तत्षष्टिर्घटिका तासां भवेत्षष्टया दिवानिशम् ॥३॥

तैः पञ्चदशभिः पक्षस्तौमासौ द्वौ च तावृतुः ।
त्रयस्तेऽयनमेते द्वे वत्सरः परिकीर्तितः ॥४॥

स्वस्थे नरे सुखासीने यावत्स्पन्देत लोचनम् ।
तत्कालं निमिषं प्रोक्तं ततोऽष्टादश काष्टकम् ॥५॥

काष्ठास्त्रिंशत् कलाश्चैव तास्तु त्रिंशत्क्षणस्तथा ?
क्षणैः षड्भिर्मिता नाडी नाडीद्वय मुहूर्तकम् ॥६॥

त्रिंशन्मुहूर्तो दिवसः पक्षः पञ्चदशैव ते ।
पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ ॥७॥

मासमेकं पितृदिनं द्वौ मासावृतुरुच्यते ?
षदृतुर्वर्षसंप्रोक्तं तद्वर्षं दैवतं दिनम् ॥८॥

काल एवेश्वरः साक्षादीश्वरः काल एव सः ।
विद्यते चेश्वरो ज्ञानी चेत्कालज्ञः स एव वै ॥९॥

तस्मात्कालं न जानन्ति योगिनोऽपि महीतले ।
तथापि देहिनां नूनं हिताय कमलासनः ॥१०॥

भचक्रभ्रमणात्स्थूलकालं कल्पितवान्प्रभुः ।
प्राणादिदिनमासान्तयुगान्तं चैव भग्रहैः ॥११॥

CC-0. Nepal Sanskrit Academy, Kathmandu

षष्टचा समेतं त्रिशतं दिनानां तं सावनं तत्र विरूपमार्क्षम् ।
सौराब्दमाहुर्भगणं हि भानोश्चान्द्रं च चैत्रादिकफाल्गुनान्तम् ।।१२।।

मृगादि राशिद्वयुभानुभोगात्षडर्तवः स्युः शिशिरो वसन्तः
ग्रीष्मश्च वर्षा च शरच्च तद्वद्धेमन्तनामा कथितश्च षष्ठः ।।१३।।

दर्शावधिं मासमुशन्ति चान्द्रं सौरं तथा भास्कर राशिचारात् ।
त्रिंशद्दिनं सावनसंज्ञमाहुर्नाक्षत्रमिन्दोर्भगणभ्रमेण ।।१४।।

शिशिरपूर्वमृतुत्रयमुत्तरं ह्ययनमाहुरहश्च तदाऽमरम् ।
भवति दक्षिणमन्यमृतुत्रयं निगदिता रजनी मरुतां च सा[1] ।।१५।।

गृहप्रवेशत्रिदशप्रतिष्टाविवाहचौलव्रतवन्धपूर्वम् ।
सौम्यायने कर्म शुभं विधेयं यद् गर्हितं तत्खलु दक्षिणे तु ।।१६।।

गुरुः—

सावनं सूतिकालेषु[2] मुख्यर्क्षमादशाफले ?
श्रौतकार्येषु सौरं हि चान्द्रं सकलकर्मसु ।।१७।।

दिनप्रमाणं त्वयनं च पूर्वं संक्रान्तिकालस्य विनिर्णयं च ।
कृतादिमानं निखिलग्रहाणां यत्कर्म सौरेण हि गृह्यतेऽत्र ।।१८।।

जीमूतगर्भं निखिलं सुसम्यक् तद्भूङ्गमार्क्षेण निरीक्षितव्यम् ।
नृगर्भवृद्धि प्रबलर्तुकालं तत्सूतकाद्यं[3] खलु सावनेन ।।१९।।

उद्वाहयज्ञोपनयप्रतिष्ठातिथिव्रतक्षौरमहोत्सवाद्यम् ।
पर्वक्रिया वास्तु गृहप्रवेशः सर्वं च चान्द्रेण हि गृह्यते तत् ।।२०।।

---

[1] अमृतान्धसाम् पा. । [2]सतिकार्येषु प्र. । [3]यत्सूतकाद्यं पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

नारदः—

यात्रोद्वाहव्रतक्षौरतिथिवर्षेशनिर्णयम् ।
पर्ववास्तूपवासादि कृच्छ्रं चान्द्रेण गृह्यते ॥२१॥

मधुस्तथा माधवसंज्ञकश्च
शुक्रः शुचिश्चाथ नभोनभस्यौ ।
तथेष ऊर्जश्च सःहसहस्यौ
तपस्तपस्याविति तु क्रमेण ॥२२॥

इति कालनिर्णय :

संक्रान्तिफलम्

वसिष्ठः—

रविरविजभौमवारे संक्रान्तौ दिनकरस्य यन्मासे
पित्तकफानिलजामयनरपतिकलहस्त्ववृष्टिश्च ॥१॥

बुधगुरुसितचन्द्राहे सति संक्रान्तावनामयं नृणाम् ।
क्षितिपतिनिकरक्षेमं क्षस्यविवृद्धिर्विधर्मिणां पीडा ॥२॥

घोरोग्रर्क्षे, ध्वाङ्क्षी लघुभे, चरभे महोदरी, मृदुभे ।
मन्दाकिन्यचलर्क्षे मन्दा, मिश्रे मिश्रा, च राक्षसी तीक्ष्णे ॥३॥

शूद्रविट्चौरभूपद्विजगणपशुमुख्यसर्वजन्तूनाम्
शुभफलदा क्रमशस्ता नूनं संक्रान्तयः सदा तेषाम् ॥४॥

नागचतुष्पदतैतिलकरणे सुप्तः करोति संक्रमणम् ।
कौलवशकुनिकिंस्तुघ्ने करणे चोर्ध्वस्थितो दिनकृत् ॥५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

गरबववविष्टचां वणिजि सह बालवे सन्ततं निविष्टः सः ।
सततं जगतां वृष्टिर्धान्यार्घत्वं विशेषतः क्षेमम् ॥६॥

क्रमशस्त्वनिष्टमिष्टं मध्यमरूपं भवेदतुलम् ।
नानाविधरोगानप्येवं ज्ञातव्यमर्भकादीनाम् ॥७॥

पूर्वाह्णे नृपतिभयं मध्यार्ह्वे हन्ति भूसुरानखिलान् ?
अपरार्ह्वे वैश्यगणं शूद्रानखिलान्हि चास्तमये ॥८॥

रात्रिचरान्निशिसमये सन्ध्यासमये पिशाचगणान् ।
नटनर्तकानपरनिशि पशुपानखिलान्निहन्त्युषसि ॥९॥

केवलसंध्यासमये लिङ्गिव्रातं च निखिलसंन्यासान् ।
शुभफलदा संक्रान्तिरनुक्तकाले नृणां सततम् ॥१०॥

दिनपतिसंक्रमणात्प्राक्षोडश नाडचश्च पुण्यकालः सः ।
परतः षोडश नाडचः सर्वत्र स्नानदानकार्येषु ॥११॥

गुरुः—

अयने विषुवे पूर्वं परं मध्यन्दिनं त्यजेत् ।
अन्यसंक्रमणे पूर्वाः पराः षोडश षोडश ॥१२॥

संक्रमणं यद्यहनि तदहः पुण्यं च पुण्यकार्येषु ।
निश्यर्धात्प्राक्संक्रमणं पूर्वार्ह्वे स्नानदानयोः पुण्यम् ॥१३॥

निश्यर्धाद्यदि संक्रान्तिः पश्चाच्चेत्परदिने पुण्यम् ।
निशि समये साक्षाच्चेद्दिनद्वयं स्नानदानयोः पुण्यम् ॥१४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

२० संक्रान्तिफलम्

स्थिरराशिषु विष्णुपदं षडशीतिमुखं यद्युभयभ चैव ।
मृगकर्कटसंक्रान्ती उदगयनं दक्षिणायनं चेति ॥१५॥

अजधटसंक्रान्तिद्वयं विषुवत्प्रकीर्तितं नित्यम् ।
द्वादशसंक्रान्तीनां मध्ये चतुष्टयं तद्विशिष्टतमम् ॥१६॥

हरिपदयाम्ये त्वयने पूर्वदिनं स्नानदानयोः पुण्यम् ।
षडशीतिमुखे त्वयने सौम्ये पुण्यं च परदिनं निशि चेत् ॥१७॥

[1]इति संचित्य विनिर्णयमादेष्टव्यं सदैव दैवज्ञैः ।
यदहस्पृग्विषुवद्वयभस्मिन्नहनि प्रकीर्तितं पुण्यम् ॥१८॥

विषुवत्ययने ग्रहणे संक्रान्तौ पुण्यदिवसे च ।
पितृतृप्ति यो न करोति हि दत्वा शापं व्रजति तस्य तदा ॥१९॥

अनागतगतसमयेऽपि करोति यद्दानजपहोमाद्यम् ।
उषरवापितबीजं यद्वत्तद्वच्च निष्फलं भवति ॥२०॥

सुतजनने संक्रान्तावुपरागे चन्द्रसूर्ययोर्नित्यम् ।
कर्तव्यं च निशीथे स्नानं विषुवतो नृणाम् ॥२१॥
इति वशिष्ठ वचनम् ।

पूर्वरात्रेऽर्धरात्रे वा सन्ध्यायामुषिते ऽपि वा ।
मृगसंक्रमिते भानौ स्नानं कुर्यात् परेऽहनि ॥२२॥

अपरार्धेऽर्धरात्रे वा सन्ध्यायामुषितेऽपि वा ।
कर्कसंक्रमिते भानौ पूर्वभागे दिवाऽऽचरेत् ॥२३॥

---

[1]श्लोकार्धमेतत्प्र. ख. प. पुस्तकेषु नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

व्यासः—

यद्युषसि पूर्वरात्रे तथाऽर्धरात्रेऽथवापि सन्ध्याम् ।
संक्रामति मकरेऽर्कस्तदा स्नानादि भवेद्द्वितीयेऽह्नि ॥२४॥

यदा दिनेशो रजनीविरामे कदापि संक्रामति कर्कराशौ ।
तदा दिमे वासर एव कार्यं स्नानं तथा दान जपादिकर्म ॥२५॥

मकरराशिमुपैति यदि ध्रुवं दिनकरो रजनीप्रथमांशके ।
सकल एव तदा परवासरे जपहुतादिविधिः कथितो बुधैः ॥२६॥

इतरराशिषु संक्रमणं यदा भवति पूर्वनिशासमेय रवेः ।
प्रथममेव दिनं गदितं तदा मकरसंक्रमणे परवासरः ॥२७॥

यद्युषसि पूर्वरात्रे तथाऽर्धरात्रे थवापि सन्ध्यायाभ्
संक्रामति कर्केऽर्कस्तदा स्नानादि[1] पूर्व एव दिने ॥२८॥

विंशतिः प्रथमनाडिका रवौ कर्कटे सकलपुण्यदा मता ।
कीर्तिता मकरगे न्यसंक्रमाद्विंशतिस्तु परनाडिकाः शुभाः ॥२९॥

यद्येति मेषतुलयो राश्योरुभयोः सरोजिनीकान्तः ।
कथिता हि पूर्वमुनिभिर्नाड्यः पुण्यास्तथा दशोभयतः ॥३०॥

यद्युषसि कर्कगो ऽर्कः याति चेन्मकरे •
तदा हि पूर्वदिने स्नानदानकृतं तथा क्षय्यम् ॥३१॥

एषामभिप्रायोऽयनसंक्रान्त्युपलक्षितः । अत्र ब्रह्मसिद्धान्ते—

---

[1]स्नानं दानादि प्र.

CC-0. Nepal Sanskrit Academy, Kathmandu

२० संक्रान्तिफलम्

अयनैः संस्कृतो भानुर्गोले चरति सर्वदा ।
अमुख्या राशिसंक्रान्तिस्तुल्यकालविधिस्तयोः ॥३२॥

रोमशसिद्धान्तेऽपि—

अयनांशैः संस्कृतार्कान्मुख्यं संक्रान्तिरूच्यते ।
अमुख्या राशिसंक्रान्तिस्तुल्यकालविधिस्तयोः ॥३३॥

स्नानदानजपश्राद्धव्रतहोमादिकर्मभिः ।
संस्कृतं चलसंक्रान्तावक्षयं पुरुषो ऽश्नुते ॥३४॥

वसिष्टसिद्धान्तेऽपि—

चलसंस्कृततिग्मांशोः संक्रमो यः सः संक्रमः ।
अजागलस्तनमिव राशिसंक्रांन्तिरूच्यते ॥३५॥

पुण्यदानादिसंक्रांतिः केचिदाहुर्मनीषिणः ।
एतन्मम मते न स्यान्नस्पृशेत्क्रांन्तिकक्षया ॥३६॥

राशिसंक्रांन्तेरमुख्यत्वप्रतिपादनार्थमाह ।

दिनरात्रिप्रमाणानां निर्णयश्चलसंक्रमात् ।
ततः सकलकर्माणि पुण्यो ऽतश्चलसंक्रमः ॥३७॥

वसिष्ठः—-

अजकन्याझषकर्किणिसंक्रान्तौ यदि भवेद्वर्षम् ।
अतुलं क्षेमसुभिक्षं नृपसज्जनगोकुले क्षेमम् ॥३८॥

घटचापसिंहमिथुने संक्रान्तौ यदि भवेद् वर्षम् ।
आमयडामरभूभुजयुद्धभयं त्ववृष्टिश्च ॥३९॥

CC-0. Nepal Sanskrit Academy, Kathmandu

घटवृषवृश्चिकमकरे वृष्टिः स्यात्संक्रमणसमये ।
विस्फोटामयतस्करपीडा वृष्टिः कृशानुभयम् ॥४०॥

हरिशार्दूलवराहगर्दभगजमहिषाश्वशुनः ।
अजवृषभकुक्कुटा स्युः संक्रान्तेर्वाहनानि ववकरणात् ॥४१॥

बाल्हीकखशवङ्गेषु विज्ञेयं वाहनं च ऋक्षभवम् ।
करणभवम् त्वन्यस्मिन्देशे नियतं च वाहनं ज्ञेयम् ॥४२॥

[1]क्रमशो विभर्ति दिनपो बवतो भुशुण्डीगदाख्यं च ।
खड्गाख्यं दण्डकार्मुकतोमरकुन्तपाशाङ्कुशास्त्रशरा ॥४३॥

अन्नं च पायसं भैक्ष्यमपूपं च पयो दधि ।
चित्रान्नं[2]गुडमध्वाज्यंशर्करा बबतो हरे[3] ॥४४॥

सुप्तो नितान्तं चतुरङ्घ्रिनागे तत्तैतिलेसंक्रमणं करोति ।
गरे च विष्टया वणिजे बवाख्ये सबालवे तिग्मकरे निविस्टः ॥४५॥

[4]किंस्तुघ्ननाम्नि शकुनादपि कौलवाख्ये
चोर्ध्वस्थितस्य खलु संक्रमणं रवेस्यात् ।
धान्यार्घवृष्टिषु भवेत्क्रमशस्त्व निष्ट—
मध्येष्टतेति मुनय प्रवदन्ति पूर्वे ॥४६॥

---

[1]क्रमशो विभर्ति दिनपो भुसुण्डिगदाभिन्दिपालाख्यम् ।
खड्गाख्यदण्डकार्मुकतोमरकुन्तास्त्रबाणपाशसृणि ॥ख॥
[2]मिस्टान्नं पा । [3] हवि पा ।
[4]किंस्तुघ्नकौलवे भानौ शकुन्यां मकरस्थिे ।
ऊर्ध्वदृस्टि विजानीयात् तत्फलं शृणु नारद ॥
धान्यर्घवृष्टिसस्यानि स्वल्पमध्यबहुनि च ॥पा॥

CC-0. Nepal Sanskrit Academy, Kathmandu

२० संक्रान्तिफलम्

विधोर्वलाबलेनैव सूर्यः संक्रमितो[१] यदा
ददाति तत्फलं नृणां तस्मिन्मासे तु गौणतः ॥४७॥

हानि र्भास्करसंक्रान्तौ जन्मपूर्वापरत्रिषु[२] ।
अर्थलाभस्तथा षट्सु शेषेष्वेवमुपप्लवः ॥४८॥

दर्शान्त सूर्यभुक्तर्क्षान्निर्जीहाख्यं तु भत्रयम् ।
एकादशर्क्षं विंशर्क्षं मङ्गले निधनप्रदम् ॥४९॥

शूलदोषापनूत्यर्थं निर्जीवस्यापनुत्तये ।
स्वर्णशूलं द्विजे दद्यात् तिलवस्त्रसमन्वितम् ॥५०॥

अर्कविम्बचरो नित्यं (भचक्रं लभतेऽयनात् ।
अस्तोदये तदयनमुच्चनीचोच्चबर्त्मनः ॥५१॥

तदंशैर्न्यूनकालो यो वर्तमानस्य निर्गमः ।
परराशिप्रदेशश्च राशीनामेवमेव हि ॥५२॥

इति श्रीसारङ्गसाधुवचामृतेन भट्टश्री लक्ष्मणाचार्यविरचिते
जगन्मोहने संक्रान्तिफलाध्यायः ॥)

---

१ विधोर्वलाबलेनैतत्संक्रमेण दिवाकरः पा. । २ हानिश्चेदर्कसंक्रान्तिजन्म-पूर्वर्क्षतस्त्रिषु ।

चापान्तर्गतः पाठः प्रपुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथैकविंशोध्याय:

अधिमासनिर्ण:

सौरकालापेक्षया चान्द्रकालस्य त्रिंशद्दिनात्मकं कालाधिक्यं मलमुच्यते । तथा चोक्तं गृह्यपरिशिष्टे --

मलं वदन्ति कालस्य मासं कालविदोऽधिकम् । इति

तच्च कालाधिक्यं गणनया कदा पततीत्याकाङ्क्षायां वसिष्ठसिद्धान्ते--

द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा ।
घटिकानां चतुष्केण पतत्येकोऽधिमासकः ।।१।।

मासैरिति सौरमासैः । तथा चार्यभटीये --

द्वात्रिंशद्रविमासाः षोडशदिवसाश्च नाडिकास्तिस्त्रः ।
अधिमासान्तरमेतद् विनाडिकाः पञ्चपञ्चाशत् ।।२।। इति

विष्णुधर्मोत्तरे च --

सौरसंवत्सरस्यान्ते मासेन शशिजेन तु ।
एकादशातिरिच्यन्ते दिनानि भृगुनन्दनः ।।३।।

समाद्वये साष्टमासे तस्मान्मासोऽतिरिच्यते ।
स चाधिमासकः प्रोक्तः सौम्यकर्मविगर्हितः ।।४।। इति

अत्र पञ्चपञ्चाशत्पलाधिक घटिकात्रयोत्तर--षोडशदिवसा विवक्षिताः अन्यथाऽधिमासपरणं न स्यात् । तथाहि --

खचतुष्कसमुद्राष्टकुपञ्च (५१८४००००) रविमासकाः ।

एते रविमासाः । तान् संस्थाप्य

CC-0. Nepal Sanskrit Academy, Kathmandu

२१ अधिमासनिर्णयः

षड्वन्हित्रिहुताशाङ्कतिथय (१५९३३३६) श्चाधिमासकाः। एभिर्युगाधिमासैर्भागे कृते लब्धं द्वात्रिंशन्मासा भवन्ति । तच्छेषे त्रिंशता गुणिते षड्वह्नीत्यादिना भक्ते लब्धं षोडश दिवसा भवन्ति। तच्छेषे षष्टया गुणिते षड्वह्नीत्यादिना भक्ते लब्धं घटिकात्रयं भवति। पुनस्तच्छेशे षष्टया गुणिते षड्वन्हित्यादिना भक्ते लब्धं पञ्चपञ्चाशद्विघटिका भवन्ति[1]: ततो द्वात्रिंशन्मासमात्रेणाऽधिमासपूरणं न भवति

---

(१)

युगाधिमासाः	युगसौरमासाः	अधिमासाः
१५९३३३६:	५१८४००००::	? : क

$$\frac{५१८४०००० \times १}{१५९३३३६}$$

```
१५९३३३६) ५१८४०००० (३२।१६।३।५५
          ४७८०००८
          --------
           ४०३९९२०
           ३१८६६७२
          --------
            ८५३२४८
                 ३०
          --------
          २५५९७४४०
          १५९३३३६
          --------
           ९६६४०८०
           ९५६००१६
          --------
```

CC-0. Nepal Sanskrit Academy, Kathmandu

१०४०६४
६०
६२४३८४०
४७८०००८
१४६३८३२
६०
८७८२९९२०
७९६६६८०
८१६३११२०
७९६६६६८०
१९६४४०

सौरसंवत्सरस्यान्त इत्यर्थ ।

सौरसंवत्सरे द्वादशभिर्गुणिते मासा भवन्ति । तेषु मासेषु युगाधिमासै (१५९३३३६) र्गुणितेषु युगसौरमासै (५१८४००००) श्च भक्तेषु लब्धमेकादश दिनानि भवन्ति । तच्छेषे षष्टया गुणिते युगसौरमासै र्भक्ते लब्धं तिस्रो घटिकाः, तच्छेषे षष्टया गुणिते युगसौरमासैर्भक्ते लब्धं त्रिपञ्चाशत्पलानि, पुनस्तच्छेषे षष्टया गुणिते युगसौरमासैर्भक्ते लब्धं चतुर्विंशति विपलानि भवन्ति । एवं द्वितीयवर्षेऽपि । एवं च द्वाविंशतिर्दिनानि, सप्त घटिकाः, षट्चत्वारिंशत्पलानि, अष्टचत्वारिंशद् विपलानि भवन्ति ।

एकस्मिन् सौरमासे युगाधिमासैर्गुणिते युगसौरमासै र्भक्ते लब्धं दिनस्थाने शून्यं, तच्छेषे षष्टया गुणिते युगसौरमासैर्भक्ते लब्धं पञ्चपञ्चाशद्

CC-0. Nepal Sanskrit Academy, Kathmandu

घटिकाः, तच्छेषे षष्टया गुणिते युगसौरमासैर्भक्ते लब्ध मेकोन विंशतिर्वि-नाड्यः,तच्छेषे षष्टया गुणिते युगसौरमासैर्भक्ते लब्धं सप्तविंशतिर्विपलानि भयन्ति । एवमन्यत्रापि । एवं च मासाष्टकस्य सप्त दिनानि द्वाविंशति-र्घटिकाः पञ्चत्रिंशत्पलानि षट्त्रिंशद्विपलानि । एवं द्वात्रिंशद्रविमासान्ते चान्द्रमानेनैकोन त्रिंशद्दिवसात्रिंशद् घटिका द्वाविंशतिः पलानि चतुर्विंश-तिर्विपलानि भवन्ति । प्रतिदिनमेका घटिका पञ्चाशत्पलानि विपलान्या-ष्टत्रिंशत् । एवं षोडशदिनोत्तरद्वात्रिंशद्रविमासान्ते एकोनत्रिंशद्दिनानि,एकोन षष्टिर्घटिकाः द्वापञ्चाशत्पलानि विपलानि द्वात्रिंशत् । सौर घटिकान्ते चान्द्र वृद्धिरेकपलं विपलानि पञ्चपञ्चाशत्तद्विपलान्यष्टत्रिंशत् । एव मितरत्रापि । एवं च घत्रिकात्रयस्य पञ्चपञ्चाशत्पलानां चान्ते पलानि सप्त विपलान्यष्टाविंशति रेवं पञ्चपञ्चाशत्पलाधिक–घटिकात्रयाधिक घटिकात्रयाधिक–षोडशदिनोत्तर–द्वात्रिशद्रविमासान्ते चान्द्रत्रिंशद्दिना-त्मकोऽधिकमासो भवति । इति ।

अधिकमासोपपत्तिप्रकारः कथ्यतेः–
सूर्यसिध्दान्तोक्त प्रकारेण

वसुद्वयष्टाद्रिरुपाङ्कसप्ताद्रितिथयो (१५७७९१७८२८) युगे ।

एतान् युगसावनदिवसान् संस्थाप्य तत्रैवोक्तः

युगे सूर्यज्ञशुक्राणां खचतुष्करदार्णवा (४३२००००)

एतैर्युगसौरमासैर्भक्ते लब्धं दिवसा ३६५ घटिका १५ विघटिका ३१ विपलानि ३१।एतस्मिन्नेव सौरदिवसादिसमूहे द्वादशभिर्भक्ते सौरमासे दिवसाः ३० नाड्यः २६ पलानि १७ विपलानि ३७.

वसुद्वयष्टाद्रिरूपाङ्कसप्ताद्रितिथयो (१५७७९१७८२८ युगे

CC-0. Nepal Sanskrit Academy, Kathmandu

एतत्संख्यकान् भूदिवसान् संस्थाप्य
वसुसप्ताद्रि नेत्रेषुयुगवेदा (४४५२७७८) विधोः समाः

एतत्संख्यकैर्युगचान्द्रवर्षैर्भागे लब्धमेकस्मिश्चान्द्र वर्षे दिवसा ३५४ नाड्यः २२ पलं १ विपलानि २४ । एतस्मिं श्चान्द्रवर्ष–दिवससमूहे द्वादशभिर्भक्ते लब्धं चान्द्रमासे दिवसा २९ नाडयः ३१ पलानि ५० विपलानि ७ । एकस्य सौरमासस्य दिवसेषु, एकस्य चान्द्रमासस्य दिवसैर्न्यूनी कृतेषु, एतावता धिकम्–नाड्च ५४ पलानि २७ विपलानि ३० । एवं प्रतिमासे समुत्पन्ने पञ्चपञ्चाशत्पलाधिक–घटिकात्रयाधिक–षोडशदिवसोत्तरद्वात्रिंशन्मासान्तेऽधिमासः पतति । तथा च शिद्धान्तशिरोमणौ ।–

इदानिमधिमासोपपत्तिमाह––

चान्द्रोनसौरेणहृतात्त चान्द्रादवाप्तसौरैर्दशनैर्दलाढ्यैः ३२। १७
मासैर्भवेच्चान्द्रमसोऽधिमासः कल्पेऽपि कल्प्याः अनुपाततोऽतः ॥५॥

सौरात्मासादैन्दवः स्याल्लघीयान् यस्मातस्मात्संख्यया तेऽधिकाऽस्युः।
चान्द्रा. कल्पे सौरचान्द्रान्तरै र्ये मासास्तज्ज्ञैस्तेऽधिमासा प्रदिष्टाः।६।

अत्र द्वितीयः श्लोक स्तावत्प्रथमं व्याख्यायते । सौरान्मासादैन्दवो मासो यतो लघुतरः कारणात्कल्पे सौरमाससंख्याया श्चान्द्रमाससंख्याधिका भवति। यथा धान्यराशिमानेऽष्टसेतिकाहारमितेः षट्सेतिकाहारमितिरधिका भवतीति बालैरपि बुध्यते । यावन्तश्चाद्रसाभाः कल्पेऽधिका भवन्ति तत्संख्याधिमाससंख्या तज्ज्ञैः कल्पिता । अत्र कियद्भिः सौरैरेकोधिमासो भवतोति युक्तीरूच्यते । चान्द्रोनसौरेणहृतात्तु चान्द्रादिति । सौरमासकुदिनेभ्यश्चान्द्रमासकुदिनेषु शोधितेषु शेषं दिनस्थाने पूर्णमधश्चतुष्पंचाशद्घटिकाः सप्तविंशतिः पलानि सावयवानि । एकस्मिन्सौरमास इदं सौरचा-

CC-0. Nepal Sanskrit Academy, Kathmandu

न्द्रान्तरं कुदिनात्मकम् । युगस्यादेरूपर्येकस्मिन्दर्शान्ते प्राप्त एकश्चान्द्रमासः पूर्णस्तदनन्तरं चतुष्पंचाषद्घटिकाभिः सावयवाभिर्मध्यार्कस्य वृषभसंक्रान्तिस्तस्य रविमासः पूर्णस्ततोऽन्यस्मिन्दर्शान्तेऽन्यश्चान्द्रमासान्तः । ततो दर्शान्तादुपरि द्विगुणाभिस्ताभिरेव घटिकाभिर्मिथुनसंक्रान्तिः । एवं त्रिगुण चतुर्गुणादिभिः कर्कटादिसंक्रान्तयो भवन्ति । एवं संक्रान्तिरग्रतो याति । पुनर्दर्शान्तं प्राप्तोति । तदा गत चान्द्रमासेभ्यः सौरा एकोना भवन्ति । यदा संक्रान्तिर्दशान्तमतिक्रम्याग्रतो याति तदानुपातेन यावन्तः सौरा भवन्ति तावद्भिरेकोऽधिमासः । तत्रानुपातः यद्येकेन सौरचान्द्रान्तरेण कुदिनात्मकेन (०।५४।२७।३२) एकः सौरमासो याति तदा चान्द्रमासान्तरपातिभिः कुदिनैः (२९।३१।५०।७) कियन्त इति फलं सूर्यमासाः (३२।१६।३।६५)। अथ च युगाधिमासैर्युगचान्द्रमासा लभ्यन्ते तदैकेन किमिति । फलमेतावन्त एव सौरमासा लभ्यन्ते । एतावद्भिः सौरमासैरेकश्चान्दमासोऽधिको भवति । अत एवाधिमासस्य चान्दत्वम् । कल्पेऽपि कल्प्या अनुपाततोऽत इति सुगमम् ।

चान्दमासदिवसैरूनीकृतेन सौरमासदिवससमूहेन विपलात्मकन १९६०५० कृताद्विभक्ताच्चान्दमासस्य दिनविपलानि ६३७८६०७ विपलात्मकेन हृताद्विभक्ताल्लब्धैर्दशनैर्द्वात्रिंशत्सौरमासैर्दलाढ्यैः पंचपंचाशत्पलाधिकघटिकात्रयाधिक–षोडशदिवससहितैर्द्वात्रिंशन्मासैरेकः पततीति प्रथम श्लोकस्य संक्षिप्तोऽर्थः ।।

अधिमासपाते–

यन्मासान्ताधिशेषः स्याच्चतुर्युगाधिमासतः ।
हीनो यः सष्टिवारात्स मासः पापशुभार्घयुक ।।७।।

CC-0. Nepal Sanskrit Academy, Kathmandu

चतुर्युगाधिमासेभ्यो १५९३३३६ यन्मासान्ताधिशेषः स्यादहर्गणानयनसमये योऽधिमासशेषः स हीनश्चेत्तत्राधिमासः पततीति द्रष्टव्यमित्यर्थः । छात्रिंशन्मासाधिकं कदा पूर्णमित्याकाङ्क्षायां तच्चिह्नं ब्रह्मसिद्धान्त एवोक्तम् ।

अधिशेषात् फलं पूर्णं यद्युदंका दिमासकैः ।
दिनषष्टयात्मको मास परमासात्पुरस्तुकः ॥८॥ इति

युगाधिमासैर्युक्तादधिमासशेषातफलं लब्धं द्वात्रिशन्मासाधिकमिति पूर्वमुक्तम् । तदा षष्टिदिवसात्मको मासः पतति । अस्मात् परमासात् पुरः पूर्वस्तुकः शुध्द इत्यर्थः । अत्र तुलादिषट्कापेक्षया पुरस्तुक इत्युक्तम् । तत एव परिज्ञानार्थं तत्रैवोक्तम् ।

महायुगार्कमासाधिशेषयोरन्तरात्फलम् ।
यद्युगाधिकमासेन सैकशेषे च तत्पुनः ॥९॥

तावन्मासो वर्तमानाद्दिनषष्यात्मकः स तु ।
निः शेषे यः फाल्गुन श्चेच्छुद्धपापार्धयुक्क्रमात् ॥१०॥

महायुगार्कमासानाँ ५१८४०००० महायुगाधिमासशेषस्य चान्तरं कर्तव्यम् । शिष्टान्महायुगाधिमासै (१५९३३३६) र्भक्तात्फलं लब्धं तदेकयुक्तम् कर्तव्यं ते मासास्तदेकयुक्तं कर्तव्यं ते मासास्तच्छेषे पुनस्त्रिंशद्गुणिते युगाधिमासै (१५९३३३६) र्भक्ते लब्धं दिनादिकं वर्तमानादिष्टकालात्तावति मासेऽधिमासो ज्ञातव्यः। स तु षष्टि दिवसात्मकः स यदि निः शेषजः स युगार्कमासाधिशेषयोरन्तरं मान निः शेषजः स्यात् । तदा फाल्गुनोऽधिमासः स्यात् । सोऽपि षष्टयात्मकः क्रमात् । शुध्दपापार्ध युगित्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

२१ अधिमासनिर्णयः

अथ सूर्यसिद्धान्तानुसारेण गणितक्रमेण अधिमासानयन प्रकारः कथ्यते —

सूर्याब्दः संख्यया ज्ञेयाः कृतस्यान्ते गता अमी।
खचतुष्कयमाद्र्यग्निशररन्ध्र निशाकराः (१९५३७२००००) ॥११॥

एते कृतयुगस्यान्ते सृष्टिगताब्दास्त्रेता द्वापरकलिगताब्द प्रमाणेन संयुक्ताः स्वेष्टकालाब्दा भवन्ति। सृष्टिगताब्दात्कलिगताब्दात् वापीष्टाहर्गणमानयेत। तत्प्रकार श्च —

मासीकृता युता मासैर्मधुशुक्लादिभिर्गतैः।
पृथक्स्थास्तेऽधिमासघ्नाः सूर्यमासविभाजिताः ॥१२॥

लब्धाधिमासकैर्युक्ता दिनीकृत्य दिनान्विताः।
द्विष्ठा तिथिक्षयाभ्यस्ता श्चान्द्रवासरभाजिताः ॥१३॥
लब्धोनरात्रिरहिता लङ्कायामर्धरात्रिकः।

सावनो द्युगणः सूर्याद्दिनमासाब्द पास्ततः ॥१४॥
सप्तभिः क्षयितः शेषः सूर्याद्यो वासरेश्वरः।

द्वापरयुगान्ते सृष्टिगताब्दाः १९५५८८०००० शकाब्द संयुतकलिगताब्दास्तत्संयुक्तसृष्टिगताब्दाः। युगाधिमासाः १५९३३३६ युगसूर्यमासाः ५१८४०००० तिथिक्षयाः २५०८२२५२। अथ युगचान्द्रवासराः १६०३००००८०। एभ्योऽहर्गणं साधयित्वैक मासाधिकाहर्गणं च प्रसाध्योभयोरन्तरे क्रियमाणे षष्टिदिवसाश्चान्द्रतिथयो यत्र पतन्ति तत्राधिमासः। यत्र न पतन्ति षष्टिदिबसा न तत्राधिमास इति। अधिमासस्य चान्द्रत्व मधिमासलक्षणं च।

CC-0. Nepal Sanskrit Academy, Kathmandu

हारितः–

इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्तितः ।
अग्नीसोमौ स्मृते मध्ये समाप्तौ पितृसोमकौ ।।१५।।

तमतिक्रम्य तु यदा रविर्गच्छेत्कथंचन ।
आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृतः ।।१६।।

इन्द्राग्नी यत्र हूयेत इति शुक्लप्रतिपद उपलक्षणम् । अग्नीसोमाविति कृष्णप्रतिपद उपलक्षणम् । पितृसोमकाविति दर्शस्य । एतेन चान्द्रमास उपलक्षितः । तं मासमतिक्रम्यान्यस्मिन्मासे यदा सूर्यो मासान्तरं गच्छेत्तदा पूर्वो मलिम्लुचः । उत्तरः प्राकृतः शुद्ध इत्यर्थः ।।

नन्दी पुराणेऽपिः-

अमावास्यामहोरात्रे यदा संक्रमते रविः ।
स तु मासः पवित्रः स्यादतीते ह्यधिको भवेत् ।।१७।।

अमावास्यां प्राप्य यदाऽहनि वा रात्रौ वा रविः संक्रामति तदा चान्द्रो मासः पवित्रः स्यात् । यदा पुनरमावास्याव्याप्तावहोरात्रव्यतीते सति रविः संक्रामति तदा चान्द्रो मासोऽधिमासः स्यादित्यर्थः ।

ज्योतिः शास्त्रे–

अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितम् ।
मलिम्लुचः स विज्ञेय उत्तरस्तूत्तराभिधः ।।१८।।

अरूणः सूर्यो भानुस्तपनश्चण्डो रविर्गभस्तिश्च ।
अर्यमा हिरण्यरेता दिवाकरो विष्णुमैत्रौ च ।।१९।।

CC-0. Nepal Sanskrit Academy, Kathmandu

२१ अधिमास निर्णयः

एते द्वादशसूर्या माघाद्येषूदयन्ति मासेषु ।
निः सूर्योऽधिकमासो मलिम्लुचो व्यस्ततः पापः ॥२०॥

मासेषु द्वादशादित्यास्तपन्ते हि यथाक्रमम् ।
नपुंसकेऽधिके मासि मण्डलं तपते रविः ॥२१॥

असंक्रमो हि यो मासः कदाचित्तिथिवृद्धितः :
कालान्तरे समायाति स नपुंसक उच्यते ॥२२॥
एतेषु वचनेषु सामान्यवाचकं संक्रान्तिपदं मासपदं च ।

ब्रह्मसिद्धान्ते–

मध्ये चान्द्रमसे मासे नास्ति मध्यार्क संक्रमः ।
यत्रासावधिकः पापी शुभकर्म विनाशनः ॥२३॥ इति

ब्रह्मसिद्धान्तविशेषवचनेन मध्यमसंक्रान्तिपरत्वेन मध्यानीतचान्द्र-मासपरत्वेन च व्याख्यातव्यम् । यथा पुरोडास चतुर्धा करोति सामान्य वाचकं पुरोडासपदं शाखान्तरस्थेनाऽज्ञेयं पुरोडासं चतुर्धा करोतीति विशेषवचनेनाऽज्ञेयपुरोडासपरत्वेन निर्णीतम् ।

तद्वत्पौलिशसिद्धान्तेऽपि–

मध्येन्दुमासमभ्येत्य यत्र मध्यार्कसंक्रमः ।
यत्र मासाधिकः पापी शुभकर्म विनाशनः ॥२४॥

भट्टेश्वरसिद्धान्तेऽपि–

मध्यमरविसंक्रमयोर्मध्ये मध्यार्कचन्द्रयोर्योगौ ।
अधिमासः संसर्यः स्फुटयोरहस्पतिर्नो चेत् ॥२५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

मध्यार्क चन्द्रयोर्योगावित्यनेन मध्यसूर्यचन्द्रानीतामावास्याद्वय मुच्यते । स्फुटयोः शुद्धयो रविसंक्रमयोर्मध्येऽमावास्याद्वयं यत्र स संसर्प्यमासः । नोचेत्स्फुटपर्वद्वयमध्य एक स्फुटं न स्यात् । किन्तु स्फुट-संक्रमद्वयमस्ति स चांहस्पतिरित्यर्थः ।

संसर्प्यक्षयमासयोर्लक्षणमुक्तं ब्रह्मसिद्धान्ते—
शुद्धेन्दुमासे शुद्धार्क संक्रमो नास्ति यत्र तम् ।
संसर्प्यमासं सत्कर्मनाशनं विद्धि नारद ।
द्युषष्टिकल्पना नास्ति यत्र संसर्प्यसंज्ञितः ॥२६॥

शुद्धेन्दुमासे शुद्धार्कसंक्रमद्वयस्ति चेत् ।
शून्यमासः स विज्ञेयो न तत्र शुभमाचरेत ॥२७॥

अहो नाम महापापं शून्यमासे शुभे कृते
जायते हस्पतिः प्रोक्तः संज्ञाभेदेन चेति सः ॥२८।

सिद्धान्तशिरोमणावपि–

दर्शावधिश्चान्द्रमसो हि मासः सौरस्तु संक्रान्त्यवधियतोऽतः ।
दर्शाग्रतः संक्रमकालतः प्राक्सदैव तिष्ठत्यधिमा सशेषः ॥२९।

दर्शान्ततो याततिथिप्रमाणैः सौरैस्तुसौरा दिवसाः समेताः ।
यतोऽधिशेषोत्थदिनाधिकास्ते त्यक्तो यतोऽस्मादधिमासशेषः ॥३०॥

(तिथ्यन्तसूर्योदययोस्तु मध्ये सदैव तिष्ठत्यवमावशेषः ।
त्यक्तेन तेनोदयकालिकः स्यात्तित्थ्यन्तकाले द्युगणोऽन्यथातः ॥३१॥)

CC-0. Nepal Sanskrit Academy, Kathmandu

२१ अनिमास निर्णयः

मध्यममानेन यावत्यमावास्या तदन्ते चान्द्रमासान्तः । मध्यमार्कस्य यस्मिन्दिने संक्रान्तिस्तत्र संक्रान्तिकाले रविमासान्तः । तयोः सौरचान्द्रमास योरन्तरेयावत्यस्तिथयः सा॒ऽयवास्ता अधिमासशेषतिथयः । यतः सौरचान्द्रा-न्तरमधिमासाः । अहर्गणानयने गताब्दा रविगुणास्ते सौरा मासा जाताः । अतस्तेषु चैत्रादिचान्द्रतुल्याः सौरा एव मासा योजितास्तेसंक्रान्त्यवधयो जातास्तेषु त्रिंशद्गुणेषु गततिथि तुल्याः सौरा एव दिवसा योजिताः । अतः सौरा चान्द्रान्तरेणाधिका जाता तदनन्तरमधिमासशेषदिनानि भवन्ति । सौरचान्द्रान्तरत्वात् । अतोऽधिमासशेषदिनान्येभ्यः शोध्यानि । अथ चाधिमासानयनेऽनुपातलब्धैरधिमासैर्दिनीकृतैस्तच्छेषदिनैश्च युक्ताः सौराहाश्चान्द्राहा भवितुमर्हन्ति । एवमत्राऽधिमासशेष दिनानि क्षेप्याणि । अयः कारणादधिमासशेषंत्यक्तम् । इति ।

मध्यममानेनामावस्यानयनम्

वसुद्वयष्टाद्रिरूपाङ्कसप्ताद्रितिथयो (१५७७९१७८२८) युगे । एते युगवासराः

युगे सूर्यज्ञशुक्राणां खचरतुष्करदार्णवा (४३२००००) । एते युगसूर्य भगणाः

इन्दो रसाग्नि त्रि त्रीषुसप्तभूधर मार्गणाः (५७७५३३३६) एते युगचन्द्र भगणाः

रवेः क्रमेण लिप्ता विलिप्ता गतिः ५९।८
चन्द्रस्य क्रमेण लिप्ता विलिप्ता गतिः ७९०।३५
यथा स्वभगणाभ्यस्तो दिनराशिकुवासरैः ।
विभाजितो मध्यगत्या भगणादिग्रहो भवेत् ॥३३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

इष्टाहर्गणाद्रविभगणैर्गुणिताद् भूवासरैर्विभक्ताल्लब्धं गतभगणाः । तच्छेषादर्कगुणितात्पूर्वोक्त भूवासरैर्भक्ताल्लब्धं राशयः । तच्छेषात् त्रिंशता गुणिताद् भूवासरैर्भक्ताल्लब्धं भागाः । तच्छेषात्षष्ट्या गुणिताद् भूवासरै भक्ताल्लब्धं लिप्ता; । तच्छेषात्षष्ट्या गुणिताद् भूवासरैर्भक्ताल्लब्धं विलिप्ता अनेनैव प्रकारेण मध्यचन्द्रोऽपि साध्यः । एवंविधमध्यार्कचन्द्राक्वलम्ब्य मध्यमावास्याघटिकानयनम् ।

अर्कोनचन्द्र लिप्ताःस्युस्तिथयो भोगभाजिताः ।
गतगस्याच्च षष्टिघ्ना नाडयो भुक्त्यन्तरोद्धृताः ॥३३॥
भभोगाष्टशतैर्लिप्ताः खाश्विनैलास्तथा तिथेः ।

मध्यार्केणोनीकृतान्मध्यचन्द्राल्लिप्तीकृतान्नखाश्वैर्भक्ताद्गततिथयो भवन्ति । तच्छेषश्चत्वारिंशदधिकपञ्चशताधिक श्चेन्नखाश्वेभ्योन्यूनीकर्तव्यो नोचेत्तथैव स्थापनीयः । तस्माच्छेषात्षष्टिगुणितान्मध्यार्केन्दुगत्यन्तरेण भक्ताल्लब्धं घटिकादिकं यथास्थितशेषादानीतं चेदर्धरात्रप्रमाणाच्छोध्यं नखाश्वन्यूनीकृताच्छेषादानीतं चेदर्धरात्रप्रमाणेन संयोज्यम् । एतन्मध्यामावास्या भवति । एवं विधामावास्यामतिक्रम्य रवि संक्रामति । सोऽधिमासः । तत्रैवद्युषष्टिकल्पनागणितक्रमेण पतति । ततश्च सूर्यसिद्धान्तवचनपर्यालोचनयाऽधिकमासस्य मध्य संक्रान्तिराहित्यमासत्वं लक्षणम् । गणितागताद्द्युषष्टिमध्ये त्रिंशद्दिनात्मकसमुदाययोरन्तरत्वं वा । सौरकाल प्रतिययोगिकाधिक्ययुक्तत्रिंशद्दिनात्मकमासत्वं वा संसर्प्यस्यन्स्फुट संक्रान्तिरहितमासत्वं लक्षणम् । क्षयापरपर्यायस्य हस्पतिमासस्य स्फुटसंक्राति द्वययुक्तमासत्वं लक्षण मिति सिद्धम् । ननुस्फुटसंक्रान्तिरहितो मासोऽधिमासस्तु प्रसिद्धत्वात । ननु मध्यम संक्रान्तिरहितो लोकप्रसिद्धाभावादिति परीक्षकाः । आद्येऽपि किं सर्वं उत कति

CC-0. Nepal Sanskrit Academy, Kathmandu

पये। नाद्यः । अस्मदादिभिः सर्वपामरप्रसिद्ध भावस्य ज्ञातुमशक्यत्वात् । द्वितीयेऽपि सर्वं उत कतिपये। नाद्यः। उक्त दोषादेव तावद् द्वितीयः।- इतरशब्दप्रवीणैर्ज्योतिर्विभ्दिस्तस्याङ्गीकृतत्वेन प्रसिद्धभावस्यासिद्धेः । नत्विन्द्राग्नी यत्र हूयेत इत्यादिषु स्फुटचान्द्र एव स्वीकृतः। तत्रैवेन्द्राग्न्यादी-नुद्दीश्य होमादि विधानात् । तमतिक्रम्य शुद्धसंक्रान्तिर्भवति सोऽधिमासः । मध्यचान्द्रमास इति चेन्नैवम् । संक्रान्तिशब्दस्य स्फुटमध्यसंक्रान्तिसारणत्वेन विशेषवचनेन निर्णीतत्वात् । 'हूयेत' इत्यादेस्तु चान्द्रमासोपलक्षार्थत्वेन तत्र तात्पर्याभावात् । तात्पर्यो वा मध्यमचान्द्रमासस्य स्फुटचान्द्रमासस्य चाधिमासपातकाले स्वल्पान्तरत्वात् । न दोषाभावात् । ननु मध्यममानाव-लम्बनेन घटिकाचतुष्टयाधिक–षोडश दिनोत्तर–द्वात्रिंशन्मासान्तरमधि-मासः पतत्येवेति नियमो यद्यङ्गीक्रियते तर्हि बहुवचनविरोधः। तथाहि विष्णुधर्मोत्तरे --

सौरेणाब्दस्तु मानने यदा भवति भार्गव ।
श्रावणे तु तदा मासे दिनषट्कं न पूर्यते ।।३४।।

उनरात्रस्तु ते राम प्रोक्तः संवत्सरेण षट् ।
सौरसंवत्सरस्यान्ते मानेन शशिजेन तु ।।३५।।
एकादशातिरिच्यन्ते दिनानि भृगुनन्दन ।
समाद्वये साष्टमासे तस्मान्मासोऽतिरिच्यते ।।३६।।

स चाधिमासकः प्रोक्तः सौम्यकर्म विगर्हितः ।

तथा काठक गृह्येऽपि —

यस्मिन्मासे न संक्रान्ति संक्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो मासे त्रिंशत्तमेतुयत् ।।३७।। इति

CC-0. Nepal Sanskrit Academy, Kathmandu

तथा भारतेऽपि --

पञ्चमे पञ्चमे वर्षे द्वौ मासावुपचीयते ।
तेषां कालातिरेकेण ग्रहाणामविचारतः ॥३८॥

एतैर्वचनैरन्यथा प्रतिपादनात्स्फुटीकृत्यैव कदाचिद्द्वात्रिंशन्मासानन्तर कदाचित्त्रिंशन्मासानन्तरमधिमासः पततीति विकल्पोऽङ्गीकर्तव्यः न नियमः । अन्यथैतेषामप्रमाण्य प्रसङ्ग इति चेन्नैवम् । काकेभ्यो रक्षता मत्यत्र काकपदस्येतरबुद्धिकरोपलक्षकत्वात् । त्रिंशत्तमादि पदानामपि द्वात्रिंशदादिकालोपलक्षकत्वेन प्रामाण्य संभवात् । 'त्रीनतीत्य मातृतः पञ्चातीत्यपितृत' इत्यादेरर्वाक् निषेधपरत्वेन प्रामाण्यवत् । त्रिंशत्तमादिपदानामर्वाक् निषेधपरत्वेन वा प्रामाण्यसंभवात् । अत एव च हेमाद्रिकारेणाप्युक्तम् । एतत्सर्वं प्राक् मलमासो न भवतीत्येवं परमिति । न च हेमाद्रिकारवचनम् । प्रायिकाभिप्रायमिति वाच्यम् । 'त्रीनतीत्य मातृतः' प्रायिकाभिप्रायत्वेनापि प्रसंगात् न च तत्प्रायिकाभिप्रायम् । पञ्चमात्सप्तमादूर्ध्वमिति नियामकवचनविरोधादिति वाच्यम् । अत्रापि द्वात्रिंशद्भिर्गतैर्मासैरित्यादि नियामक वचनविरोधस्य तुल्यत्वाङ्गणितविरोधाच्चास्फुटसंक्रान्तिराहित्येनाधिमासमङ्गीकृत्य त्रिंशत्तमादि विकल्पोऽप्यङ्गी क्रियते । एकोनत्रिंशन्मासादिषु स्फुटसंक्रान्तिराहित्येनाधिमासपातात् । एतेषामधिमासप्रसंगात्किं च स्फुटसंक्रान्तिरहिताधिमासवादी प्रष्टव्यः । किं शुध्दसंक्रान्तिराहित्यमधिमासस्य लक्षणम् । उतः कर्मानर्हत्वे सति संक्रान्तिराहित्यम् । नाद्यः । एकवर्षमध्ये गता संक्रान्तमासेऽतिव्याप्तेः । न द्वितोयः । कर्मानर्हतज्ञानेऽधिमासज्ञानम् । अधिमासज्ञाने सति कर्मानर्हत्वज्ञाद्य मित्यन्योन्या श्रय प्रसंगात् । उभयत्र संसर्प्येऽतिव्याप्ते न संसर्प्यश्च च संसर्प्य एव नास्ति । त्रयो मासाश्च इति वचनविरोधात् । ब्रह्मसिध्दान्तादौ त्रयाणां पृथक्पृथक् लक्षणप्रतिपादनाविरोधात् । अधिक श्चासौ

CC-0. Nepal Sanskrit Academy, Kathmandu

२१ अधिमास निर्णयः

मास श्चेत्यधिकमास शब्दो योग रूढः पङ्कज शब्दवत्। स च षष्टि-दिवसात्मकमध्ये पूर्वस्मिन् उत्तरस्मिन् भागे वा मुख्यः। संक्रान्तिराहित्य-योगात्। संसर्प्यगौणौऽधिमासशब्दः।

तथा च शिद्धान्तशिरोमणौ —

असंक्रान्तिमासोऽधिमासः स्फुटः स्याद्
द्विसंक्रान्तिमासः क्षयाख्यः कदाचित्।
क्षयः कार्तिकादित्रये नान्यतः स्यात्
तदा वर्षमध्येऽधिमास द्वयं च ॥३९॥

स्फुटचान्द्रमासः शुद्धसंक्रान्तिरहितोऽधिमास इत्यर्थः। स्फुटसं-क्रान्तिद्वययुक्तः क्षयमासः कदाचित् पतति। अधिमासवत्सर्वेष्वपि मासेषु क्षयो नस्यादित्याह। तदेति यदा क्षयः स्यात्तदा क्षयः पूर्वापरयो संसर्प्यद्वयं स्यात्। न चात्राधिमासद्वयशब्देन मुख्याधिमासद्वयमेव स्वीकार्यम्। अधिकाभावादिति- वाच्यम्। त्रयोदशं तु श्रुतिराह मासं चतुर्दशः क्वापि नदृष्ट एषः। इति

येन चतुर्दशमासत्वं न संधिष्यते। बाधकत्वात्। तत्र च चतुर्द-मासकत्वं न भविष्यति। क्षयमासस्य लोपोऽक्षयत्वादिति वाच्यम्। द्विसं-क्रान्तिरेतत्क्षयमाससंज्ञया संकेतितत्वात्। अधिमासपातवत्। गणनया क्षयमासस्यानपपाताच्च। न चैको मुख्योऽपरो गौणः। तयोर्ग्रहणमस्तीति वाच्यम्। मुख्यगौणयोरेकस्मिन्प्रयोग एकेनैव शब्देन ग्रहणयोगात्। तस्मात्संसर्प्यद्वयमेत्ववगृह्यते। ननु संसर्प्यग्रहणं संसर्प्यद्वयं क्षयमासोऽ-धिमासश्चेति चत्वारो मासा निन्दिताः प्रसह्येरन्। तथा च।

CC-0. Nepal Sanskrit Academy, Kathmandu

अधिमासोऽति दुष्टः स्यात्संसर्प्याहस्पती तथा ।
संसर्प्याहस्पती मासौ मलमासश्च निन्दितः ॥४०॥

इति बार्हस्पत्यवचनं विरूद्धयते चेन्नैवमुभयो रन्यतराधिमासेन सह मेलनावश्यंभावेन मासत्रयस्यैव संभवात् । तयोः संसर्प्ययोः शुद्धत्व-प्रतिपादनाच्च । तथा च जावालिः–

एकस्मिन्नपि वर्षे चेद् द्वौ मासावधिमासकौ ।
पूर्वमासः प्रशस्तः स्यादपरस्त्वधिमासकः ॥४१॥

तथा—

मासद्वयेऽब्दमध्ये तु संक्रान्तिर्न यदा भवेत् ।
प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः ॥४२॥

यदा संसर्प्यौ द्वावेकस्मिन् वर्षे तदा पूर्वः शुभ उत्तरो दुष्ट इत्यर्थः । एकः संसर्प्य आश्विन्यादिषट्केऽपरः संसर्प्यश्चैत्रादिषट्के तत्र निर्णायकं ब्रम्हसिद्धान्तवचनम् —

चैत्रादर्वाङ्नाधिमासः परतस्त्वधिको भवेत् ।
दृष्टाहि सर्वशास्त्रेषु तस्मिन्मूर्तिस्त्रयोदशी ॥४३॥ इति

आश्विनमारभ्य चैत्रादर्वागधिमासः संसर्प्यः । दुष्ट न भवति । किन्तु चैत्रादिषट्के यः संसर्प्य स एव दुष्टः । तत्र हेतुर्दृष्टेति हि यस्मात्तस्मिश्चैत्रादिषट्क एव त्रयोदशी च। त्रयोदशी मूर्ति संसर्प्याख्या दृष्टाः । सूर्यसिद्धान्त ब्रम्हसिद्धान्तादि गणितशास्त्रे तुलादिषट्के—

यां तिथिं समनुप्राप्य तुलां गच्छति भा करः ।
तथैव सर्वसंक्रान्तिर्मेषं यावन्न गच्छति ॥४४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

इत्यादिन्यायेन प्रायेणादर्शनादुक्तविषय एव वचनान्तरम् । ज्योतिः सिद्धान्ते—

घटकन्यागते सूर्ये वृश्चिके वाथ धन्विनी ।
मकरे वाऽथ कुम्भे वा नाधिमासो विधीयते ॥४५॥

अस्य वचनद्वयस्य स्वरूपनिषेधपरत्वे "दशानां फाल्गुनादीनां प्रायोमाघस्य तु क्वचित् । नपुंसकं भवती" त्यादि वचनविरोधः । न चैतासु विमुख्याधिमासविषयमेवास्त्विति वाच्यम् ।

मासः कन्यागते भानावसंक्रान्तो भवेद्यपि ।
दैवं पित्र्यं तदा कर्म तुलास्थे कर्तुरक्षयम् ॥४६॥

वसिष्ठः—

सर्वेषु मासेष्वधिमासकः स्यात्तुलादिषट्केऽपि च शून्यमासः ।
संसर्प्पकः सर्वभवो हि मासः सर्वेऽपि चैते खलुनिन्द्यमासाः ॥४७॥

इत्यादि बहुवचनविरोधप्रसंगात् । द्वात्रिंशन्मासादिनियामकबचन विरोधप्रसङ्गाच्च । तथा च वचनान्तरम् ।

कन्यादिपञ्चके न स्याद्वृद्धिर्दृष्टेऽपि लक्षणे ।
तद्भानुलङ्घितं नाम फाल्गुनद्वयकारकम् ॥४८॥

कन्यादिपंचक एकः स्फुटसंक्रान्तिरहितो ऽपरो फाल्गुने तदा कन्यादिपंचके वृद्धिः । तदा संक्रान्तिराहित्यं तत्फाल्गुणद्वयवत् मुख्याधिमासद्वयवत्कारकं दोषकारकमित्यर्थः । तथा च–

CC-0. Nepal Sanskrit Academy, Kathmandu

मासद्वयेऽब्द मध्ये तु संक्रान्तिर्न यदा भवेत् ।
प्राकृतस्तत्र पूर्वस्यादधिमासस्तथोत्तर: ॥४९॥ इति

चैत्रादर्वाङ्नाधिमासः परतस्त्वधिको भवेत् ।
तन्मध्येऽप्यधिको मासस्तदा चैत्रो मलो भवेत् ॥५०॥

आश्विन्यादिषट्केऽधिमासो न भवति परत श्चैत्रादिषट्क एव भवति । यद्याश्विनादिषट्केऽप्यमावास्यामतिक्रम्य किंस्तुघ्नमध्ये संक्रमश्चैत्रे किंस्तुघ्नमतिक्रम्य संक्रमस्तदा चैत्र एव मलसंसर्प्यः । न पूर्वं संसर्प्य इत्यर्थः । कार्तिकमासविषयेऽन्य :

प्रायः कार्तिकमासस्य वृद्धिर्नेष्टेह तादृशी ।
आत्यन्तिकी यदा सास्याज्जगदौत्पातिकं तदा ।५१॥

देव कार्तिकमासोऽयं वर्धते नातिहीयते ।
मासानामितरेषां वै वर्धनं चाह नारद ॥५२॥

यां तिथिं समनुप्राप्य तुलां गच्छति भास्करः ।
तथैव सर्वसंक्रान्तिर्मेषं यावन्नगच्छति ॥५३॥

यदा वक्रातिचाराभ्यां तदतिक्रमणं भवेत् ।
क्षत्रियाणामसुग्धारास्तदा पिबति मेदिनी ॥५४॥

एतेषामपि संसर्प्यविषयत्वं स्फुटगतेरेव ह्रासवृद्धिसंभवात् । न मध्यगतेस्तदभावात् । न कन्यादिपंचके न स्यादित्यादीनि कृत्रिमानीव लक्ष्यन्ते । सूर्यब्रम्हलोमसादिसिद्धान्तेषु हेमाद्र्यादि प्रसिद्धनिबन्धेषु चादर्शनात् । तथापि तेषां प्राधान्यमाश्रित्य विषयो दर्शित इति द्रष्टव्यम् । संसर्प्यमभिप्रेत्य भीमपराक्रमेणाप्युक्तम् ।—

CC-0. Nepal Sanskrit Academy, Kathmandu

२१ अधिमासनिर्णय

यस्मिन् दर्शस्यान्तादर्वागेका परा पर दर्शात् ।
उल्लङ्घ्य भवति भानोः संक्रान्तिः सोऽधिमासःस्यात् ॥५५॥

एकस्मिन्नपि वर्षे यथेदं लक्षणं मासयोरूभयोः ।
तत्रोत्तरोऽधिमासः स्फुटगत्या प्रायमर्केन्दोः ॥५६॥

नचैतेषु वचतेष्वधिमासशब्दः संसर्प्य विषयः किमित्यङ्गीक्रियते । मुख्याधिमासविषय एवास्त्विति वाच्यम् । गणितबिरोधाद् ब्रम्हसिद्धान्तादिवचनविरोधाद् वा । तथा च वशिष्ठः—

पर्वद्वयं संक्रमयोर्यदि स्यात् पर्वान्तरे संक्रमणद्वयञ्च ।
संसर्प्यकाहस्पतिनामधेयौ मध्यार्कगत्या त्वधिमास उक्तः ॥५७॥

पर्वद्वयशब्देन पर्वद्वयान्तो विवक्षितः । पर्वान्तरे पर्वणोरमावास्ययोरन्तरे मध्य इत्यर्थः ॥

चान्द्रःस्यादधिसंक्रमेण रहितो मासः सितादिक्रिया—
वाह्योसावधिमासक क्षयमिति स स्याद्द्विसंक्रान्तिकः ।
आरभ्याधिकमासमेति स पुनर्द्वात्रिंशमासे समं
घस्रैः षोडशभिश्चतुर्घटियुतैः स्यादग्रमासान्वयः ॥५८॥

मध्यार्कगत्यात्विति शब्देन शुद्धगत्या संसर्प्याहस्पत्योः पात इति सिद्धम् । अन्येतु

चैत्रादर्वाङ्नाधिमासः परतस्त्वधिको भवेत् ।
दृष्टा हि सर्वशास्त्रेषु तस्मिन् मूर्तिस्त्रयोदशी ।५९॥

घटकन्यागते सूर्य इत्येतयो र्विषयान्तरमाहुः । आश्विन्यादिषट्के मासे पूर्वो भागो नाधिमासः शद्धः परतः परभागोऽधिकस्तस्मिन् षष्ठि-

CC-0. Nepal Sanskrit Academy, Kathmandu

दिवसात्मकमध्ये परोभागस्त्रयोदशी मूर्तिः। सर्वशास्त्रेषु दृष्टो न्यायसिद्ध श्चायं पक्ष अधिकमासस्य वृद्धिरूपत्वात् । वृद्धेश्चाग्रनिष्ठत्वनियमात् । अन्यथा तिथिवृद्धेरप्युत्तरसंज्ञापातः । अस्मात् पूर्वमासस्य शेषोऽधिमास इत्यङ्गीकर्तव्यम् ।

तथा च ब्रह्मसिद्धान्ते—

तावन्मासो वर्तमानाद्दिनषष्ट्यात्मकःसतु ।
निःशेषजः फाल्गुनश्चेच्छुद्धपापार्धयुक्क्रमात् ॥६०॥इति

चैत्रादिषट्के तु मासशेषत्वमधिसासस्य सिद्धं न्यायसिद्धमप्यधिमासस्य पूर्वमासशेषत्वम् ।

आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः मृस्तः ।

इतिवचनेन वाध्यते । तस्माच्चैत्रादिषट्के तूत्तरमासशेषत्वमधिमासस्य सिद्धत्वम् । ज्योतिष्पितामहेऽपि —

षष्ट्या तु दिवसैर्मासः कथितो वादरयणैः।
पूर्वार्धे तु परित्यज्य कर्तव्या उत्तरे क्रियाः॥ ६१ इति,

तथा च ज्योतिः शास्त्रे—

दिवसस्य हरत्यर्कः षष्टिभागमृतौ ततः।
करोत्येकहरच्छेदं तथैवैके च चन्द्रमाः ॥६२॥

एवमर्धतृतीयाणामधिमासकमीरितम् ।
ग्रीष्मे जनयतः पूर्वं पश्चिमाब्दे तु पश्चिमम् । ॥६३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

२१ अधिमासनिर्णयः

दिवसस्य तिथेः प्रमाणं चतुष्पञ्चाशद् ५४ घटिकाः तस्य षष्ठिभागं चतुष्पञ्चाशत् ५४ पलात्मकं हरति। तच्च ऋतौ षड्६ घटिकान्यूनं दिवसं करोति। एवं चन्द्रः। एवं द्वात्रिंशन्मासानन्तरषोडश दिवसानन्तरमधिमास : पतति।

अर्धं वर्षार्धं तृतीयं येषामब्दानामेतदुपलक्षणं द्वात्रिंशन्मासादेः। अन्यथा मासपूरणाभावेनाधिमाससंभव प्रसंगात्। न च स्फुटगतिमाश्रित्य द्वात्रिंशत्त्रिंशत्तमादिमध्ये यदा कदाचिन्मासपात इति विकल्पोऽस्त्विति वाच्यम्। षड्विंशत्येकोनत्रिंशदादिष्वपि स्फुटसंक्रान्तिराहित्ये नाधिमासस्य स्वीकारप्रसंगात् ततश्च। एतेषामप्युपलक्षणपरत्वमङ्गीकर्त्तव्यं स्यात्। तथा च गणित विरोध उक्तः— ब्रह्मसिद्धान्तादिगणितविरोधः स्यात्। षोडशदिवसाधिक द्वात्रिंशन्मासगणनया सिद्धान्तानाम्। "षड्वह्नि त्रिहुताशाङ्कतिथयश्चाधिमासका" इत्यादिसूर्यसिद्धान्तवचनविरोध प्रसंगाच्च। ग्रीष्मे चैत्रादिषट्के षष्टिदिवसात्मकमासविषये पूर्वमधिमासं जनयति। पश्चिमार्द्धे तुलादिषट्के तु पश्चिममुपरिभागमधिमासं जनयतीतिश्लोकार्थः।

यत्तु सिद्धान्तशिरोमणौ——

स्पष्टो धिमासः पतितोऽप्यलब्धो यदा यदा चापतितो प्यलब्धः।
सैकैर्निरेकैः क्रमशोऽधिमासैस्तदा दिनौघः सुधिया विधेयः ॥६४॥

कृत्वायुतोनं क्रमशोऽधिशेषं दिनीकृतैः कल्पभवाधिमासैः।
सैकान्निरेकान्मधुयातमासांस्तत प्रसाध्यौ खलु पुष्पवन्तौ ॥ ६५ ॥

एतच्छ्लोकद्वयं करणग्रन्थविषयकं तत्र करणग्रन्थे सूर्यसिद्धान्तसारे न तथा स्पष्टः। व्यक्तः सन् पतितोऽप्यधिमासोऽलब्धः। यावच्च

CC-0. Nepal Sanskrit Academy, Kathmandu

यदा चापतितोपि लब्धः । तदा क्रमशः सैकैर्निरेकैरधिमासैर्दिनौघ सुधिया विधेयेति प्रथम पद्यार्थः । अयं न नियम शकाब्दावलम्बनेन प्रवृत्तेषु करणकुतूहल करणप्रकाश–मानसतिथिचक्रादिषु नतु कलिसृष्टि-कल्पान्यतमावलम्बने प्रवृतेषु-आर्यभटवार्षिकतन्त्रखण्डखाद्यादिषु करण-ग्रन्थेषु नियमः । यथा च शातातपीय श्रुतिः–अथ यानि पञ्चत्रिंशत् स त्रयो मासात्मकेत्यादि । सा पञ्चपक्षाधिकत्रिंशत्तमो मासोऽधिमासइ ति ।

एवं परंपरया व्याख्या कर्तव्या । अन्यथा प्रत्यक्ष गणितविरोधेन यजमानः प्रस्तर इतिवत् स्वार्थ प्रामाण्याभावप्रसंगात् ।

तथाह व्यासः–

गते अब्दद्वये सार्धे पञ्चपक्षे दिनत्रये ।
दिवसस्याष्टमे भागे स पतत्यधिमासकः ।

अथ मासानयनम्

संवत् १४६७ शकाब्दा: १३६२ कलिगराब्दा: ४५४१ मासिकृता मासचतुष्टययुता: ५४४९६ एतेऽधिमासघ्नाः ८६८३४३८६५६ सूर्यमा-सैर्विभक्ताल्लब्धं १६७४ तच्छेषः ५०२७८६५६ कल्पादिद्युगणः १६७८-७३२ मध्यमरविः ३।१।३८।६।। चन्द्रः २।२६।५५।२०।। उच्चम् ५।-१४।३०। रविमन्दोच्चम् २।१७।१६। स्फुटरविः ३।१।५।३८ रविगतिः ५६।५६ चन्द्रः ३।४।५४।१७ चन्द्रगतिः ७७३।३ मिश्रम् ४६।५२।। आषाढ बहुला १४ चं २८।५२।। स्फुटकर्कटेऽर्कः ३८।१५ श्रावण बहुला मावास्यायां बुधबासरे तत्र मध्यमरविः४।१।१२।१०।। चन्द्रः४।५।१२।४८ उच्चम् ५।१३।५०।२२। स्फुटरविः ३।२८।४२।४१। रविगतिः ५७।३२। चन्द्रः ३।२६।१।३३। चन्द्रगतिः ७४९।१२। मिश्रम् ४६।२२। मध्यमा-

CC-0. Nepal Sanskrit Academy, Kathmandu

वास्या दण्डः २६।८ चतुर्दश्यां मध्यमसिंहेऽर्कः ३३।४० द्वितीयायां स्फुट सिंहेऽर्कः ५। अथ मासीकृताः पञ्चमासयुताः ५४४६७ एतेऽधिमासघ्नाः ८६८३२०३१९९२ सूर्यमास विभाजिताल्लब्धम् १६७५ तच्छेषः ३१९९२ कल्पादिद्युगणः १६७८७९२ मध्यमरविः ४।२६।४७।८।। चन्द्रः ४।२७।२०।५। उच्चम् ५।२१।४।३।। स्फुटरविः ३।२८।४३।४१ रविगतिः ५७।३१।। चन्द्रः ३।२६।१८।३३ चन्द्रगतिः ७४६।१२।। मिश्रम् ४६।२२।। मध्यमावास्या दण्डः २६।८ स्फुटरविः ४।३।४२।३२।। रवि गतिः ५८।२८।। चन्द्रः ४।२६।२८।२६। चन्द्रगतिः ७२७।२८।। मिश्रम् ४५।१५।। द्वितीयभाद्रपदमध्यामावास्यादण्डः ५८।२५।। मध्याकन्यार्कः ५३।२५

संवत् १५०० शकाब्दाः १३६५ कलिगताब्दाः ४५४४।। मासीकृता मासैकयुताः ५४५२९ एतेऽधिमासघ्नाः ८६८८३०१८७४४ सूर्यमास विभवताल्लब्धं १६७५ तच्छेषः ५१०१८७४४ कल्पादिद्युगणः १६५९-७३६ तत्र मध्यमरविः ०।६।५३।। चन्द्रः ०।१२।६।४६।। उच्चम् ३।२६।२१।। स्फुटरविः २६।५३ रविगतिः ५८।३४।। चन्द्रः ०।३।८।३५ गतिः ७९७।०।। मिश्रम् ४५।० स्फुटामावास्या चैत्रवहुला दण्डः ३१।३५। द्वादश्यां स्फुटमेषेऽर्कः २२।१२ मध्यमावास्यादण्डः ५६।२२ चतुर्दश्यां मध्यममेषेऽर्क ३३।३५ वैशाख बहुलाऽमावास्यायाम् । तत्र मध्यमरविः २।१।४४।०।४६। चन्द्रः १।४।१६।४२ उच्चम् ६।६।४०।। स्फुट रविः १।२।१६।५७।३५ चन्द्रः ०।२६।४१।४४।। गतिः ७८०।। मिश्रम् ४६।२२।। स्फुटावास्या दण्डः ५८।४६।। त्रयोदश्यां स्फुटोऽर्कः ३०।०।। मध्यमावास्या दण्डः २६। मध्यमवृषभेऽर्क २।०।। कलिगताब्दः ४५४४। मासिकृता मासद्वययुता ५४५३० एतेऽधिमासघ्नाः ८६८८४६१२०८० सूर्यमास ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अधिमास निर्णयः

विभाजिताल्लब्धं १६७६ तच्छेषः ७७२०८० कल्पादिद्युगणः १६५६७६६ मध्यमरविः २।०।१८।५७।। चन्द्रः २।६।३४।७।। उच्चं ६।१३।०।२५।। स्फुटरविः २।०।५८।११। गतिः ५६।५७।। चन्द्रः २।६।४२।१७।७।। उच्चम् ६।१३।०।३२।। चद्रः २।६।४७।१७।। गतिः ८४७।०।। मिश्रम् ४६।५२।। स्फुटामावास्यादण्डः २०-२४ चतुर्दश्यां स्फुटमिथुनेऽर्कः ४५। ४० द्वितीय ज्येष्ठशुक्ल प्रतिपदि मध्यमिथुनेऽर्कः २७।४६ आषाढबहुलामावास्यायाम् तत्र मध्यमरविः २।२८।५३।५३ चद्रः ३।१।४१।। उच्चम् ६।१६।१४।२०।। स्फुटरविः २।२८।२७।६।। गतिः ५६।५४ चन्द्रः ३।०।२४।। गतिः ८५७।३३।। मिश्रम् ४६।५४ स्फुटामावास्यादण्डः ३।५४।। द्वितीयायां स्फुटकर्कटेऽर्कः २४।५४।।

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्य
विरचिते जगन्मोहनेऽधिमासनिर्णयाऽध्यायः ।

अथ द्वाविंशोऽध्याय

अरिष्टसूचकाध्यायः

भगवतो गर्गाचार्ययवनाचार्ययोर्मतमवलम्ब्यानिष्टसूचकफलानि प्रारभ्यन्ते ।

जन्मर्क्षमाद्यं दशमं च कर्म सांघातिकं षोडशकं प्रदिष्टम् ।
अष्टादशंसामुदयंविनाशं त्रैविशभं मानसपञ्चविंशम् ।।१।।

षड्भानि च शुभकर्माण्यैतानि विनाशदानि जन्तूनाम् ।
राज्ञो विशेषभानि तु देशोद्भवजातिपट्टबन्धानि ।।२।।

CC-0. Nepal Sanskrit Academy, Kathmandu

नवधिष्ण्यानि नृपाणां विनाशदान्येव सर्वकार्येषु ।
अत एवाखिलविषये नूनं वर्ज्यानि सर्वदाऽत्यर्थम् ॥३॥

कृतमखिलं जन्मनि भे विनाशमायाति तत्कार्यम् ।
कर्मणि कर्मविनाशं साङ्घातर्क्षे शरीरपीडा स्यात् ॥४॥

रोगभयं सामुदयं वैनाशिकभे विनाशः स्यात् ।
हृदयभयं मानसभे देशर्क्षे राजपीडा स्यात् ॥५॥

जात्यर्क्षे जातीभयमभिषेकर्क्षे च राजनाशः स्यात् ।
क्रूराम्बरचरनिहतेष्वेषु तु भेषु प्रभूतपीडा स्यात् ॥६॥

जन्मनि धिष्ण्ये यस्य ग्रहणोत्पाता भवन्ति तस्यैवम् ।
ग्रहयज्ञैरभिषेकैर्होमैर्दानैः प्रशमनं यान्ति ॥७॥

जन्मर्क्षगो यस्य ग्रहो ग्रहेण निहन्यते पंचविधोल्कया वा ।
मासेन मृत्युं प्रवदन्ति तस्य गर्गादिमुख्या मुनयो नरस्य ॥८॥

कर्मर्क्षगो वा प्रददाति मृत्युं मासद्वयेन त्रिदिनाधिकेन ।
चतुष्पदाच्चापि सरीसृपाद्वा मार्गप्रपन्नस्य नरस्य तस्य ॥९॥

साङ्घातिकस्थस्त्रिभिरेव मासैर्मासैर्दिनैः पंचभिरेव धत्ते ।
मृत्युं गते न स्वगृहाश्रितस्य नरस्य नूनं मुनिवाक्यमेतत् ॥१०॥

मासैश्चतुर्भिश्च तथोदयर्क्षं शस्त्रेण मृत्युं प्रददाति पुंसाम् ।
विषेण वा बन्धनकेन वापि स्वयं विनश्येदपि देवराजः ॥११॥

CC-0. Nepal Sanskrit Academy, Kathmandu

वैनाशिकस्थः प्रददाति मृत्युं क्षतान्नरोगेण बुभुक्षिताद्वा ।
दिनैस्त्रिभिः पंचभिरेव धत्ते विदेशसंस्थस्य नरस्य नूनम् ।।१२।।

मृत्युं तथा मानसगो नराणां मासैश्चतुर्भिर्विदधाति खेटः ।
जन्मर्क्षगो वा दिवसाधिनाथः कर्मर्क्षगौ भूमिजरात्रिनाथौ ।।१३।।

मृत्युस्तथा शस्त्रकृतो नरस्य संपद्यते द्वादशरात्रिमध्ये ।
कर्मर्क्षगो वा दिवसाधिनाथः साङ्घातिकस्थौ शशिभूमिपुत्रौ ।।१४।।

मृत्युस्तथा तस्य भवेन्नरस्य मासस्य मध्ये कथितो मुनिन्द्रैः ।
सांघातिकर्क्षे यदि वा दिनेशस्तयोदयस्थौ शशिभूमिपुत्रौ ।।१५।।

मासत्रयेण प्रभवेन्नरस्य तस्यान्तरे वा यदि तस्य नूनम् ।
यथोदयर्क्षे दिवसाधिनाथो वैनाशिकस्थौ शशिभूमिपुत्रौ ।।१६।।

गुदान्नरोगेण तदाविनाशं संपत्स्यते रक्तविकारकैर्वा ।
वैनाशिकर्क्षे यदि वासरेशो मनःस्थितौ भूमिजरात्रिनाथौ ।।१७।।

मृत्युस्तथा स्याद् दिवसत्रयेण षण्मासयुक्तेन ध्रुवं नरस्य ।
चित्तर्क्षयःस्याद् यदि वासरेको जन्मर्क्षगो भूमिजरात्रिनाथौ ।।१८।

तदादिनेशो मनुजस्य भाति वर्षेण मासत्रयसंयुतेन ।
जन्मर्क्षगःस्यात् यदि भूमिपुत्रः[१] कर्मर्क्षगौ सूर्यनिशाधिनाथौ ।।१९।।

चतुष्पदैः स्यान्मरणं नरस्य जीवेन्न वा मासचतुष्टयं सः[२] ।
कर्मर्क्षगः स्याद् यदि भूमिपुत्रः सांधातिके रात्रिपवासरेशौ ।।२०।।

---

१ भानुपुत्रः प्र.भा. । २ जीवेनवा मास चतुष्टयस्य प्र.श्र.प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

मत्तात्सकाशान्मरणं नरस्य तदा भवेन्मासत्रयस्यमध्ये ।
संघातिके स्याद् यदि भूमिपुत्रः सूर्यर्क्षपेशावुदयं प्रयातौ ॥२१॥

मासत्रये कुष्टभगन्दरेण विनाशमायाति मुनिप्रदिष्टम् ।
जन्मर्क्षसंस्थो[1] भुविजो यदि स्याद् वैनाशिकस्थौ रविरात्रिनाथौ ॥२२॥

तदा ज्वरेणैव विनाशमेति मासस्य मध्ये कथितो मुनीन्द्रैः ।
वैनाशिकस्थो यदि भूमिपुत्रः सूर्यक्षपेशौ च मनः प्रयातौ ॥२३॥

व्याधेः सकाशान्मरणं प्रदिष्टं संवत्सरार्धेन नरस्य नूनम् ।
मनःस्थितःस्यात यदि भूमिपुत्रो जन्मर्क्षगौ रात्रिपवासरेशौ ॥२४॥

अजीर्णतः स्यान्मरणं नरस्य शस्त्रप्रहारैरथवाऽऽत्मघातैः ।
[2]कर्मर्क्षगःस्याद् यदि सूर्यपुत्रः सांघातिकस्थौ कुजरात्रिनाथौ ॥२५॥

संवत्सरेण प्रवदन्ति मृत्युं तदा नरस्याग्निसमुद्भवं च ।
सांघातिकस्थो यदि सूर्यपुत्रो जन्मर्क्षसंस्थौ[3] कुजरात्रिनाथौ ॥२६॥

मासैश्चतुर्भिर्दिवसैश्चतुर्भिस्तदा नरस्याऽऽमरणं जलाद्वा ।
जन्मर्क्षसंस्थो रविजो यदि स्याद् वैनाशिकस्थौ कुजरात्रिनाथौ ॥२७॥

तदाष्टमास प्रवभो हि मृत्युर्भवेन्नरस्य प्रमदासकाशात् ।
वैनाशिकस्थो यदि सूर्यसूनुर्मनः स्थितौ भूमिजरात्रिनाथौ ॥२८॥

---

१ उदयर्क्षसंस्थे लि.पु. ।
२ जन्मर्क्षगः स्याद् यदि भानुपुत्रः कर्मर्क्षगौ भूमिजरात्रिनाथौ ।
तदा दिशेन्मासचतुष्टयान्ते रोगाद् रणाद् वा मरणं नराणाम् ॥
२५ श्लोकः प्र. नास्ति । ३ उदयर्क्षसंस्थौ लि.पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

तदाष्टमासार्धयुतेन मृत्युं वदेन्नरस्य क्षुभितप्रकोपात्[1] ।
मनःस्थितःस्याद् यदि सूर्यपुत्रो जन्मर्क्षसंस्थौ कुजरात्रिनाथौ ॥२९॥

मासैश्चतुर्भिर्मरणं नरस्य तथा भवेद् रोगकृतः सुरेन्द्रः[2] ।
यस्य नरस्य हि जन्मनि धिष्ण्ये क्रूरैर्निपीडिते खचरैः ॥३०॥

अतिदुःखामयशोकभयं प्रवासशत्रोर्भयं भवति ।
यस्मिन् धिष्ण्ये विपदि प्रत्यरिभे स्थाननाशनं भवति ॥३१॥

निधनं नैधनधिष्ण्ये बन्धनमथवा स्थिते पापे ।
शुभखचरेषु नक्षत्रेष्वेषु तु संस्थेषु चाल्पहानिः स्यात् ॥३२॥

मध्यमफलदा सौम्याः पापाश्चानुक्तभेषु भीतिकराः। ॥३३॥

विष्णुयामलमतमबलम्ब्य नक्षत्रदृष्टिप्रकारः प्रोच्यते ।

सर्वे पंचदर्शी तारां भौमोऽ्त्यष्टिवसुस्थिताम् ।
शनिस्तु मूर्छनेषुस्थां दशातिधृतिगां गुरूः ॥३४॥

पश्येत् सितज्ञौ नवमी नान्यास्तारा निरीक्षिताः।
नीचास्तारिगृहे वापि वृथा सर्वं प्रकीर्त्तितम् ॥३५॥

पुरोऽन्ष्यस्यैव कामिन्या सकटाक्षनिरीक्षणम् ॥३६॥

नारदः–

अस्तगा नीचगा शत्रुराशिगाश्च पराजिताः।
न शक्ताः स्वफलं दांतु दानमश्रोत्रिये यथा ॥३७॥

---

१ क्षुधितप्रकोपात् क.च. । २ तदा भवेद् रोगकरः सुरेन्द्रः ? ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अस्तनीचारिशत्रुस्थो दुर्वलो विजितोऽपि वा ।
शुभो वा प्यशुभो वापि कष्टदाता भवेद् ध्रुवम् ॥३८॥

नीचशत्रुगृहस्थो वा शुभो वा कष्टमिच्छति ।
मित्रोच्चोपचयस्थोऽपि क्रूरोऽपि शुभदायकः ॥३९॥

इतिश्री सारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहनेऽरिष्टसूचकाऽध्यायः ।

अथ त्रयोविंशोऽध्यायः

अङ्गग्रहणम्

तत्र रवेः

गणपतियामले–

[1]त्रैवक्रे स्थाननाशं त्रिशिरसि विभवं दक्षिणाङ्घ्रि त्रिरोगं
पञ्चश्रीर्दक्षहस्ते त्रितयमपि सदा वामपादे विनाशम् ॥
हस्ते श्रीः पञ्चवामे त्रिकटिधनचयं कुक्षियुग्मेऽर्थलाभं
जन्माद्यर्कस्यभान्तात् फलमिति शुभदं चाङ्गसूर्यस्य चक्रम् ॥

मतान्तरँब्रम्हयामले–

---

[1]वक्रे ३ स्थाननाशम्	वामपादे ३ विनाशम्
शिरसि ३ विभवम्	वामहस्ते ५ श्रीः
दक्षपादे ३ रोगम्	कट्याम् ३ धनचयम्
दक्षहस्ते ५ श्रीः	कुक्षयोः २ अर्थलाभम्

CC-0. Nepal Sanskrit Academy, Kathmandu

[1]वक्त्रैकं मूर्ध्नि चत्वार्युरसि च चतुरः सव्यहस्ते चतुष्कं
पादे षड् वामहस्ते चतुरथ जघने द्वेच गुह्ये द्वयं च ॥
भानोर्नाशं च सौख्यं विजयमथधनं स्वाच्युतिर्देहपीडा
लाभं मृत्युं च चक्रे क्रमपरिगणिते जन्मनक्षत्रपूर्वम् ॥२॥

अथ चन्द्रस्य

[2]शीतांशोर्जन्मऋक्षाच्छिरसि बहुधनं पञ्चकं नेत्रयोर्द्वे
लाभो वक्त्रे भयं द्वे धनमपि च करे दक्षिणे त्रीणि संस्थे।
पीडा षट् पादयुग्मे धनमितरकरे त्रीणि पञ्चोदरेऽन्नं
मृत्युर्गुह्यैकमेकं क्रमपरिगणिते यत्र शीतांशुधिष्ण्यम् ॥३॥

अथ कुजस्य

[3]जन्मर्क्षादियुगे शिरस्यवनिजो दुःखं मुखे स्याद् भयं
पाणौ त्रीण्यथ दक्षिणे धनभयं षट् पादयोः पीडनम्।
वामे त्रीणि करे भयं तु मरणं पञ्चासने नेत्रयो-
र्द्वे लाभं हृदये करौ च शिखिनश्चक्रे विलोमक्रमात् ॥४॥

---

[1]ब्रह्मयामलोक्तमङ्गसूर्यस्य चक्रम्–वक्त्रे १ नाशम्। मुर्ध्न ४ सौख्यम्। उरसि ४ विजय। सव्यहस्ते ४ धनम्। पादे ६ च्युति। वामहस्त ४ देहपीडा। जघने २ लाभः। गुह्ये २ मृत्युः।

[2]सोमस्याङ्गग्रहणम् – शिरसि ५ बहुधनं। नेत्रयोः २ लाभः। वक्त्रे २ भयम्। दक्षकरे ३ धनं। वामकरे ३ धनं। उदरे ५ अन्नं। गुह्ये १ मृत्यु। पादयुग्मे ६ पीडा।

[3]भौमस्याङ्ग ग्रहणम्–शिरसि २ दुःखं। मुखे भयं। दक्षिणपाणौ ३ धनभयं। पादयो ६ पीडनं। वामकरे ३ भयं। अशने ५ मरणं। नेत्रयो २ लाभः। अहृदये२अनलभयं।

CC-0. Nepal Sanskrit Academy, Kathmandu

मतान्तरम् ।। गणपतिः–

[४]एकं वक्रे च मृत्युस्त्रिशिरसि भयं सागरैर्वामहस्ते
भङ्गः पादे च वामे चतुरपि सततं नित्यमेव प्रवासम् ।
कुक्षौ ऋक्षाणि पञ्च श्रियमपि सततं दक्षिणे वाहुयुग्मे
चत्वारो दक्षपादे विभवधनयुतं भौमचक्रक्रमः स्यात् ।।५।।

अथ बुधस्य

[५]शिरसि त्रीणि राज्यं स्याद् वक्रैकं धनलाभदम् ।
नेत्रे द्वे प्रीतिलाभश्च कुक्षौ श्री पञ्चकं तथा ।।६।।

प्रवासः पादयोः षट्कं वामे भीतिश्चतुष्टयम् ।
चतुर्थे दक्षिणे हस्ते धनलाभस्तथैव च ।।७।।

गुह्यस्थाने द्वयमृक्षं बन्धनं मरणं तथा ।
बुधस्य चक्रमित्याहुर्जनमऋक्षादि गण्यते ।।८।।

---

[४]वक्रे १ मृत्युः । शिरसि ३ भयं । वामहस्ते ४ भङ्गः । वामपादे ४ प्रवासः ।
कुक्षौ ५ श्रीः । दक्षवाहौ ४ । दक्षपादे ४ विभवधनयुतं ।

[५]बुधस्याङ्गग्रहणम्–शिरसि ३ राज्यं । वक्त्रे १ धनलाभः । नेत्रे २ प्रीति-लाभः । कुक्षौ ५ श्रीः । पादयोः ६ प्रवासः । वामे ४ भीतिः । दक्षहस्ते ४ धनलाभः । गुह्ये २ बन्धनं मरणंम ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ गुरोः

[1]शिर्षे चत्वारि राज्यं युगपरिपठितं दक्षिणेहस्तलक्ष्मी-
रेकं कण्ठे विभूतिर्मदनशरमितं वक्षसि प्रीतिलाभम् ।
पादौ षट् देहपीडां चतुरपि च तदा वामहस्ते च मृत्युं
भालस्थे त्रीणि सौख्यं नृपतिसम सुखं जीवचक्रक्रमेण ॥९॥

अथ शुक्रस्य

[2]शिरसि चतुर्थे भृगुतनयो धनलाभस्त्रीणि भानि भाले च ।
दक्षिणहस्ते जलनिधिर्लक्ष्मीप्राप्ति विधुः कण्ठे ॥१०॥

हृदयेऽपि पञ्च लाभः पादे षट् देहपीडा स्यात् ।
चतुरपि वामे हस्ते शोकं विदधात्युशनसश्चक्रम् ॥११॥

अथ शनेः

[3]वक्रैकं सद्य मृत्युः करचतुरधनं पादयोः षट्प्रवासं
वामे हस्ते चतुष्कं भयमुदरगतं पंच ऋक्षं श्रियाप्तिम् ।

---

[1] गुरोरङ्गग्रहणम् – शिरसि ४ राज्यं । दक्षिणहस्ते ४ लक्ष्मीः । कण्ठे १ विभूतिः । वक्षसि ५ प्रीतिलाभः । पादौ ६ देहपीडा । वाम-हस्ते ४ मृत्युः । भाले ३ सौख्यं ।

[2] शुक्रस्याङ्गग्रहणम् – शिरसि ४ धनलाभः । भाले ३ धनलाभः । दक्षिणहस्ते ४ लक्ष्मीः कण्ठे १ ——— हृदये ५ लाभः । पादे ६ देहपीडा । वामहस्ते ४ शोकम् ।

[3] शनेरङ्गग्रहणम् — वक्रे १ मृत्युः । करे ४ धनं । पादयोः ६ प्रवासं । वामहस्ते ४ भयं । उदरे ५ श्रियाप्तिः । नेत्रे २ प्रीतिलाभः । गुह्ये २ मरणमुरुभयं । ललाटे ३ पट्टबन्धः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

२३ अङ्गग्रहणम्

नेत्रे द्वे प्रीतिलाभं मरणमुरुभयं गुह्य ऋक्षद्वयं च
लालाटे त्रीणि ऋक्षं दिनकरतनयः पट्टबन्धं करोति ॥१२॥

अथ राहोः

[४]वक्त्रैकं राहुसंस्थे मरण गदभयं नेत्रगे द्वे भयं स्याद्–
भाले त्रीणि विनाशं चतुरमपि शिरस्युद्गरादींश्च रोगान् ॥
वामे हस्ते चतुर्भिर्मृतिरपि च गुदे तद्वदेवं फलं स्यात्
कण्ठे संस्थेऽपि मृत्युं परमरहसितं भूमिसंख्या भिधानम् ॥१३॥

कुक्षौ विनाशो भवतीषुसंख्यया बाहौ च दक्षे चतुरश्च मृत्युः ।
अङ्गानि राहोश्च फलं यथाक्रमं भवन्ति पुंसां युधि मङ्गलेषु ॥१४॥

अथ ग्रहावस्था

दीप्तः स्वस्थो मुदितः शान्तः शक्तः प्रपीडितो भीतः ।
विकलः खलश्च दीनो ज्ञेया एवं दश ग्रहावस्थाः ॥१५॥

स्वोच्चो भवति च दीप्तः स्वस्थ स्वगृहे सुहृद्गृहे मुदितः ।
शान्तः शुभवर्गस्थः शक्तः स्फुरत्किरणजालश्च ॥१६॥

विकलो रविलुप्तकरो ग्रहाऽभिभूतः प्रपीडितो ज्ञेयः ।
पापगृहस्थश्च खलो दीनो नीचोऽरिभवनगतो भीतः ॥१७॥

उच्चादि शत्रुमित्र विवेकः

---

४ राहोरङ्गग्रहणम् – वक्त्रे १ मरणगदभयं । नेत्रे २ भयं । भाले ३ विनाशं । शिरसि ४ रोगाः । वामे हस्ते ४ मृतिः । गुदे ४ तद्वदेवं फलं । कण्ठे १ मृत्युः । कुक्षौ ५ विनाशः । दक्षिण बाहौ ४ मृत्युः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ब्रम्हसंहितायाम्–

रवेः समोज्ञः सितसूर्यपुत्रावरी परेये सुहृदो वराटा[१]ः ।
चन्द्रस्य नारी रविचन्द्रपुत्रौ मित्रे समाः शेषनभश्चराः स्यु ॥१८॥

समौ सितार्कौ शशिजश्च शत्रुर्मित्राणि शेषाः पृथिवीसुतस्य ।
शत्रु शशी सूर्यसितौ च मित्रे समाः परे स्युः शशिनन्दनस्यः ॥१९॥

गुरोर्ज्ञशुक्रावरिसंज्ञकौ तौ शनिः समोऽन्य सुहृदो ग्रहेन्द्राः ।
शुक्रस्य मित्रे बुधसूर्यपुत्रौ समौ कुजेज्यावितरावरी तौ ॥२०॥

शनेः समो वाक्पतिरिन्दुसूनु – शुक्रौ च मित्रे रिपवः परेऽपि ।
एवं ग्रहाणां चतुराननेन शत्रुत्वमित्रत्वसमत्व मुक्तम् ॥२१॥

अथ वराहः–

शत्रू मन्दसितौ समश्च शशिजो मित्राणि शेषा रवे–
स्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः ।

जीवेन्दूष्णकराः कुजस्यः सुहृदौ ज्ञोऽरिः सितार्कौ समौ
मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे ॥२२॥

सूरेः सौम्यसितावरी रविसुतो मध्यो। परेत्वन्यथा ।
सौम्यार्कौ सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी ।

शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरस्य चान्येऽरयो
ये प्रोक्ताः सुहृदस्त्रिकोणभवनास्तेऽमी मया कीर्तिताः ॥२३॥

---

[१] खेटाः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अन्योऽन्यस्य घनव्ययायसहजव्यापारबन्धुस्थिता
स्तत्काले सुहृदः स्वतुङ्गभवनेऽप्येकेऽरयस्त्वन्यथा ।
द्वेकानुक्तभपान् सुहृत्समरिपून् संचिन्त्य नैर्सगिकां-
स्तत्काले च पुनस्तु तानधिसुहृन्मित्रारिभिः कल्पयेत् ॥२४॥

भगवान् गर्गः—

मूलत्रिकोणाद्धिधर्मस्वान्त्यबन्धुतदुच्चपाः ।
नैकर्क्षगाश्च चारेण सुहृदो यवनोदिताः ॥२५॥

व्यासः—

अर्कादिसुहृदो जीवो जीवज्ञौ बुधभार्गवौ ।
व्यर्का विभूजा वीन्द्वर्का विकुजार्केन्दवस्तथा ॥२६॥

माण्डव्यः—

मूलत्रिकोणाद् घनधर्मबन्धुपुत्रव्ययस्थानगता ग्रहेन्द्राः ।
तत्कालमेते सुहृदो भवन्ति स्वोच्चे च ये यस्य विकृष्टवीर्यः ॥२७॥

नारदः—

मेषवृश्चिकयोर्भौमः शुक्रस्तौलिवृषेश्वरः ।
बुधः कन्यामिथुनयोः शनिर्मकरकुम्भयोः ॥२८॥

धनुर्मीनाधिपो जीवः कर्किसिहेन्दुभास्करौ ।
निजराशिगतः खेटः फलमर्धं प्रयच्छति ॥२९॥

श्रीपतिः—

स्वोच्चे पूर्णां चरणरहितं स्वत्रिकोणे स्वभेऽर्धं
नागांशानां त्रयमधिसुहृद्गेहगे मित्रभेऽङ्घ्रिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अंशोऽष्टानां समगृहगते भूपभागोऽरिगेहे
दन्तांशानामधिरिपुगृहे नीचगे शून्यमेव ॥३०॥

अस्यार्थः– उच्चे (शुभ) फलम् ६०, अशुभं शून्यम् । मूलत्रिकोणे शुभफलम् ४५, अशुभम् १५ । स्वक्षेत्रे शुभम् ३०, अशुभम् ३० । अधिमित्रगृहे शुभम् २२।३०। मित्रगृहे शुभम् १५। समगृहे शुभम् ७।३०। शत्रुगृहे शुभम् ३।४५ अधिशत्रुगृहे शुभम् १।५२½ । नीचक्षेत्रे न किंचिच्छुभम् ।

सूर्यादिनामुच्चराशयः

मेषो वृषो मृगः कन्या कर्किमीनौ वणिक् क्रमात् ।
सूर्यादितुङ्गा विज्ञेयास्तत्तत्सप्तमनीचगाः ॥३१॥

परमोच्चभागाः

दशत्रिमनुयुग्दिवसाः पंच ऋक्षाणि विंशतिः ।
परमोच्चांशका ह्येते सूर्यादीनामनुक्रमात् ॥३२॥

वराहः—
सिंहो वृषः प्रथमषष्ठहयाङ्गतौलि—
कुम्भास्त्रिकोणभवनानि भवन्ति सूर्यात् ।
वर्गोत्तमाश्चरगृहादिषु पूर्वमध्य–
पर्यन्तगाः शुभफला नवभागसंज्ञाः ॥३३॥

सारावल्याम्—
मूलत्रिकोणोच्चस्वराशिमर्यादानिर्णयः ।
विंशतिभागाः सिंहे त्रिकोणमपरे स्वभवनमर्कस्य ।
उच्चं भागत्रितयं वृषे इन्दोः स्यात् त्रिकोणमपरेंऽशाः ॥३४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

२३ अङ्गग्रहणम्

द्वादशभागा मेषे त्रिकोणमपरे स्वभं तु भौमस्य ।
उच्चफलं कन्यायां बुधस्य तिथ्यंशकैः सदा चिन्त्यम् ॥३५॥

परतस्त्रिकोणजातं पञ्चभिरंशैः स्वराशिजं परतः ।
दशभिर्भागैर्जीवस्त्रिकोणमपरे स्वराशिश्च ॥३६॥

शुक्रस्य तौल्यमर्धं त्रिकोणमपरं स्वराशिश्च ।
कुम्भेत्रिकोणनिजभे रविजस्य य थाखौ सिंहे ॥३७॥

अंगग्रहणम्

अथ दृष्टिबृहज्जातके–

त्रिदशस्त्रिकोण चतुरस्रसप्तमान्यवलोकयन्ति चरणाभिवृद्धितः[1] ।
रविजामरेज्यरुधिराः परे च ये क्रमशो भवन्त्यखिलवीक्षणेऽधिकाः ॥३८॥

अत्र कुजशनिगुरूणां विशेषदृष्टिमाह श्रीपतिः–

त्रिद्वेकपादाः क्रमशो निधेयाः शनैश्चराचार्यमहीसुतानाम् ।
त्रिकर्मणो धीसुतयोश्च रन्ध्रबन्धुस्थितानामिह पूर्णदृष्टिः ॥३९॥

कश्यपः—

पश्यन्ति कामं सकलैश्च नेत्रैः पादेन हीनैर्निधनं सुखं च ।
अर्धं श्च नेत्रैः सुतभं च पुण्यं पादेन पश्यन्ति वियत्सहोत्थम् ॥४०॥

शुक्रार्कचन्द्रसौम्यानां शक्तिः सकल दृष्टिषु ।
पादहीने कुजस्याहुरर्वं पादे गुरोः शनेः ॥४१॥

---

[1] सप्तगानवलोकन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अस्यार्थः—

भौमः स्वस्थानाच्चतुर्थाष्टमस्थानं संपूर्णं पश्यति । गुरूः स्वस्थानात् पञ्चम नवमस्थानं संपूर्णं पश्यति । शनिः स्वस्थानात् तृतीयदशमस्थानं संपूर्णं पश्यति । मङ्गलगुरूशनैश्चराणामेषु प्रोक्तस्थानेषु, इयं विशेष दृष्टिः । सूर्यचन्द्र बुध शुक्राणां स्वस्थानात् सप्तमे संपूर्णं दृष्टिः । मङ्गल गुरूशनैश्चराणामपि सप्तमे संपूर्ण दृष्टिः । तृतीयदशम स्थानयोश्चरणदृष्टिः । पञ्चमनवस्थानयोरर्धदृष्टिः । चतुर्थाष्टमस्थानतोस्त्रिपाददृष्टिः । अत्र भगवता शुकेनेष्टफलं कष्टफलं चैकेनैव श्लोकेन व्याख्यायते

स्ववीर्यपुष्टे हितसौम्यदृष्टे तद्वर्गजुष्टे परिपूर्णमिष्टम् ।
अर्कप्रविष्टे रिपुयुक्तदृष्टे पापोपसृष्टेऽधिकमेत्र कष्टम् ॥४२॥

इतिश्री सारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने ऽङ्गग्रहोच्चदृष्टि शत्रुमित्रबृत्तादि निर्णय विवेकाऽध्यायः ॥

अथ चतुर्विंशोऽध्यायः

कालज्ञानम्

त्रिस्कन्धात्मकं ज्योतिःशास्त्रमाद्यं कालज्ञानोपलक्षितम् गणकवल्लभे–

शीतांशुपक्षकृत शुद्ध ४२१ शकेश्वराब्दा—
स्त्रिघ्ना वियद्गगनेत्र २०० हताश्चलांशाः ।
येऽल्पास्तदंवुनिधिगन्धवहा ४९४ वशेषा—
गम्यद्वयोः परचले सति ते धनाख्याः ॥१॥

CC-0. Nepal Sanskrit Academy, Kathmandu

कल्पादितः परचलं खखषड्गुणा ३६०० ब्दै—
र्भांशेषु चैतदनुवृत्तिनिवर्तने स्तः ।
चक्रस्य पूर्वचलनं च ततोऽपमोऽत्र[१]
कुर्यादृणस्वमनुवृत्तिनिवृत्तिशेषौ ।।२।।

स्वाक्षच्छाया विषुवति स्वदेशे या दिनार्धजा ।
तुलाजसंक्रमच्छायायोगार्धं द्युदले तथा ।।३।।

लङ्कोदया नागमहीन्ध्रपक्षा नन्दाङ्कदस्रा गुणनेत्ररामा ।
क्रमाद्विलोमात् क्रमतो विलोमान्न्यस्ता अमीस्युः क्रिय पूर्वकाणाम्।।४।।

मेषादीनां लङ्कोदयविनाड्यः—

मेषे, मीने २७८ । कुम्भे, वृषे २९९ । मकरे, मिथुने ३२३ । धनुषि कर्कटे ३२३ । सिंहे वृश्चिके २९९ । कन्यातुलयोः २७८ ।

अथ चरखण्डानयनम्—

स्वाक्षप्रभादशहता वसुताडिताः स्यु—
राद्यास्त्रिभिर्विभजिताश्चरखण्डकानि ।
तद्वत्स्थितैश्चरदलै रहिताश्च मध्य
षट्के युतास्तनूदया निजदे जाः स्युः ।।५।।

अत्र भूमध्यरेखायाः श्रीशिवराजधानी[२] पूर्वस्यां दिशि रूप्ततियोजनान्तरिते वसति । तत्र विषुवतिच्छायाङ्गुलानि ५।४२। तत्र मेषादिस्वदेशोदयविनाड्यः । प्रथम चरखण्डपलानि ५७ द्वि. ४६ तृ. १९ मीनमेषयोः २२१ वृषकुम्भयोः २५३ मिथुनमकरयोः ३०४ कर्कचापयोः ३४२ सिंहवृश्चिकयोः ३४५ कन्यातुलयोः ३३५।।

---

[१] ततोभयत्र । [२] काशी ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ दिनमानानयनम्

सायनार्कभुजराशिसंख्यया संनिवेश्य चरखण्डकं समम् ।
एष्यखण्डगुणितं लवादिकं स्वस्वमानहृतलब्धसंयुतम् ॥६॥

स्युश्चरार्धजनिता विनाडिकाः सौम्यदक्षिणकपालगे रवौ ।
खाभ्रशैलनयनेषु २७०० संयुता वर्जिता भवति तन्निशादलम् ॥७॥

अथ लग्नानयनम्

तात्कालिकस्य सचलांशकतिग्मभानो—
र्भोग्यांशकास्तदुदयेन हताः खरामैः ।
भक्ता फलं विघटिकानिचयादभीष्टा
त्यक्त्वा क्षिपेद्दिनकरेऽपि च राशिमेकम् ॥८॥

यावन्त एव नियतन्न्युदयाश्च शेषात्
संयोजयेदहिरोचिषि तांश्च राशीन् ।
शेषात् खराम ३० गुणितादगतोदयेन
लब्धांशकाद्यमपि तिग्मकरे निदध्यात् ॥९॥

संशोधिताऽयनमभीष्टविलग्नकं स्यात्
तद्राशिषट्कयुत मस्तविलग्न माहुःन ।
तिग्माशुभुक्तलवजंफलदिष्टकालम्
त्यक्तोदयानपि विलोमदिने तु राशीन् ॥१०॥

शेषाच्च खाग्निगुणिताबगतेन लब्धं
जह्यादिदं खलुनिशान्तविलग्नकं स्यात् ॥
भानौ तु पश्चिमकपालगतेभषट्कं
दत्वाऽऽनयेदुदयमस्तमयेष्टकालात् ॥११॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अथोदयलग्नानयनम्

भोग्यं भुक्तफलं यदा समधिकं स्यात् स्वेष्टकालात्तदा
स्वेष्टं खाग्नि ३० हतं निजोदयहृतं लब्धांशयुक्तो रविः।
लग्नं तद्रविमध्यसंस्थितलवा स्वीयोदयघ्ना हृताः
कालः स्याद् गगनाग्निभिर्गृहरवी एकोदयस्थौ यदि ॥१२॥

लग्नार्कयोः सायनयोर्भोग्यांशाः हीनकस्य वा।
अधिकस्य च भुक्तांशाः स्वस्वोदय समाहताः॥
खाग्नि ३० भक्ता विनाड्यः स्युस्तामध्योदयसंयुताः।
षष्टया ६० विभाजिताल्लब्धमिष्टकालस्य नाडिकाः ॥१२॥

मध्याह्नसूर्ययोर्मध्यकालस्यान्नतसंज्ञकः।
सूर्यक्षितिजयोर्मध्यकालःस्यादुन्नताभिधः ॥१४॥

अथ मध्याह्नच्छाया

सायनस्य तरणे[1]र्भुजांशका द्विस्थिता जलधिबाण ५४ भाजिताः।
लब्धवर्गसहितैर्महेश्वरै ११ रंशका विभजिता फलं हि तत् ॥१५॥

सायनार्कयमसौम्यगोलयोः कारयेद्धनमृणं पलद्युतौ।
सा प्रभा निगदिता मनीषिभिस्तिग्मरोचिषि खमध्यमाश्रिते ॥१६॥

इष्टकर्णानयनम्

छायाकृतिर्द्वादशवर्गयोगान्मूलं श्रुतिःस्यादथकर्णवर्गात्।
शङ्कोःकृतिं प्रोझ्य पदं प्रभा स्याच्छङ्कुस्तु तद्वर्गवियोगमूलम्॥१७॥

---

[1] सायनांशतरणे क. च.।

CC-0. Nepal Sanskrit Academy, Kathmandu

त्रिघ्नोन्नतं तद्दिनखण्डभक्तमवाप्तराश्यादिभुजांशकाद्यम् ।
पृथक् स्थितं शैलगजै ८७ विभक्तं फलस्य वर्गेण समेतमेकम् ॥१८॥

गुणेषु ५३ षष्टयां ६० शयुतं हरः स्याद् भागाहतास्तेन हरेण लब्धम् ।
छेदो भवेत् तेन खवह्नि ३० निघ्नान्मध्याह्नकर्णात् फलमिष्टकर्णः ॥१९॥

अथेष्टनतघटिकासाधनम्

अभिमतश्रवणं खदिनार्धजंश्रुति वियोगहृतं कथितो हरः ।
दिनदलाद् विशरात् ५ खशरो ५० द्धृतात् फल विहीन
हरेण शरो ५ नितात् ॥२०॥

धृतिहताद् द्युदलाद्विहृतात्फलं यदिह तस्य पदं नतनाडिका ।
हरिजलेश कपालगते रवौ दिनदलो १५ नयुता गतनाडिकाः ॥२१॥

लघुमानसे–

क्रियादिस्थे सायनार्के पलभाप्त विशोधयेत् ।
संयोजयेत्तुलादौ तु चरादादिमसंज्ञकात् ॥२२॥

पञ्चघ्नेष्टचरार्धेन पलभाप्तेन संस्कृताः ।
आद्याच्चरगुणादह्ना दिगूनेन दिनार्धभा ॥२३॥

छायार्कवर्गसंयोगान्मूलं कर्णस्ततोऽपभा ।
इष्टकर्णस्वमध्याह्न कर्णान्तरहृतो गुणः ॥२४॥

विदिग्दिन शतांशोन गुणकेन विदिग्दिनात् ।
नवाहतात्फलं यत् स्वात्तन्मूलं नतनाडिकाः ॥२५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

विदिग्दिनान्नवाऽभ्यस्तान्नत कृत्यांशको युतः ।
विदिग्दिन शतांशेन गुणोऽसौ व्येकको हरः ॥२६॥

तदैक्याच्छङ्कु वर्गघ्नान्मध्यच्छायागुणा हृतेः ।
कृत्या युतात्पदं यत् स्यात् तस्माच्छेदाप्तमिष्टभा ॥२७॥

श्री विश्वेश्वरराजधान्यामक्षरसंज्ञया चरणच्छायामवलम्ब्य घटिकाज्ञानम् ।

मेषकन्ययोः–

भास ७४ स्तलं ३६ भद्र २४ सुपुत्र १७ गोकुलं १३
कपोल ११ धान्यं ९ सुग ७ तत्र ६ तापनम् ।
भोग ४ द्वयं ४ बाल ३ गिरौ ३ गये ३ त्यम्
मेषेऽपि योषित्यपि वृद्धिसंध्ययोः ॥२८॥

वृषसिंहयोः–

बन्धु ९३ नवं ४० मख २५ हयाङ्क १८ भयं २४ पापट ११
धान्यं ९ छलं ७ तट ६ मयं ५ भट ४ गौर ३ गानं ३ ।
केली १ करा १ वितिपलक्षयवृद्धिक्लृप्ति
कण्ठीरवस्य वृषभस्य च संप्रदिष्टः ॥२९॥

कर्किमिथुनयोः–

स्कन्धे ९१ रयोः ४२ सुख २७ धियं १९ वट १४ खंपयोगौ ११
धात्री ९६५ तार १६ शय ५ वीर ४ गिरी ३ प्रगे २ श्रीः २ ।
पाया १ ङ गिराविति यमेण्वुभयोर्दिनेशे–
च्छायावशेन चरणस्य पलर्धिहानी ॥३०॥

CC-0. Nepal Sanskrit Academy, Kathmandu

तुलामीनयोः—

वन्देर्ध चागां ३९ रु २६ धियं १९ तपेन १६
श्रियं १२ नयं १० जाल ८ सुगं ८ तलं ६च६
शीली ५ शरः५ शयि ५श५ मित्यवादि
मानं घटेङ्कश्चरमोन मीने ॥३१॥

अलिकुम्भयोः—

अङ्का अमी एव चतुर्दशान्तः कीटे च कुम्भे चरमाङ्कहीनाः ।
शुद्धः ९५ कवि ४१ नगि ३० नरौ २० चयेन १६
वकार १३ कोक ११ श्चीनया १० ब्धि ९ देयम् ८ ॥३२॥

धनुर्मकरयोः—

सर्गः शकः ७ से ७ तिपुरे पुरारे श्चापे मृगे चाभिहितं प्रमाणम् ।
गतैष्यपादान्तर षष्टि ६० ताडिता गतैष्यनाडी ध्रुवकान्तरेण ॥३३॥

लब्धादिनाड्यो गतनाडिकाश्चः स्थले नियोज्याः पलमिष्टकालः ॥३४॥

पादपा भास्कराऽभ्यस्ता भाजिता गिरिसंख्यया ।
शङ्क्वङ्गुलेति विज्ञेया श्री धराचार्य निर्मिताः ॥३५॥

सूर्याधिष्टितमारभ्य मध्यादृक्षाद् गणय्य च ।
सप्तोना द्विगुणीकृत्य निशायां गत नाडिका ॥३६॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्ट श्रीलक्ष्मणाचार्य विरचिते
जगन्मोहने कालज्ञानाध्यायः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ पञ्चविंशोऽध्यायः

सुस्वप्न फलम्

महात्मनां स्वप्नोऽन्यथा नभवतीत्यतः स्वप्नाध्यायो लिख्यते ।

स्वप्नाञ्छास्त्र सुसिद्धान् तथानुभूतान् स्वयं वक्ष्ये ।
आगन्तुकान्, ज्ञायते यैश्च शुभं हीनं च तत्वेन ॥१॥

स्वप्नः प्रथमे यामे स संवत्सरैकफलदः स्यात् ।
संवत्सरार्धफलदो द्वितीययामे त्रियामायाः ॥२॥

मासत्रयेण तृतीये यामे नृणां स्फुटं फलदः ।
मासैकफलो दृष्ट श्चतुर्थयामे भवेत्स्वप्नः ॥३॥

चरमनिशाघटिकाद्वयसमये फलति ध्रुवं दशाहेन ।
सूर्योदये तु दृष्टः सद्यः फलदायको भवति ॥४॥

इष्टं दृष्ट्वा स्वयं यः स्वप्यान्नश्यति फलं तस्य ।
नेया निशापि सुधिया प्रियदेवस्तवनदर्शनध्यानैः ॥५॥

देवगुरूपूजनरतो ध्यातः प्राभातिकः प्राप्तः ।
नवफलतण्डुलहस्तः कथयेन्तद्भूमिदेवानाम् ॥६॥

पूर्वमनिष्टं दृष्ट्वा स्वप्नं यः प्रेक्षते शुभं पश्चात् ।
स तु फलदस्तस्य भवेद् वक्तव्यं चोभयं तस्य ॥७॥

स्वप्नमनिष्टं दृष्ट्वा पुनरपि स्वप्यान्निशावसानं च ।
नक्तं कथमपि न वदेत् केषांचित् फलति न स यस्मात् ॥८॥

CC-0. Nepal Sanskrit Academy, Kathmandu

उत्थाय ततः प्रातर्ध्यायति यः केशवं जगद्वन्द्यम् ।
वृद्धं नमति स्तुतियुक्तो वृथा स करोति दुःस्वप्नम् ॥९॥

पूज्यादीन् परिचाययति देवद्विजवन्दको नित्यम् ।
सततं धर्मरतः स्याद् दुःस्वप्नं तस्य सुस्वप्नम् ॥१०॥

देवगुरूणां स्मरणं नामग्रहणं सुतीर्थानाम् ।
कृत्वा स्वपिति निशायां न कदाऽप्याप्नोति दुःस्वप्नम् ॥११॥

स्वप्ने मानवमृगपति तुरङ्गमातङ्गमृगसुरभीभिः ।
युक्तं रथमारूढो याति स भूम्याः पतिर्भवति ॥१२॥

शुभ्रेण दक्षिणस्यां[1] यः फणिना दश्येत निजभुजायाम् ।
आसादयति सहस्रं स नरः कनकस्य पञ्चरात्रेण ॥१३॥

सद्यश्छिद्येत शिरः स्वप्ने चात्मीयमात्मना चैव ।
सोऽपि प्राज्यं राज्यं लभते रङ्कोऽपि नियमेन ॥१४॥

लिङ्गच्छेदे लभते सौभाग्यं योषितः पुमान् पश्चात् ।
योनिच्छेदे लभते योषा पुरुषात् तदेव फलम् ॥१५॥

छिन्नां यो रसनां स्वां शस्त्रैः, स्वप्ने स्वयं स मासेन ।
क्षत्रियतनुजो राज्यं शेषस्तु विशेषतोऽधिपतित्वम् ॥१६॥

आरूढः शुभ्रमिभं नद्यन्तशालिभोजनं कुरुते ।
भुङ्क्ते भूमिमखिलां स जातिहीनोऽपि धर्मधनः ॥१७॥

---

[1] भुजबाहूः प्रवेष्टो दोरिति भुजशब्दः पुंलिङ्गे वर्ततेऽतो 'दक्षिणस्मि' 'निजभुज' इतिभाव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

यः सूर्या चन्द्रमसोर्बिम्वं ग्रसते समग्रमपि पुरुषः ।
पालयते दीनोऽपि च स महीं नित्यं ससागरां धन्यः ॥१८॥

यो मानुषीयमामिषमात्मीयं चापि मानुषैः सार्धम् ।
स्वेच्छं स्वप्ने खादति साम्राज्यं प्राज्यमाप्नोति ॥१९॥

प्रासादतुङ्गशृङ्गे भुक्त्वा यस्तरति तोयमगाधम् ।
दासकुले जातोऽपि च मनुजपतिर्जायते नूनम् ॥२०॥

छर्दिपुरीषे पुरुषः खादितुमिच्छु[1] र्ज्जुगुप्सितो येन ।
दर्शनमनुलेपो वा यस्य तयोस्तु[2] लाभः स्यात् ॥२१॥

यो मानुषस्य मस्तक चरणभुजस्यापि भक्षणं कुरुते ।
राज्यं कनकसमृद्धं क्षिप्रं प्राप्नोति निर्धनोऽपि ॥२२॥

मद्य सद्योमांसं घ्रात्वा स्वादयति वीक्षते लभते ।
ताभ्यामङ्गाभ्यङ्गो यस्य भवेत् तस्य धनवृद्धिः ॥२३॥

नलिनीदले निषण्णो मध्ये शलिलाशयस्य परमान्नम् ।
घृतखण्डयुतं भुङ्क्ते पूज्यः स च राज्यमाप्नोति ॥२४॥

मूत्रं शुभ्रं शोणितमपि पिवति गृहीतपात्रेषु ।
एषां यस्यालोकनलेपः स्यात् तस्य धनवृद्धिः ॥२५॥

भक्षति वीक्ष्य शुभफलकुसुमानि चिनोत्यवाप्नोति ।
यः स्वप्ने, भवति मुहुर्गृहाङ्गणे तस्य पृथुलक्ष्मीः ॥२६॥

---

[1] मिच्छेज्जुगुप्सितो. पा । [2] स्तस्य पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

आरोप्य धनुषिमौर्वी निर्भरं भरितसकलदिग्वलयः ।
मोहयञ्छत्रुशैन्यं प्राप्नोति स संपदं सपदि ॥२७॥

विवधं[1] धवमप्यनिलं घनान् यो धत्ते विपक्षिणां चैव ।
प्रक्षेपणं च[2] गुप्तं स संपद ज्योतिषि नियतम् ॥२८॥

यस्य च किल विवादे रणे रिपूणां पराजयो भवति ।
मण्डलमहिलाग्रहणं प्रजायते तस्य धनवृद्धिः ॥२९॥

भक्षयति वीरयाने प्रासादे क्षीरवृक्षस्थः ।
यः कनकरजतपात्रे प्राप्नोति भूपतित्वं सः ॥३०॥

नगनगर ग्रामवनैः सहितां भूमिं समुद्रसंवीताम् ।
तरति च यो भुजगाभ्यां नीचोऽप्यचिरेण नृपतिः[3]स्यात् ॥३१॥

यो नावमधिरोहति तस्यामुत्तरति भृशमभिन्नायाम् ।
कृत्वाप्रवासमारात् कृतकृत्यः स पुनरायाति ॥३२॥

म्रियते पुरूषो विषेण च यः पिवति विषं निर्भत्स्र्य यः पश्चात् ।
उपचीयते च भोगैः संत्यज्यते च वश्यत्वम् ॥३३॥

यो रक्ताभ्यक्तांगः स्वप्ने यदि वीक्षते मनुजः ।
जयति धनधान्यलक्ष्म्या नृपलक्ष्मीस्तमुपलक्षयति ॥३४॥

रधिरनदीषु निमज्जनं पानं च यस्य रुधिरेण ।
रधिरश्रावगात्रं तस्य स्याद्धनवृद्धिः ॥३५॥

---

१ विधवं, ख । २ क्षेपण्यां च गुप्तौ, ख । ३ स नृपः स्यात्, ख ।

CC-0. Nepal Sanskrit Academy, Kathmandu

यः[1] स्वयमपि घातयति स्वप्ने यस्याऽभिपात्यते चरणौ[2] ।
लभते कनकसहस्रं सभूमिभागाश्च भूमिपतिः ॥३६॥

यस्मिन् वा तस्मिन् वा निजजिह्वा लिखति चेत्क्षणमपि ।
माण्डलिको भुवि लभते राज्यं शेषस्तु खलु लक्ष्मीम् ॥३७॥

या नारी नरभावं नारीभावं नरश्च लभते यः ।
तौ वर्द्धेते सार्धं कुटुम्ववृद्ध्या च सहबह्वचा ॥३८॥

आरूह्य मत्तकरिणं देहिनमन्यं बुध्यते स्वप्ने ।
यदि भीतो पापात्तेन स्यात्तस्य धनलाभः ॥३९॥

यः सिन्धुजमारूढो मृण्मयमपि पिवति तोयमगाधम् ।
यो बुध्येत तथैव तृषा स सत्यं च महीपतिः ॥४०॥

पार्थिव इति यः कथितः प्रथमं चौरस्ततोऽवनेः[3] पश्चात् ।
ध्रुवमनुसरति स्वप्ने स युज्यते प्राज्यराज्येन ॥४१॥

मूत्रपुरीषैः पुरूषः स्वप्ने यः स्वपिति लिप्तपूर्वाङ्गः ।
मध्ये रमस्यान (रमस्थान) भयः प्राप्नोति स राज्यराष्ट्रफलम् ॥४२॥

यो याति दिशमूदीचीं प्राचीं वा गौरगोयुतं यानम् ।
अर्थे रूढो जार्गति च गाढं तस्याति लाभः स्यात् ॥४३॥

अङ्गप्रत्यङ्गयुता नखरोमविर्वाजिता तनुर्यस्य ।
वृद्धिः समेति तं नरं प्रसरति सर्वत्राऽतुला लक्ष्मीः ॥४४॥

१ यस्याभिघात्यते च राशिः अ । २ इतः ४४ श्लोक पर्यन्तं च पुस्तके नास्ति । ३ वचनं अ.क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

यः पातयति निकेतं स्वप्ने द्वारं च विवृणोति ।
व्यसनात्प्रमुच्यते स त्वरितं प्राप्नोति धान्यादि ॥४५॥

जाग[1]र्ति यस्तु सितमसिधेनुं धेनुमुपानहौ[2] लब्ध्वा ।
पदवीं दवीयसीमपि गत्वा स त्वरितमायाति ॥४६॥

पानं पाने तु नरः पिवति निबद्धो मुच्यते यदि वा ।
विप्रस्य सोमपानं शेषस्य धनसमृद्धिः स्यात् ॥४७॥

आजानुनिविडनिगडैर्यो भुजबन्धेन वा निवध्येत ।
न भवति भयं तस्य पुनः प्रतिष्ठाप्यकष्टेन ॥४८॥

यो नगरं मन्त्रतन्त्रैर्ग्रामं वा वेष्टयेत् स्वयं स्वप्ने ।
नगरे बसुधाधिपतिर्ग्रामे वा भवति माण्डलिकः ॥४९॥

निम्नगाकूपान्तोपेतामधिरोहति स्थलीं भीतः ।
दिष्टचा समेधया वा समेधते विश्व धान्ये ॥५०॥

सरितः सरांसि पद्मान्युद्दामानि प्रकृतिसिद्धानि ।
यः शोकार्तः पश्यति शोकेन स मुच्यते त्वरितम् ।५१॥

खादन्ति वेष्टयन्ति यं स्वप्ने मशकमक्षिकादंशाः ।
प्राप्नोति प्रोषितोऽपि स योषितमुचितामचिरेण ॥५२॥

पीतं फलं प्रभूतं रक्तं वा दीयते ध्रुवं येषाम् ।
कनकस्य भवति लाभः सपद्मरागस्य वा तेषाम् ॥५३॥

---

१ जार्गर्ति यस्तु सितमसिधेनुरूपान्डुहं लब्ध्वा ख. ।
२ मुपानहौ अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पश्यति करकमलां यः शुचिसचयोत्तरां नरो नारीम् ।
लक्ष्मीः सरस्वती वा तस्य प्रसन्ना भवेन्नित्यम् ॥५४॥

शुभाङ्गरागमण्डनवसनं दधती सयौवना युवती ।
यं परिरभेत तस्य स्याल्लक्ष्मीः सर्वतोऽभिमुखी ॥५५॥

कर्णे कुण्डलयुगलं मुक्ताहारो गले शिरसि मणिः ।
यस्याङ्गुदंभुजयुगे महीं महीपतिः स पालयति ॥५६॥

शुभ्राम्बरधराशोके रोदिति पश्येच्चितामरणम् ।
यस्य स्वप्ने लक्ष्मीं स लभते राज्यसुखयुक्ताम् ॥५७॥

इन्दुसमैः सितकुसूमैरूपहारं यो गले दद्यात् ।
नरपतीलक्ष्मीः कुरुते कर्मकरीत्वं स्वयं तस्य ॥५८॥

शेते मणिपर्यङ्के मणिसिंहासने स उपविशति ।
पुरूषैरूज्वलवेशैः परिचर्यो भवति पुण्यफलः ॥५९॥

निजपाणौ यो वीणामादाय वादयते विबुध्यते सहसैव ।
कुलधनधान्यं लभते रूपं कन्यां धनं धान्यम् ॥६०॥

देहावसान यस्य स्वप्ने शय्यासनं यानम् ।
जातं च ज्वालाकुलितं तस्य श्रीः सर्वतोऽभिमुखी ॥६१॥

वासोभिर्बहुलैः परिवेष्टितः पुमान् स्वप्ने ।
दहनेन भिद्यते खलु स श्रेयोभाजनं भवति ॥६२॥

लाभं पुष्पफलानां भक्षयति वीक्षते लभते ।
शाकानि पेशलानि स विन्दते संपदं सपदि ॥६३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

दृष्टिनिपातं बहुलच्छायापुष्पादिसंयुतं शैलम् ।
ज्वलदनलं यः पश्यति भवेद् ध्रुवं तस्य बहुलक्ष्मीः ॥६४॥

शकुनिं चतुस्पदं वा यः स्वप्ने समधिगम्य बुध्येत ।
अति रूपवतीं कान्तां लभते सपरिच्छदां नियमात् ॥६५॥

शिरसि ज्वलति निकेतं ग्रामपुरं यः सितोऽपि जागरितः ।
स्वप्नमस्वप्न दिवसे मनुजः साम्राज्यमाप्नोति ॥६६॥

गोवृषमानुषपृष्ठं प्रासादशिखरिशिखरं यः ।
आरूह्य चिन्तति जलधिं विबुध्यते तथैव स नृपस्यात् ॥६७॥

यः फणिवृश्चिककीट स्वापदादिभिर्यदश्यतेऽवश्यम् ।
न खलु हृदि भवति भीतः स वित्तमापद्यते सद्यः ॥६८॥

शान्ते पयसि स्नानं लेखनमवगाहनं च यः कुरुते ।
पत्नीबन्धुजनैः सह तस्य भवेद्धान्यबहुवृद्धिः ॥६९॥

मातापितरौ देवान् साधुन् ज्ञातीश्च वीक्षतेऽभीक्ष्णम् ।
मुञ्चति रोगी रोगान् विपर्ययो भवति विपरीते ॥७०॥

सितविहगं सिततुरगं सितमातङ्गं सितानि भवनानि ।
यः पश्यत्यधिरोहति लभते राज्यं च साम्राज्यम् ॥७१॥

धान्यचयान्यधिरोहति यो गिरिश्रृङ्गं वनानि फलितानि ।
सकलं चिन्तितमचिरात् तस्य भवन्नेह सन्देहः ॥७२॥

क्षीरद्रुममधिरोहति बहुलं फलितं घनच्छायम् ।
यो गायति च तत्रस्थः स प्राप्नोति बहुधनानि ॥७३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

स्वप्न शक्ररथध्वजदेवतायतनसंचयादीनाम् ।
वीक्षणमथाधिरोहो नृणां धनस्य वृद्धये भवति ॥७४॥

प्राकारवृक्षमन्दिर काञ्चनतोरण सितातपत्राणाम् ।
दर्शनमप्यधिरोहो धनधान्यकरो भवेत् पुंसाम् ॥७५॥

उल्काग्रहताराणां तडित्त्विषां नभोऽधिपतितानाम् ।
विस्फुर्जगर्जितानां प्रदर्शनं जायते च शुभम् ॥७६॥

पानं जलधिनदीनां तरणं चलनं फलप्रसूनानाम् ।
पचनं पूपादीनां[१] यः कुरुते तस्य भवति शिवम् ॥७७॥

मृण्मयभाण्डे चामे धनधान्यं धार्यते पशुप्राप्तिः ।
भूमिलाभाद् भूपत्वं मन्त्रस्य च लाभतोऽपि मन्त्रित्वम् ॥७८॥

पशुगोदोहः स्वमुखे वीणापरिवादनं च यः कुरुते ।
कुरुते वशगां क्षोणीं स संपदा युज्यते सपदि ॥७९॥

मित्राणां बन्धूनां स्वजनानां चारुवर्णवेषाणाम् ।
वीक्षणमथवाऽऽलपनमिष्टं नृणां चैव च स्वप्ने ॥८०॥

यो वृषभसरभसुरभीतुरङ्गमातङ्गमृगपतीनाम् ।
स्वप्ने पश्यतिरोहति लभते च तस्य भवति सुखम् ॥८१॥

सिंहासनरत्नचयप्रासादपशुविमानानाम् ।
वीक्षणमथवाऽधिरोहणं यः कुरूते स महीपतिः स्वप्ने ॥८२॥

स्वप्ने पूर्ण निशाकर दिनकरयोर्वा नवोदयं गतयोः ।
यच्चापि दर्शनं स्याद् राज्यश्रीः प्राप्यते तेन ॥८३॥

---

[१] चापूपादीनां, च पूपादीना वा पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वृक्षं समीक्षते यः फलितं लभते विचिन्तितं नित्यम् ।
अचिराच्च पुष्पितं दृष्ट्वा राज्यं वै स समाप्नोति ॥८४॥

यः पश्यति सर्वज्ञं स्थिरचित्तः स्वीयदेबतां चापि ।
तस्य भवेद्धनलाभो विपुलतरां बुद्धिसिद्धिश्च ॥८५॥

स्वप्ने वडवां क्रौञ्चां लब्ध्वा यः कुक्कुटीं च जागर्ति ।
बिन्दति सधनं कन्यां प्रियंवदां सुन्दरीं चापि ॥८६॥

पिबति स्निग्धं दुग्धं दोहनभाण्डस्थितं सफेनं यः ।
स्यात् तस्य राज्यलाभो माङ्गल्यं चाद्भुतं सुमहत् ॥८७॥

लाभे प्रदर्शने वा गोधूमानां धनागमः पुंसाम् ।
यज्ञागमो यवानां विद्यानां सर्षपानां स्यात् ॥८८॥

भूपा विप्रा गावो देवाः पितरश्च लिङ्गिनः स्वप्ने ।
यथा वदन्ति पुरुषं पुंसम् तत्तस्य तथैव स्यात् ॥८९॥

ध्वजसंभवो निशायां तरुवल्मीक गुल्मरोहणं नाभौ ।
स्यात्, पश्यतोऽपि सत्यं स्वप्ने युज्येत वहुलक्ष्म्याः ॥९०॥

सितविहगैः सिततुरगैर्यस्य भवति हि विगमनम् ।
त्रिदशविमानैकतया स महीं महीपतिर्भुंङ्क्ते ॥९१॥

प्रहुतहुताशनस्य ज्वालाजटिलस्य धूमरहितस्य ।
ग्रसनं स्वप्ने तु शुभं शुभावहं भवति पुरुषाणाम् ॥९२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

क्षेत्रे वारिविमोक्षो दर्शनलाभो[1] जातु धान्यानाम् ।
गृहसंस्थानं च तदा पुंसां सपदि सुखहेतुम् ॥९३॥

गमनं भगस्य स्त्रीणां यः कुरुते भक्षणं च वस्तूनाम् ।
विदधाति विगतशङ्कः स शङ्कते दैवतो नैव ॥९४॥

स्वप्ने मृग विहगानां वारिनिधौ शङ्खमीनशुक्तीनाम् ।
ग्रहणं भवतिद्विधा कल्याणकरं सदा पुंसाम् ॥९५॥

ग्रसनं[2] चैव सुधाया जलसेतोर्बन्धनं विधत्ते यः ।
व्यालस्य दन्तो ग्रहणं भवति शुभस्तस्य मनुजस्य ॥९६॥

चतुरङ्गस्य बलस्य प्रदर्शनं भवति यस्य पुरूषस्य ।
श्रमृतस्य तथा स्वप्ने न तस्य कल्याणवैकल्यम ।॥९७॥

विद्रुमवल्लीः शङ्खाञ्छुक्तीः शुक्लः कपर्दिका नियतम् ।
यः पश्यति बिन्दति वा स वित्तमाप्नोति न चिरेण ॥९८॥

केयूरहारमुकुटग्रैवेयकङ्कणाङ्गुलीयकादीनि ।
यः कर्णाभरणः वा लभते पश्यति शिवं तस्य ॥९९॥

कर्णावतंसशेखर ललाटिकापत्र वल्लरीः स्वप्ने ।
यः प्रेक्षते कुरुते च कलयति मनुजः सकल्याणम् ॥१००॥

नन्द्यावर्तकस्वस्तिकदीप पताका सुमृत्तिका दूर्वाः ।
माङ्गल्यान्यपराण्यपि यः पश्यति भवति तस्य शुभम् ॥१०१॥

---

[1] 'भवति' इत्यधिन पाठः केषु च न पुस्तकेषु वर्तते । [2] ग्रहणं पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

व्यजनचामरक कलश[1] भाजन मुकुट ध्वजात पत्राणाम् ।
लाभः स्वप्ने शस्तः स्पर्शो वा वृद्धये पुंसाम् ॥१०२॥

केलिश्च विलासिनिभिर्वस्त्रालङ्कारमण्डनयुताभिः ।
यस्य च कन्यालाभः शुभसम्पत्तिभवेत् तस्य ॥१०३॥

कार्मुकचक्रादीनि च स्वप्ने शस्त्राणि धौतधाराणि ।
पश्यत्यथ लभते यः स क्रीडति मेदिनी चक्रे ॥१०४॥

हृद्यानां सौधानां शयनासनधान्यवस्त्राणाम् ।
स्वप्ने शुभायलाभो दर्शनमपि शुभं तेषाम् ॥१०५॥

षष्टिकशालिक तण्डुलमुद्गकणाण्यजगन्धानि ।
पश्यति लभते भुङ्क्ते प्रजायते तस्य धनधान्यम् ॥१०६॥

स्वप्ने दर्शनलाभो वीणाया वादनं च यस्य स्यात् ।
यस्तूर्यशङ्खनादं शृणोति महत्पदं भवेत् तस्य ॥१०७॥

वापीकूपतडागेष्वारामेषु च यः परि भ्रमति ।
देवग्रहेषु स्थानं रचयति न चिरेण तस्य शिवम् ॥१०८॥

शत्रुं प्रति यात्रासु यजनोपहारपूजादीन् ।
यो विदधाति स्वप्ने तस्य भवेत् सर्वतो वृद्धिः ॥१०९॥

लक्ष्मीं सरस्वतीं वा दृष्ट्वा दिनपति बिम्बं प्रबुध्यते प्राप्तः ।
यो गोत्र देवतामपि ध्रुवं भवेत् तस्य धनधान्यम् ॥११०॥

---

[1] विजन श्रेणिकंकलश पाठान्तराणि ।

CC-0. Nepal Sanskrit Academy, Kathmandu

२५ सुस्वप्ना फलाध्यायः

कमलाकरत्नाकरजलसंपूर्णसरित्तरणम् ।
यः पश्यति लभतेऽसावनिमित्तं वित्तमतिबहुलम् ॥१११॥

स्वप्ने पीयूषरसं पुरूषो यः पिवति देवतादत्तम् ।
आरोहति गरुडं वा जयति महीं बाहुना स चिरम् ॥११२।-

सुरभिप्रसूनमालामम्लानां वीक्षते चाथ ।
लभते वा निःक्षिपति कण्ठपीठे वृणुते तं नरपतेलक्ष्मीः ॥११३॥

आज्यं प्राज्यं स्वप्ने यो विन्दति वीक्षतेऽथ गृह्णाति ।
तस्यास्य च हवनं वा क्षीरान्नेनैव सह शस्तम् ॥११४॥

गीत ध्वनिगज वृंहित वेद ध्वनिसिंहनादहयह्लेषाः ।
यो भृशमाकर्णयति प्रजायते तस्य बहुधान्यम् ॥११५॥

पुन्नागनागकेशरचम्पककेशरशिरीषतिलकानाम् ।
कुसुमफलसंकुलानां दर्शनमशनं शिवं नूनम् ॥११६॥

राजादनीमृद्वीकासहकारक्रमुकनारिकेलानाम् ।
दर्शनमप्यतिशिष्टं कदली जिह्मभक्षितानि तथा ॥११७॥

कुरूवककनकाशोकश्रीचन्दनमरीचपादपाः पुंसाम् ।
इष्टाः स्वप्ने दृष्टा ध्रुवं मुनिन्द्रैः शुभाः कथिताः ॥११८॥

एलालवङ्गवल्लीकर्पूरफलानि सुरभिगन्धीनि ।
जातीफलं च पश्यति यः खादति च तस्य भवति शुभम् ॥११९॥

CC-0. Nepal Sanskrit Academy, Kathmandu

श्रीवृक्षविल्ववकुलन्यग्रोधकपित्थपादपाः शुभदाः ।
अमृतापिवीरवृक्षः क्षीरतरूः सत्पलाशश्च शुभः[1] ॥१२०॥

मुचुकुन्दकुन्दजाती विचकीलनवमालिकाप्रसूनानि ।
यो लभते पश्यति वा यस्य शिवं जायते सततम् ॥१२१॥

श्वेतकरवीरयूथीशतपत्रीकेतकीवकुलकलिका: ।
चम्पकपाटलपुष्पं विन्दति यो वै शुभं तस्य ॥१२२॥

इक्षुलता ताम्बूल दलानि भक्षयति वीक्षते लभते ॥
येन सततं दृष्टं स्वप्ने हस्तगत इव तस्य धनलाभः ॥१२३॥

विपुलस्तु सरलविटपो वहुलफलकुसुमपूरितः सकलः ।
सुवर्णवर्णस्तु शुभोऽपि शुभस्तु दृष्टोक्तभः स्वप्ने ॥१२४॥

अपहारो नृत्यानां सीसत्रपुपित्तलादिधानूनाम् ।
दात्रादिपदार्थानां स्वप्ने शस्तो मनुष्यस्य ॥१२५॥

येषां लाभो न शुभः स्वप्ने तेषां शुभोऽपहारोऽपि ।
येषामशुभप्रायः पुंसस्तेषां शुभस्त्यागः ॥१२६॥

ये लोकव्यवहारेण शिवास्ते शोभनाः परा भणिताः ।
ये च शुभास्ते स्वप्ते विपरीताः केऽपि पदार्थाः शुभाः ॥१२७॥

कृत्स्नं कृष्णमशस्तं मुक्त्वा गोवाजिविप्रगजदेवान् ।
सकलं शुक्लं च शुभं मुक्त्वा कार्प्पासलवणानि ॥१२८॥

---

[1] व्यालावृक्षः क्षीरतरूस्तत्फलाशनं च शुभम् पाठान्तरम । विचकीलः मल्लिकाप्रभेदः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्य विरचितें जगन्मोहने सुस्वप्तफला ध्यायः

अथ षड्‌बिंशोऽध्यायः

दुःस्वप्तफलम्

विधितो[1] हिताय सुधिया साधुस्वप्नस्य विरचिता काचित्।
दुः स्वप्नस्य निबन्धं ध्रुवमूर्ध्वमितोऽभिधास्यामि ॥१॥

हरणं प्रहरणभूषणमणिमौक्तिककनकरूप्यरूप्याणाम् ।
धनमानग्लानिकरमातुरमरणावहं बहुशः ॥२॥

अपहारो हयवारणयानासनसदननिवसनादीनाम् ।
नृपशङ्काशोककरो मित्रविरोधोऽर्थहानिकरः ॥३॥

निजभार्यापहरणे वसुनाशः परिभवेन सुक्लेशः ।
गोत्रस्त्रीणां नृणां हरणे जायेत वधबन्धौ ॥४॥

जायेत यस्य हरणं निजशयने वाहने स्वप्ने ।
तस्य म्रियते दयिता नूनं स्वशरीर पीडाऽपि ॥५॥

करचरणानां छेदो मातापित्रोर्युगेव वधो भवति ।
कर्तनमखिलनखानां कूर्चकचानां चतुरस्तटीलोम्नाम् ॥६॥

अन्याङ्गावयवानां पुनरात्मजनभ्रंशदन्तानाम् ।
विनिपातो विनिपाति नाशाय श्रुतिकर्तनं भवति
स्वप्ने यस्य च नियतं कृच्छ्रमतुच्छं स आप्नोति ॥७॥

---

[1] विहिता पा.।

CC-0. Nepal Sanskrit Academy, Kathmandu

वपनं परितोऽपि स्याच्छिरसः कूर्चस्य यच्छरीरस्य
आधिव्याधिपरितः प्रयाति न चिरेण पञ्चत्वम् ॥८॥

वल्कलवल्लीरज्जुभिरहिकञ्चुकैस्तत्र तन्तुभिश्चापि ।
स्वप्ने परिवेष्टयति स्वाङ्गं तस्य ध्रुवं मरणम् ॥९॥

गृहगोधिभुजङ्गाः खर्ज्जूरादिकाः कीटकाः स्फुटं यस्य ।
स्वप्ने विशन्तिकर्णे स विनश्यति कर्णरोगेण ॥१०॥

रजनीकर दिनकरयोर्मण्डलभेदोपरागविनिपातम् ।
यो वीक्षते स काङ्क्षति पञ्चत्वं पंचरात्रेण ॥११॥

नयनामयप्रपाते ताराग्रह दीप विद्युतां[1] सद्यः
आभरणस्य यदङ्गादुद्ग्रहराग स्फुटी भवति ॥१२॥

द्वारगृहतोरणादिप्रे ङ्खवानलपादुकानिकेतनादीनाम्
भंजनमपि यः पश्यति तस्य कलत्रनाशः स्यात् ॥१२॥

छागमृगखरकरभरासभउष्ट्रवेसरऋक्षकादीनाम् ।
सुरणामध्यारोहो विक्षणशव्दा न तु शुभाः स्वप्ने ॥१४॥

अहिनकुलकोलजम्वुककौलेयवृक्षकनकजक्षगृध्राणाम् ।
स्वप्ने वीक्षणविचरणहतानि स च दूषणानि नृणाम् ॥१५॥

शशलोमसकुक्कुटिकापिपीलिकामूषिकादयः पुंसाम् ।
स्वप्ने दृष्टाः कष्टं नितरां वितरन्नि पदचाराः ॥१६॥

---

[1] ताराग्रहविद्युतां पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

चित्रकवस्तकगंजकविडालकपिशारिकादयो न शुभाः
स्वप्ने दृष्टाः कष्टं वितरन्ति सर्वमनुजानाम् ॥१७॥

कलविङ्ककाककौशिकखंजनवककपोतकङ्काश्च ।
निजयुद्धभृतः स्वप्नेदृष्टाः कष्टाय वै पुंसाम् ॥१८॥

कुलीरमकरजलौककुम्भीरककूर्मभेकादीन् ।
जलजन्तून् यः पश्यति विहीयते स धनधान्येन ॥१९॥

पीतकपिंजलतित्तिरकृकवाकुश्येनशकुनिगृध्राणाम् ।
युद्धविलोकननादः पुंसः क्लेशावहः शतशः ॥२०॥

जटवायसवककुक्कुटटिट्टिभप्रत्यूहकुररहारीताः ।
एते जलपक्षचरा दृष्टा न सुखावहाः पुंसाम् ॥२१॥

पक्षचरा[1] झिल्लीसनखाः षट्चरणा मसकदंशाद्याः
नशुभाः कीटा मत्कुणयूकाप्रमुखाश्च पदचराः ॥२२॥

स्वप्ने जननीयोन्यामथवान्यस्यां[2] यो नरो विशति ।
पञ्चाहः प्राणा न स जीवति निश्चितं ततः पश्चात् ॥२३॥

पाकस्थाने रक्तं प्रसूतिपवने प्रसूतिकानि च वने[3] ।
यो विशति विततगात्रो यमपुरयानं स विदधाति ॥२४॥

यः कूपविवरकन्दरलतासु तिमिरे च ।
विधिवशतो विशति पुमान् यःखलु विपदां पदं स स्यात्[4] ॥२५॥

---

[1] पक्षचरेषु झिल्लिकाः सनखा मसक द्रंष्ट्राद्याः +पा ।
[2] स्वप्ने जंननी योन्यां विशति नरो यो रक्षति पा । [3] वचने पा ।
[4] तस्य खलु विषदां पदं तत्स्यात् पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वपनं परितोऽपि स्याच्छिरसः कूर्चस्य यच्छरीरस्य
आधिव्याधिपरितः प्रयाति न चिरेण पञ्चत्वम् ॥८॥

वल्कलवल्लीरज्जुभिरहिकञ्चुकैस्तत्र तन्तुभिश्चापि ।
स्वप्ने परिवेष्टयति स्वाङ्गं तस्य ध्रुवं मरणम् ॥९॥

गृहगोधिभुजङ्गाः खर्ज्जूरादिकाः कीटकाः स्फुटं यस्य ।
स्वप्ने विशन्तिकर्णे स विनश्यति कर्णरोगेण ॥१०॥

रजनीकर दिनकरयोर्मण्डलभेदोपरागविनिपातम् ।
यो वीक्षते स काङ्क्षति पञ्चत्वं पंचरात्रेण ॥११॥

नयनामयप्रपाते ताराग्रह दीप विद्युतां[१] सद्यः
आभरणस्य यदङ्गादुद्ग्रहराग स्फुटी भवति ॥१२॥

द्वारगृहतोरणादिप्रें द्रवानलपादुकानिकेतनादीनाभ्
भंजनमपि यः पश्यति तस्य कलत्रनाशः स्यात् ॥१२॥

छागमृगखरकरभरासभउष्ट्रवेसरऋक्षकादीनाम् ।
सुरणामध्यारोहो विक्षणशव्दा न तु शुभाः स्वप्ने ॥१४॥

अहिनकुलकोलजम्वुककौलेयवृक्षकनकजक्षगृध्राणाम् ।
स्वप्ने वीक्षणविचरणहतानि स च दूषणानि नृणाम् ॥१५॥

शशलोमसकुक्कुटिकापिपीलिकामूषिकादयः पुंसाम् ।
स्वप्ने दृष्टाः कष्टं नितरां वितरन्नि पदचाराः ॥१६॥

---

[१] ताराग्रहविद्युतां पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

चित्रकवस्तकगंजकविडालकपिशारिकादयो न शुभाः
स्वप्ने दृष्टाः कष्टं वितरन्ति सर्वमनुजानाम् ॥१७॥

कलविङ्ककाककौशिकखंजनवककपोतकङ्काश्च ।
निजयुद्धभृतः स्वप्नेदृष्टाः कष्टाय वै पुंसाम् ॥१८॥

कुलीरमकरजलौककुम्भीरककूर्मभेकादीन् ।
जलजन्तून् यः पश्यति विहीयते स धनधान्येन ॥१९॥

पीतकपिंजलतित्तिरकृकवाकुश्येनशकुनिगृध्राणाम् ।
युद्धविलोकननादः पुंसः क्लेशावहः शतशः ॥२०॥

जटवायसवककुक्कुटटिट्टिभप्रत्यूहकुररहारीताः ।
एते जलपक्षचरा दृष्टा न सुखावहाः पुंसाम् ॥२१॥

पक्षचरा[1] झिल्लीसनखाः षट्चरणा मसकदंशाद्याः
नशुभाः कीटा मत्कुणयूकाप्रमुखाश्च पदचराः ॥२२॥

स्वप्ने जननीयोन्यामथवान्यस्यां[2] यो नरो विशति ।
पञ्चाहः प्राणा न स जीवति निश्चितं ततः पश्चात् ॥२३॥

पाकस्थाने रक्तं प्रसूतिपवने प्रसूतिकानि च वने[3] ।
यो विशति विततगात्रो यमपुरयानं स विदधाति ॥२४॥

यः कूपविवरकन्दरलतासु तिमिरे च ।
विधिवशतो विशति पुमान् यःखलु विपदां पदं स स्यात्[4] ॥२५॥

---

[1]पक्षचरेषु झिल्लिकाः सनखा मसक द्रंष्ट्राद्याः +पा ।
[2]स्वप्ने जंननी योन्यां विशति नरो यो रक्षति पा । [3]वचने पा ।
[4]तस्य खलु विषदां पदं तत्स्यात् पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

भक्षणवीक्षणनाम्नेः पक्वान्नविद्युमांसयोर्यस्यः ।
क्रयविक्रयं तु तस्य प्राणविनाशोऽर्थनाशो वा ॥२६॥

शष्कुलिकापूपलिका श्राणादीन् भक्षयति पुरतो यः ।
बहुशोकशङ्का भवेन्मरणं वा तस्य नचिरेण ॥२७॥

स्वप्ने हृदयसरस्यां यस्य पटूनि भवन्ति पद्मानि ।
अस्तविनष्टशरीरो यमवशमायाति स त्वरितम् ॥२८॥

यःस्वप्नेऽपि पिशाचैः सार्धं विदधाति साधु मधुपानम् ।
मर्त्यः सत्यं लभते स दारुणं ज्वररुजा मरणाम् ॥२९॥

पिबति स्नेहं यः सह चाण्डालैर्वा प्रहारतो म्रियते ।
कृशरं यो भक्षयति क्षयरोगात्तस्य मृत्युः स्यात् ॥३०॥

अतितप्तं पानीयं गोमयशीतलमौषधेन युतम् ।
यः पिबति सोऽपि नियतं म्रियतेऽतिसाररोगेण ॥३१॥

यश्च धातुकुङ्कुमसिन्दूरं पतति[1] खलु गृहे नभसः
गृहदाहस्तस्य भवेद् घोरःशस्त्राग्निघातो वा ॥३२॥

तालः कीचकगुल्मः खर्जूरो रोहितद्रुमो विकृतः ।
कण्टकवान् फलहीनो रक्तो वा पुष्परक्तो वा ॥३३॥

उदयति मूर्धनि यस्य स्वप्ने स विनश्यति शूलात् ।
हृदि वा गुल्मग्रन्थिरन्याङ्गे वा तदङ्गभयम् ॥३४॥

---

[1] पिबति पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

गिरिगुल्मद्रुमवल्लीवल्मीका बपुषि[२] यस्य जायन्ते ।
दर्भादीनि च तृणानि तस्याष्टाङ्गविनिपातः ॥३५॥

किंशुकमसितं शाल्मलिवृक्षं वा परिरक्तपुष्पमकरं च ।
यः पुष्पितमारूढः सोऽचिराच्चितामलङ्कुरुते ॥३६॥

शुष्कतरुदारुवल्लीकीचकवल्मीककन्टकिनः ।
आरूढो यः स्वप्नेनाथ व्यसनं तरति नियतं सः ॥३७॥

चत्वरतुरस्सयानं शूलं यूपं शवं समारूढम् ।
तस्य च रमाप्रणाशो ज्वलनं च प्रोक्षणेनो चेत् ॥३८॥

शूकरयुक्तानारी ग्रीवायां तदुत्तरं प्रहर्षयति यम् ।
सा तस्य पञ्चमासा निसा न चेद् भवति गिरिशृङ्गम् ॥३९।

यः कुसुमितभूमिरुहां शिरवाग्रजान्यरूणपुष्पाणि ।
अधिचिनुते गुम्फति वा स निश्चितं मुच्यते प्राणैः ॥४०॥

योमानवमारूढं प्रेतयुतं दंष्ट्रिसंयुतं स्वप्ने ।
याम्याभिमुखं गच्छति म्रियते नित्यं स न चिरेण ॥४१॥

हसने शोचनमचिरात् प्रवर्तते नर्तने वधबन्धः ।
पठने कलिश्च नृणामेतद्विज्ञेन विज्ञेयम् ॥४२॥

देशत्यागे रोगो विरेचनच्छर्दने पुनर्मूत्रे ।
मरणं भवति नृणां रोदनमपि जायते नित्यम् ॥४३॥

---

[२] चापचिह्नान्तर्गप्तः पाठ च पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

यो मूत्रयति स्वप्ने दहने वा लोठितं भृशं बहुशः ।
भवति धनधान्यनाशो मरणं वा रणभयं तस्य ॥४४॥

सिंहो नागः पुरूषो ग्राहः कर्षेत वधाय वा नरं पद्भ्याम् ।
बन्धस्य सपदि मोक्षो मुक्तो यदि बद्धः स्यात ॥४५॥

पितृतर्पणपरिणयनाद्युत्सवसावत्सरिकेषु कृत्येषु
भोजनमभिकुरुते यः स्यात्तस्य मरणमचिरेण ॥४६॥

निवसति शैलशिलायां श्मशानवेश्मनि च यः पुमान्नक्तम् ।
निःस्वो भवति स सद्यः सद्यजन्ममद्येन माद्यति वा ॥४७॥

यस्य स्वप्ने मूत्रं रक्तं माल्यं तथाऽरुणं वसनम् ।
जायेत वपुषि यस्मिन् भूदङ्गमकृते [1] तस्य ॥४८॥

योऽतिशयं पाण्डुरोगं रूग्व्याधिपुलकितं सपरिवेषम् ।
बुध्येत वीक्षमाणस्तस्यापि स्याद् वपुग्लानिः ॥४९॥

जटिलं मुण्डं रूक्षं मलिनाङ्गं रक्तं नीलवस्त्रं च ।
स्वप्ने समीक्षते यस्तस्य भयं मानहानिः स्यात् ॥५०॥

वादे कलहे युद्धे सार्द्धं रिपुभिः पराजयो यस्य ।
निर्भर्त्सनवधबन्धस्तस्याशुभमाशुचान्त्येति ॥५१॥

मधुमक्षिका विशन्ति स्वप्ने वदनेऽथवा कर्णे ।
सपरासुरासभो वा कल्याणं कथतां तस्य ॥५२॥

---

[1] भूताङ्गो भवेत्तस्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu

चित्रे लिखिताकारं स्वर्भानुं चन्द्रमण्डलानुचरम् ।
यो वीक्षतेऽन्तरीक्षे स दुःसहं दुःखमाप्नोति ॥५३॥

स चलाद्य स्वप्ने किंचित् स्वस्य स्फुटमिष्टदेवविम्बस्य ।
यदि भवति स्वस्थानादचिरेण ततोऽपि मरणं स्यात् ॥५४॥

यदि पूजनीयदेवप्रतिमाङ्गानि कटकायन्ते ।
न पुनः प्रयाति भङ्गं ततोऽङ्गपीडा भवेत्तस्य ॥५५॥

अङ्गावयवापातः पूजापातोऽप्यभीष्टदेवस्य ।
यदि जायते च स्वप्ने पुंसः स्यात् प्रचुरतरदुःखम् ॥५६॥

पेशलमकालजातं पुष्पं च फलं च कालजं वापि ।
गर्हितमङ्गलरहितं नियमान् पुंसः क्लेशावहं वहुशः ॥५७॥

पतति स्थाल्यां पुरूषः[1] पदवीं च दवीयसी यो याति ।
वासं वा बहुलाम्भसि स विनश्यति भययुतो वा स्यात् ॥५८॥

यो वाद्यं वादयते स्वप्ने पदहादि कर्पटविहीनः ।
विमुक्तकेशः स पुमान् नचिरात् पंचत्वमाप्नोति ॥५९॥

रचितरक्ताङ्गरागा रक्तांशुकमाल्यधारिणी ।
स्वप्ने यदि परिरम्भते तत् सत्यं ब्रह्महत्या स्यात् ॥६०॥

विलुलितबाला बाला कृतकृष्णविलेपना कृष्णजटा ।
स्वप्ने यद्युपगूहति तद्यमगृहाङ्गणातिथिः स्यात् ॥६१॥

---

[1] स्थालीपूरूषः ख-।

CC-0. Nepal Sanskrit Academy, Kathmandu

विकरालनेत्रपत्रा [1] पीताम्बरलेपनाललना ।
स्वप्ने यधालिङ्गति भवेत्ततो बहुविधो व्याधिः ॥६२॥

क्षीणोदरीं हसन्तीं पिङ्गदृशां दीर्घदन्तनखरोमाम् ।
प्रेम्णोपगूहते यः पश्यति तस्य ध्रुवं मृत्युः ॥६३॥

विलुलितकेशी ललना कृष्णा विकृताङ्गलोचना नग्ना ।
नारी नरमाकर्षति यमदिशि नियमेन स म्रियते ॥६४॥

कज्जलतैलविलिप्ता गतवसना करभरासभसमारूढा ।
मुक्तकचा यदि याति च यमदिशि तस्याशु गमनं च ॥६५॥

अवरोहत्येकाकी यो रासंभकरभसंयुतं यानम् ।
तत्रस्थो जागर्ति च तत्सत्यं तस्य मृत्युः स्यात् ॥६६॥

अस्त्रेण रचिताङ्गरागो रक्तांशुक कुसुममाल्यधारी ।
यो नृपति विहरति याति स म्रियते रक्तपित्तेन ॥६७॥

यः स्वप्ने कलुषेऽम्भसि विनिमज्जति कृच्छ्रतोऽपि चोच्छलति ।
दक्षिणदिशं प्रयाति, स म्रियते राक्षसदोषेण पित्तेन ॥६८॥

नृत्यन् मर्त्यो यो यमदिशि नीयते परेताद्यैः ।
सत्यं स त्यजति पुनः प्राणानुन्माददोषेणः ॥६९॥

रक्ताङ्गरागमण्डननिवसनकुसुमस्त्रजास्त्रियासङ्गः ।
सह ताभिः क्रीडावान् यमगेहे स यात्यचिरेण ॥७०॥

---

[1] विकलनेत्रपत्रा क. च. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

स्वप्ने पश्यत्यनिशं दुष्टतरं जाग्रदेव मनुजो यः ।
संवत्सरपर्यन्ते सत्यमसौ मृत्युमाप्नोति ॥७१॥

नित्यं हर्षोत्कर्ष परिणयनाद्युत्सवं महोत्साहम् ।
स्वप्ने पश्येत् सपदि स्यान्मरणं भयं तस्य चासन्नम् ॥७२॥

पुंसो मलिनांशुकता दीर्घनखश्मश्रुता दिगम्बरता ।
रक्तकषायाम्बरता निधनाय प्रायसो भवति ॥७३॥

प्रियमरणं [1] रमणीनां सुमलीमसवाससां मलिनः ।
वपुषा कषायवसनाभिर्वा कर्षणं नशुभम् ॥७४॥

श्वपचपिशाचप्रेतप्रभृतिप्रमदान्वितश्च कन्यां वा ।
यस्त्वभिगच्छति पुरुषः समृयुं वाञ्छत्यसन्देहः ॥७५॥

ज्वालैर्नखिभिश्चौरैर्वीभत्सैः क्रोष्टुभिर्द्वीपिरिपुभिः ।
वेत्रासनी [2] भवेद्यदि तच्छरीरापदः पुंसां स्युः ॥७६॥

यदि काकसकुनिश्ये द्यैः पक्षिभिः समुत्क्षेपः ।
भवेद् यद्यस्य स्वप्ने मरणं तस्य ध्रुवं भवति ॥७७॥

शयनासनद्रुमादिप्राकारादिदेवशयनेभ्यः ।
तुरगादिवाहनेभ्यः पतनं ध्रुवमात्मनाशाय ॥७८॥

नियतं स्वपिति स्वप्ने यः पांशुलभूतले समुपविशति ।
तस्यावस्यं व्याधिर्हानिर्वा भवति वित्तस्य ॥७९॥

---

[1] प्रेयसिरण लि. पु. । [2] चित्रासनम् पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

+ (शुकरकुक्कुरवानरमार्जारव्याघ्रजम्बुकाद्यैः ।
यस्याऽकृष्टिर्भवति प्रयाति स कृतान्तदृष्टिपथम् ॥८०॥

नटनं [1] कुलावकरणं गृध्रध्वाङ्क्षादिभिः शिरसि ।)
जायेत यदि स्वप्ने तत्पुंसां प्रायशः क्लेशः ॥८१॥

विकरालपिङ्गलाक्षी परिरभते वानरी नरं रभसात् ।
यमपुरगमदं वांछति निजगेहात् सोऽप्यचिरेण ॥८२॥

यो वानरं चारोहति यानं वा महिषमेषसंयुक्तम् ।
क्रीडति वा सह तैरपि बहुशोऽप्यशुभं भवेत्तस्य ॥८३॥

स्वप्ने मृतैश्च वंश्यैस्वश्यमाकारितो महीजोऽपि ।
यो गच्छति मनुजो यदि तं नियतं तस्य मृत्युः स्यात् ॥८४॥

प्रव्रज्याया ग्रहणं त्यागस्तद्वत् प्रायो न शुभकरः ।
कलहः संक्लेशकरः पर्व्वतभेदश्च पुरुषस्य ॥८५॥

कलनं च धान्यराशेः पचनं स्नेहेन सर्वभक्षाणाम् ।
वहनं सधूमवह्नेर्नियतं स वह्निमाप्नोति ॥८६॥

स्वप्नेरासभश्येनशुनकवृकक्रोष्टृदंष्ट्रिकरभाद्यैः ।
नीयेत यो यमदिशं स म्रियते शोथदोषेण [2] ॥८७॥

विगत वनस्य पुंसो विमुण्डितस्योपमुण्डस्य ।
श्वपचपिशाचैर्दक्षिणदिशि गमनं नशोभनं तस्य ॥८८॥

---

[1] रटनं ख । [2] शोकदोषेण क. च. ।

+ चापान्तर्गतः पाठः क. च. पुस्तकयो नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पुंसो बहुशः कुपितो मातापित्रादि गुरूजनो यस्य ।
निर्भर्त्सनं विधत्त जीवेन स मुच्यते त्वरितम् [१] ॥८९॥

भूतप्रेतपिशाचैः सार्धं यस्याथ संगतिः पुंसः ।
यमदिश्याकर्षणमपि स भवति विपदां पदं नियमात् ॥९०॥

काषायचीवराणां दिगम्बराणां त्रिदण्डविहितानाम् ।
मन्दानां क्षुद्राणां वीक्षणमशिवं विनिर्दिष्टम् ॥९१॥

यदिक्करकोपलवृष्टिर्भूकम्पो देवतासुहसितं वा ।
विनिपातोऽपतनस्य विधनाय स बन्धवध हेतु ॥९२॥

स्वप्ने विनाऽपि नियतं पश्यति नष्टदृष्टिघनतिमिरम् ।
अथवासवो नवृष्टिः स्पष्टं तस्यापि न शिवं स्यात् ॥९३॥

गतदिवसेशं दिवसं रजनीरजनीशतारकैर्वियुताम् ।
यस्तु मनुष्यः पश्यति स विनश्यति निश्चितं चैतत् ॥९४॥

कुरूते योऽपि स्वापं रक्षाभूक्षोदपङ्कपुञ्जेषु ।
मध्याह्नसमीक्षणमपि न स बितथं दिवसमुपयाति ॥९५॥

चक्रे भ्रमण तैलिककुलालयोरथपलायनं यस्य ।
देयौ मन्दौ लनमेतस्य शरीरखेदः स्यात् ॥९६॥

अधिशेते यः पश्यति बल्मीकचयं कण्टकप्रकरम् ।
ध्रुवमध्यास्ते तु नरः स प्राप्नोति स्फुटं विपदम् ॥९७॥

---

१ त्वचिरात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वयसः परस्परं यदि संध्या प्रथमान्तयोर्विपर्यासः ।
जायेत भृशं पुंसां बहुशस्तदनल्पवैकल्पम् ॥९८॥

प्रासादप्राकारच्छत्र ध्वजकलशशक्रकेतुनाम् ।
पातोनृपघातकरस्तस्यापि च न सुखावहो भवति ॥९९॥

दृष्टः पत्तनभङ्गो देवायतनस्य राज्यभङ्गो वा ।
शैल श्रृङ्गनियातो दुःखं पुनरात्मनो भवति ॥१००॥

यस्य शरीरे भङ्गो सायं प्रतीकहीनं संजायेत ।
स्वप्ने स्यात् तस्य विपत्तिर्विनाशो भ्रश्यते तस्य ॥१०१॥

भिन्न[1]प्राकारासनसदनविमानप्रहाराणि ।
यस्तत्र चाधिरोहति नियतं तस्याऽपि खेदः[2]स्यात् ॥१०२॥

पानीयस्य च वृद्धिस्ताम्रचयो यस्य भविता च ।
सर्वाभिमुखं तस्य दुःखं स्याद् धान्यधननाशश्च[3] ॥१०३॥

पश्यति यो भूमिस्थलमाकस्मिकसलिलसंकुलं स्वभवने ।
तस्य ग्लानिर्बन्धुहानिर्जायते पुंसः सत्यम् ॥१०४॥

वहति स्रोतसि मज्जनमपहारो भवति यस्य मनुजस्य ।
पङ्केमज्जनपातौ तस्यैव शरीरस्य विपत्तिसंप्राप्तिः ॥१०५॥

मालाकङ्कारलीलायुद्धं यो वीक्षते नरो नियतम् ।
यस्य स्थानभ्रंशो बहुशो विपदोऽपि जायते तस्य ॥१०६॥

---

१ भित्ति पा । २ तस्याधिपारः पा । ३ जात्यधननाशश्च ख ।

CC-0. Nepal Sanskrit Academy, Kathmandu

२६ दुः स्वप्नाध्यायः

अध्ययनविधौ विवादः पुत्राणां परस्परेण न शस्तः ।
माङ्गल्योत्सवदर्शनमपि माङ्गल्यप्रदं नैव ॥१०७॥

दूराह्वानं कोलाहलशब्दाकर्णनं च यस्य भवेत् ।
आक्रोशो निन्दा वा तस्यविनाशो ध्रुवं भवति ॥१०८॥

आपीडपत्रवल्ली श्रवणोत्तंसाविशेषकादिनाम् ।
यस्य स पश्यति भङ्गं न शोभनं जायते तस्य ॥१०९॥

यमभिभवति स्वप्ने शृङ्गी दंष्ट्री प्लवङ्गमः पत्री[1] ।
राजकुलताडनाङ्कः प्रजायते तस्य मनुजस्य ॥११०॥

यो दन्तानां रागं नयनानामञ्जनं च विरचयति ।
शिरस स्नेहाभ्यङ्गं तस्यासन्नं ध्रुवं मरणम् ॥१११॥

स्वप्ने परिरसा दृढबुभुक्षा जायते यस्य ।
भस्म चयानां लब्धिर्वा न शोभनं ध्रुवं तस्य ॥११२॥

विधनं जीवधनानामपहरणं शोभनं नृणाम् ।
नैवमन्तर्वत्न्याः स्वप्नशुभो गर्भापहारोऽपि ॥११३॥

यो धूलीधूसरितो वा या चक्रेण तुम्बिकाककुभः[2] ।
अवते वने मनुष्यस्तस्य भवेदन्तिके मरणम् ॥११४॥

तद्विद्यते न किंचित् चराचरं वस्तु पंवतःत्रन् ।
न स्वप्ने यदि वश्यं प्रदृश्यते हन्ति बहुधान्यम् ॥११५॥

---

[1] पत्नी पा । [2] वक्रेण तुम्बिका ककुभ क. च. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

दृष्ट्वा स्वप्ने यस्य पतितेऽत्र शुभावहो यदि यः ।
प्रत्ययनन्तस्य ज्ञेयस्तेन तत्र च किंचिदपि ॥११६॥

किं ते बहुना शुभमशुभं निमित्तमुक्तं पुरापि नियमेन ।
तस्यापि तथा स्वप्ने दृष्टमनिशं च हानिः स्यात् ॥११७॥

अन्यस्त्रीपुष्पवती शश्यद्धृतेषु स्नेहवती वसने ।
स्वप्ने दिने च जातस्यात् पुण्यतरा च न स्नानात् ॥११८॥

ये भद्रबाहुसुस्रुतवाचस्पतिचरकरत्नकोशेषु ।
उक्ताः स्वप्नविशेषाः शुभाऽशुभास्ते मयाप्युदिताः ॥११९॥

परहृदयाऽपि परगदितार्थस्य वेत्ति यस्तत्वम् -
स त्वत्र भवानिव दुर्लभराजात्मजादेवदेवैकः ॥१२०॥

इतिश्रीसारङ्ग साधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने दुःस्वप्न फलकथनाऽध्यायः

२७ अथ तिथिप्रकरणम्

अथतिथिफलान्याह वसिष्ठः-

दिनाधिपा धातृविधातृविष्णुयमेन्दुषड्वक्त्रशचीश्वराश्च ।
वस्वाख्यनागौ परतश्च धर्मशिवार्ककामाःकलिविश्वसंज्ञौ ॥१॥

सदैव नष्टेन्दुतिथीश्वराः स्यु र्नूनं च एते पितरः क्रमेण ।
धनाधिपं केचिदुशन्ति सन्तस्त्वधीश्वरं[1] वै हरिकामतिथ्योः ॥२॥

---

[1] स्तदीश्वरं ख. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

नारदः–

चित्रलेख्याऽसवक्षेत्रतैलशय्यासनादियत् ।
वृक्षच्छेदोग्रलोहाश्वरत्नं [२] प्रतिपदीरितम् ॥३॥

वसिष्ठः–

नोद्वाह्यात्रोपननयप्रतिष्ठासीमन्तचौलाऽखिलवास्तुकर्म ।
गृहप्रवेशा खिलमङ्गलाद्यं कार्यं हि मासादि तिथौ कदाचित् ॥४॥

सप्ताङ्ग चिह्नानि नृपस्य वास्तुव्रतप्रतिष्ठाऽखिलमङ्गलानि ।
यात्राविवाहाखिलभूषणं यत् कार्यं द्वितीये दिवसे सदैव ॥५॥

नारदः–

विवाहव्रतयात्राश्च सुरस्थापन भूषणम् ।
ग्रहपुष्ट्यखिलंकर्म द्वितीयायां विधियते ॥६॥

वसिष्ठः–

संगीतविद्याऽखिलशिल्पकर्म सीमन्तचौलान्नगृहप्रवेशम् ।
कार्यं द्वितीये दिवसे यदुक्तं सदा तृतीये दिवसेऽपिकार्यम् ॥७॥

रिक्तासु शत्रोर्वधबन्धशस्त्रबिषाग्निघातादि च याति सिद्धम् ।
यन्मङ्गलं तासुकृतं च मूढैर्विनाशमायाति तदा तु नूनम् ॥८॥

नारदः–

अथर्वणबिषाग्न्यस्त्र बन्धनोच्चाटनादिकम् ।
वधघातादिकं कर्म रिक्तास्वेव विधीयते ॥९॥

---

[२] गृहाश्मा च गृहास्माथ बा या. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

तिथिफलाऽध्यायः

यानोपनयनोद्वाहग्रहशान्तिकपौष्टिकम्[1] ।
चिरस्थिराखिलं कर्म पञ्चम्यां मङ्गलोत्सवम् ॥१०॥

वसिष्ठः—

शुभानि कार्याणि चिरस्थिराणि चोक्तान्यनुक्तान्यपि यानि तानि ।
सिद्धिं प्रयान्त्याशु ऋणप्रदानं[2] विना सदा नागतिथौ प्रभूतम् ॥११॥

अभ्यङ्गयात्राप्रतिकर्मदन्तकाष्ठं[3] विना पौष्टिकमङ्गलानि ।
षष्ठ्यां विषयानि रणोपयोग्य शिल्पानि वास्त्वम्बरभूषणानि[4] ॥१२॥

नारदः—

पशुवास्तुमहीसेवापण्याम्बुक्रयविक्रयम् ।
भूषणं व्यवहारादि कर्म षष्ठ्यां विधीयते ॥१३॥

सप्तम्यां ध्रुवकर्म च यात्राभरणादिमाङ्गल्यम् ।

नारदः—

यानस्थापनवाहादि राजसेवादि[5] कर्म यत् ।
विवाहवास्तु भूषाद्य सप्तम्यां चोपनायनम् ॥१४॥

---

१ गृहशान्तिकपौष्टिकम् अ क च प । २ शतप्रदानं पा. ।
३ अभ्यङ्गयात्रापितृकर्मदन्तकाष्ठ पा । ४ वास्तुं वरभूषणानि पा. ।* मुद्रित वसिष्ठ सं–हितायां तु सप्तमीतिथेः फलमीदृशं वर्तते — द्वितीयायां तृतीयायां पञ्चम्यां कथितान्यपि । तानि सिद्धयन्ति कार्याणि सप्तम्यामखिलान्यपि । ५ चिन्हादि पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

कृषिवाणिज्य धान्याश्वलोहसंग्रामभूषणम् ।
शिवस्थापनखाताम्बुकर्माऽष्टम्यां विधीयते ॥१५॥

वसिष्ठः—

संग्रामयोग्याऽखिलवास्तु शिल्प नृत्यप्रभेदाऽखिललेखनानि ।
स्त्रीरत्नचर्याऽखिल[1] भूषणानि कार्याणि सिद्ध्यन्ति महेशतिथ्याम् ॥१६॥

नारदः—

प्राशनं स्थापनंयानमुद्वाहव्रतवन्धनम् ।
शान्तिपुष्टयादिकंकर्म[2] दशम्यां तु प्रशस्यते ॥१७॥

व्रतोपवासवैवाहकृषिवाणिज्यभूषणम् ।
शिल्पनृत्य[3] गृहंकर्म एकादश्यां विचित्रकम् ॥१८॥

वसिष्ठः—

व्रतोपवासाखिल धर्मकार्यं सुरोत्सवाद्याऽखिल वास्तुकर्म ।
संग्रामयोग्याखिल शिल्पकर्म विश्वे तिथौ सिद्ध्यति नृत्यवाद्यम् ।

नारदः—

चलस्थिरा खिलं कर्म दानशान्तिकपौष्टिकम् ।
यात्रान्नग्रहणं यत्क्वा द्वादश्यां निखिलं हितम् ।२०।

वसिष्ठः—

यज्ञक्रियापौष्टिकमङ्गलानि संग्रामयोग्याऽखिलवास्तुकर्म ।
उद्वाहशिल्पाखिलभूषणाद्यंकार्यं प्रतिष्ठा खलु पौर्णमास्याम् ॥२१॥

---

१ स्त्रीरत्नपाना पा । २ शान्ति पौष्टयाखिलं पा । ३ शिल्पवृत्ति पा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

नारदः—

पितृकर्मत्वमावास्यामेकमुत्क्त्वा कदाचन ।
न विदध्यात् प्रयत्नेन यत्किंचिन्मङ्गलादिकम् ॥२२॥

दिनत्रयं व्यतीपातं कुहुः पूर्णेन्दुसंक्रमम् ।
एतानि पञ्च पर्वाणि तैलस्त्री क्षौरवर्जितम् ॥२३॥

दर्शषष्टयां[२] प्रतिपदि द्वादश्यां प्रतिपर्वसु[३] ।
नवम्यां च नकुर्वीत कदाचिद्दन्तधावनम् ॥२४॥

यः करोति दशम्यां च स्नानमामलकैः सह ।
पुत्रहानिर्भवेत् तस्य त्रयोदश्यां धनक्षयः ॥२५॥

---

२ दर्शाष्टम्यां, ३ षष्टिवासरे लि. पु.। अत्र त्रयोदशीचतुर्दशीतिथ्योः फलानि। तानि नारद वसिष्ठसंहितातोऽत्र लिख्यन्ते —

नारदः—

अग्न्याधानंप्रतिष्ठा च विवाह व्रतबन्धनम् ।
निखिलं मङ्गलं यानं त्रयोदश्यां प्रशस्यते

बन्धनाग्निप्रदानोग्र घात व्रणरणक्रिया ।
शस्त्रास्त्रलोहकर्माणि चतुर्दश्यां विधीयत

वसिष्ठः—

विधातृगौरीभुजगभान्वन्तक दिनेषु च ।
उक्तानि तानि सिद्धयन्ति त्रयोदश्यां विशेषतः

CC-0. Nepal Sanskrit Academy, Kathmandu

अर्थपुत्रक्षयस्तस्य द्वितीयायां नसंशयः ।
अमायां च नवम्यां च सप्तम्यां च कुलक्षयः ॥२६॥

चतुर्दशी चतुर्थी च अष्टमी नवमी तथा ।
षष्ठी च द्वादशी चैव पक्षच्छिद्राह्वयाः स्मृताः ॥२७॥

भूतादूष्ट ८ मनु १४ तत्वा २५ ङ्क ९ दश १० शेषाःसुशोभनाः ।
सदैव दर्शे पितृकर्म चैवं नान्यं विधेयं शुभपौष्टिकाद्यम् ।
मूढैःकृतं तत्र शुभोत्सवाद्यं विनाशमायात्यचिराद् भृशं तत् ॥२८॥

तुहिनकिरणदेहस्यानुकूलं प्रदिष्टं
तिथिफलमिहसर्वं संहितासारविद्भिः ।
बलवति हिमरश्मौ योगधिष्णोक्तसिद्धिः
प्रबलखचरवारे वारजं स्याद् बलं च ॥२९॥

कलि वसु गणपति षण्मुख हरि दुर्गा तिथिषु पक्षरन्ध्रासु ।
शर वसु मनु गो दशभिस्तत्व विहीनान्यनाडिकाः शुभदाः ॥३०॥

अस्यार्थः। कलिश्चतुर्दशी। वसुरष्टमी। गणपतिश्चतुर्थी। षण्मुखःषष्टो। हरिद्वादशी। दुर्गानवमी। एते पक्षच्छिद्रतिथयः। एतेषु क्रमेण, एतावत्यो घटिकाः परित्याज्याः ५।८।१४।९।१०।२५ शेष घटिकाः शुभदाः

दिवा चन्द्रवती राका पूर्णिमाऽनुमती निशिः ।
सम्पूर्णिमाऽप्यनुमती तथा मासि द्विधा भवेत् ॥३१॥

सिनीवाली दृष्टचन्द्रा नष्टचन्द्रा कुहुस्तथा ।
तिथीनां निर्णयार्थं हि चैतत्सर्वमुदीरितम् ॥३२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

युगादितिथयः

शुक्लेपक्षे भवति नवमी कार्तिकाख्ये कृतादि
स्त्रेतादिःस्यान्नियतममलामाधवाख्ये तृतीया ।
माघेमासे पितृतिथिरसौ द्वापरादिर्निरूक्ता
कल्पादिःस्यात् स्मरतिथिरसौ कृष्णपक्षे नभस्ये ॥३३॥

आश्वियुक्शुक्लनवमी द्वादस्यूर्जे मधौ तृतीया च ।
भाद्रपदेऽपि तृतीया श्रावणमासे त्वमावास्या ॥३४॥

एकादशीच पौषे शुचिसितदशमीं सप्तमी माघे ।
बहुलाष्टमी नभस्ये त्वाषाढे कार्तिके [1] तद्वत् ॥३५॥

फाल्गुनसितपंचदशी चैत्रे ज्येष्ठे च पौर्णमासी ।
मन्वन्तरादय इमाश्चतुर्दशोक्ता बुधैः पुण्याः ॥३६॥

तिथ्यन्तद्वयमेको दिनवारस्पृशति यत्र तद्भवति ।
अवमदिनं त्रिदिनस्पृक्तिथित्रयस्पर्शनादह्नः ॥३७॥

त्र्यहस्पृशन्ताम यदेतदुक्तमत्रप्रयत्नः कृतिभिर्विधेयः ।
विवाहयात्राशुभपुष्टिकर्म सर्वं नकार्यं त्रिदिनस्पृशेऽह्नि ॥३८॥

उपेत्यस्तमवाप्यर्को मुहुर्तत्रयवाहिनीम् ।
यांतिथिं स्यादखण्डा सा न्यूना चेत् खण्डसंज्ञिता ॥३९॥

अमा नामरवेरश्मिस्तेन युवते निशाकरे ।
कुहूर्लक्षगुणं दानं जपहोमौ तथैव च ॥४०॥

---

[1] त्वाषढी कार्तिकी क. च. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पूर्वविद्धा नकर्तव्या षष्ठी चैकादशी तथा ।
भिन्नाप्येकादशी कार्या परतो द्वादशी न चेत् ॥४१॥

दशम्या सहिता हन्ति फलमेकादशीकृतम् ।
पारणं तु त्रयोदश्यामतो विप्रवचः स्मृतम् ॥४२॥

अत्रैकादशी विषये तिथिप्रकरणे स्मार्तपक्षमवलम्व्य पुरतः कथयामि । भागवतपक्षस्य स्मृतिवचनविरोधत्वात् । पुराणवचनेषु पद्मपूराणादि कतिपयपुराणेषु कृत्रिमवचनानि बहुनि दृश्यन्ते ।४३॥

उदयास्तमयं सूर्यो यां तिथिं समनुवृजेत् ।
सा तिथि सकला ज्ञेया दानाध्ययन कर्मसु ॥४४॥

यां तिथिं समुप्राप्य अस्तं याति दिवाकरः ।
सा तिथिः सकला ज्ञेया त्रिमुहूर्ताऽपि या भवेत् ॥४५॥

पूजाकर्मणि सा ग्राह्या मध्याह्नव्यापिनी तिथिः ।
उपवासवृते ज्ञेया मुहुर्तत्रयवाहिनी ॥४६॥

नक्तव्रतेषु सर्वत्र प्रदोषव्यापिनी स्मृता ।
ह्लासवृद्धिसमत्वं च चिन्तयित्वा विनिर्णयेत् ॥४७॥

शुद्धा त्रेधा तथा विद्धा भिन्ना न्यूनसमाधिका ।
त्रेधैकैका पूर्वभिन्ना[१] द्वादस्यूनसमाधिके ॥४८॥

आद्यासु षट्सु पूर्वेव व्यवस्थाऽनन्तरद्वये ।
गृहशुद्धिर्यतीनां च नवम्यां च परेऽह्नि ॥४९॥

१पुनर्भिन्ना खः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

यामत्रयाधिका यत्र वृद्धिगामी तु या यदि ।
पितृकर्मणि सा ग्राह्या तिथिः पूर्वा क्षयात्मिका ॥५०॥

अपराण्हं सुसंपूर्य सायं स्पृक् साध्यदा तिथिः ।
सैव पुण्याब्दिकी ग्राह्या नापरा पुत्रहानिदा ॥५१॥

क्षये पूर्वतिथौ शोध्यं योज्यं वृद्धौ तिथिर्भवेत् ।
तिथ्यन्तरदलं श्राद्धे स्वाध्याये यद् व्रतेऽपि तत् ॥५२॥

तिथेः पञ्चदशो भागः पक्षयोः स्यात् क्षया तिथिः ।
यत्कर्मोक्तं तिथौ यस्यामस्यामप्यखिलं भवेत् ॥५३॥

मासि मार्गशिरस्येवं व्रतानां समुपक्रमम् ।
अखण्डायां तिथौ कुर्यादनस्तगुरूशुक्रयोः ॥५४॥

सप्तम्यां माघशुक्लायामादित्यं पद्मकैः सुधीः ।
गव्येन पयसाऽन्नेन घृणिनं सम्यगर्चयेत् ॥५५॥

प्रतिवर्षं भुक्तिमुक्त्या यावज्जीवं च यो नरः ।
अरोगी श्रियमाप्नोति रोगी रोगात्प्रमुच्यते ॥५६॥

माघकृष्णचतुर्दश्यामुपोष्य च शिवं यजेत् ।
यःकुर्याज्जागरं भक्त्या तस्य नास्ति पुनर्भवः ॥५७॥

यत्रार्धरात्रसंयुक्ता भवेदुग्रचतुर्दशी ।
शिवरात्रिव्रतं तत्र नृत्यगीतादिमाऽऽचरेत् ॥५८॥

फाल्गुनाद्यत्रयोदश्यां कामं दग्ध्वा शिवं यजेत् ।
त्रिदिनं भस्मना तेन तेजस्वी शिवमाप्नुयात्[1] ॥५९॥

---

१ श्रियमाप्नुयात्

CC-0. Nepal Sanskrit Academy, Kathmandu

(-।- चैत्रशुक्ल चतुर्दश्यांदमनेनार्चयेच्छिवम् ।
अब्दपूजाफलं प्राप्य स नरो धनिको भवेत् ॥६०॥

वैशाखे च तृतीयायां योऽर्चयेच्च सुरान् पितॄन् -।-)
नाश्नुते मनसा दुःखं स नरः स्वर्गभाग् भवेत् ॥६१॥

वैशाख्यां विप्रमुख्येभ्यो धर्मप्रीत्या प्रयच्छति ।
पादुकोपानहौ छत्रं दध्यन्नं करपत्रिकाम् ॥६२॥

व्यजनं गन्धपुष्पाद्यं प्रपानं सर्वजन्तुषु ।
श्रीमानरोगी तेजस्वी विमानच्छत्रचामरः ॥६३॥

नृत्यगीतादिसंयुक्तः सर्वाभरणभूषितः ।
दिव्याङ्गनासमाकीर्णः स नरः स्वर्गमश्नुते ॥६४॥

शुचेश्च शुक्लपञ्चम्यां यजेत् स्कन्दमुपोषितः ।
पिष्ठान्नप्राशनं कृत्वा ऋणरोगात् प्रमुच्यते ॥६५॥

पूर्वं विद्धातु कर्तव्या पिष्ठान्नप्राशने व्रते ।
पिष्ठान्नप्राशनं नृणां रात्रावेव विधीयते ॥६६॥

शुचिमासे चतुर्दश्यां पवित्रेणार्चयेच्छिवम् ।
अब्दपूजाफलं लब्ध्वा स नरो धनवान् भवेत् ॥६७॥

श्रावणस्याऽसिताष्टम्यां रोहिणीनिशिसंयुता ।
यदा भवेत् तदा साक्षाद् देवो जातो जनार्दनः ॥६८॥

-।- चापान्तर्गतः पाठः प्र. अ. प. पुस्तकेषु नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

तस्य वै जन्मचिह्नानि यः कुर्यात् समुपोषितः ।
जागरं जातकर्माद्यं स वैष्णवपदं व्रजेत् ॥६९॥

मासि भाद्रपदे शुक्ले चतुर्थ्यां गणनायकम् ॥
अर्चयेन्मोदकाद्यैश्च सर्वविघ्नोपशान्तये ॥७०॥

मासि भाद्रपदे यस्मिन् दिवसे सुरराजभम् ।
मध्याह्नादधिकं तत्र ज्येष्ठायाःपरिपूजनम् ॥७१॥

नवम्यामाश्वयुक्शुक्ले लक्ष्मीं देवीं समर्चयेत् ।
सरस्वतीमायुधानि युद्धे जयमवाप्नुयात् ॥७२॥

ऊर्जशुक्ल चतुर्थ्यां यो भुजभान् भक्तितो यजेत् । :
क्षीरपिष्ठगुडाद्यैश्च न तेभ्यो भयमश्नुते ॥७३॥

आरभ्यैकादशीं तत्र यावच्च दिनपंचकम् ।
तद्भीष्मपंचकंज्ञेयं नृणामघविनाशनम् ॥७४॥

वत्सरात् तप्यते पुण्यं तपसः कार्तिके भवत् ।
कार्तिके तपसः पुण्यं लभते भीष्मपंचके ॥७५॥

कार्तिकपौर्णमास्यामनलर्क्षे स्वामिदर्शनं शुभदम् ।
सप्तसु जन्मसु पापं क्षणादेव तदा विनश्येत् ॥७६॥

उत्सृजेद् वृषभं तत्र समुपोष्य[1] यथाविधि
कुमारं वा यजेत् तत्र सर्वपापैः प्रमुच्यते ॥७७॥

---

१ चोपोषित्वा प(. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

कार्तिक्यां कृत्तिकायोगे यः कुर्यात् स्वामिदर्शनम् ।
सप्तजन्म भवेद् विप्रो धनाढयो वेदपारगः ॥७८॥

व्यर्कोदयध्रुवमास ध्रुवैर्ध्रुवंवर्तमानमुपचिनुयात् ।
गततिथिसहितैभागैस्तिथ्यानयनं भवेत् प्राग्वत् ॥७९॥

संवत्सरमहोरात्रं ये जानन्ति मनीषिणः ।
तेषां तिथ्युदयज्ञानमिदं मनसि वर्तने ॥८०॥

खखाष्टादशभिः प्राणैर्मासः सूर्योदयाद् भवेत् ।
एवं वा तिथिविज्ञानमनेन न पुनर्भवेत् ॥८१॥

चैत्रादि द्विगुणीकृत्य तिथिं तत्र नियोजयेत् ।
सप्तभिश्च हरेद्भागं ज्ञेयाश्रीदिवसादयः ॥८२॥

रत्नकोशे–

यमयुक्ते खाद्युगणे श्रीदिवसाद्याश्च सप्तहृतशेषे ।
श्रीदिवसः कलिदिवसो नन्दनदिवसश्च कालकर्णिकादिवसः ॥८३॥

जयदिवसो धनदिवसस्तपोदिवस इति सप्तधा संज्ञा ।
श्रीनन्दनौ जयाख्याश्च तपसोऽथ धनः शुभः ।
कलिश्च कालकर्णिश्च शुभकर्मविनाशकृत् ॥८४॥

तिथिः शरीरं तिथिरेवकारणं तिथिःप्रमाणं तिथिरेव साधनम् ।
तिथिं विना नैवशशी प्रदृश्यते विनेन्दुना चापि नकर्मसिध्यति ॥८५॥

इति श्रीसारङ्गधरसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्य विरचिते जगन्मोहने तिथिफलाऽध्यायः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथाष्टविंशोऽध्यायः

वारप्रकरणम्

स्वस्ति श्रीजयकारिणी कलिमलप्रध्वंसिनी सन्ततं
नानामङ्गलदायिनी शुभमतिप्रोल्लाससंपादिनी ।
सत्कीर्तेः पृतना[1] पयोधिरचना चातुर्यविस्तारिणी
रोगघ्नी सकलेष्टभोगजनी पुण्यातिथिः श्रूयताम् ॥१॥

स्वस्ति श्रीगिरिजाधिपाजहरयः सूर्येन्दुधात्रीसुताः
प्रालेयांशुसुतेन्द्रमन्त्रिभृगुजाः सौरिस्तमः केतवः ।
दिक्पालप्रमुखाः सुराश्च पितरो नद्यः समुद्राचला
स्तेकुर्वन्तु सदा शुभं द्विजवराः पंचाङ्गदेवाश्च ये ॥२॥

आयुर्वृद्धिं जनयतु तिथिः सपूतापां चलक्ष्मी
दुःस्वप्नोत्थं हरतु दुरितं दुर्निमित्तं चंवारः ।
नक्षत्रं वो हरतु सकलान्यासु पापानि दूराद्
योगो बुद्धिं दिशतु करणं वांछितार्थस्य सिद्धिदम् ॥३॥

पंचाङ्गं परमं पवित्रममलं पापघ्नमिष्टार्थदं
गङ्गास्नानफलप्रदं ग्रहगणप्रीतिप्रदं मङ्गलम् ।
दैवप्रीतिकरं जनैः प्रमुदितं नित्याऽभिवृद्धिप्रद
मिष्टारिष्ट[2] फलप्रदैककरणं शृण्वन्तु नित्यं बुधाः ॥४॥

आयुष्यं बलमारोग्यं यशोवृद्धिं श्रियावहम् ।
होराराशिग्रहाराणां च पक्षनक्षत्रशोभनम् ॥५॥

---

१ सत्कीर्तिपृतना पा. २ मिष्टानिष्ट क.च.

CC-0. Nepal Sanskrit Academy, Kathmandu

वारेशस्तुतिः

पारं यो नभसः प्रयात्यनुदिनं वेगादखिन्नैर्हयै
रुन्धन्नेव तमांसि नाशयति यस्तीक्ष्णः करैः सर्वतः ।
मासर्त्वब्द[1]दिनायनैः प्रकृतयो यः कालचक्रं नृणां
पायाद् वःस हरस्य मूर्तिरपरा यस्याद्यवारो दिने ॥६॥
सप्तद्वीपसमुद्रशैलसहिता यस्याऽमले मण्डले

पृथ्वी यं प्रति विम्बतामुपगता, लोके कलङ्कायते ।
पीतः स्फीतिमुपप्रयाति विबुधैर्योऽसौ नवत्वं सदाः
पायाद् वःस शशी सदाऽमृततनुर्यस्याद्यवारो दिने ॥७॥

उत्कण्ठाविधुरा हि यस्य दिवसे गच्छन्ति नैवाध्वगा
आत्मीयान्यपि मन्दिराणि सहसा मार्गेषु दृष्टेष्वपि ।
यस्मिन् वक्रगते सुराऽसुरगणास्त्रस्यन्ति दीनानना
भूतिं वःस ददातु भूमितनयो यस्याद्यवारो दिने ॥८॥

पित्र्यं मुक्त्वा विशालं त्वमृतरसमयं मण्डलं देवपुष्टं
सौरं कल्पान्तघोरं ज्वलितशिखिनिभं सेवते यस्तु नित्यम् ।
योऽसौ तस्माद् विमुक्तो जनयति जगतां संभ्रमं घोररूपं
नित्यं तारातनूजो दिशतु तव शिवं यस्य वारो दिनेऽद्य ॥९॥

येनेन्द्राणीन्द्रनाशान्नहुषवशगता रक्षिता बुद्धियोगाद्
देवैर्यस्य प्रसादात् त्रिभुवनमखिलं भुज्यते वीतशोकैः ।
यस्य प्रज्ञामयूखैः सवितुरिवकरैर्भासितं भूर्भुवः स्वः
देवाचार्यः स नित्यं दिशतु तव शिवं यस्य वारो दिनेऽद्यः ॥१०॥

---

[1] मासर्त्वब्ददिनायनान्यकृत यो पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

यः कल्पान्तहुताशराशिसदृशं शार्वं प्रविश्योदरं
निष्क्रान्तं पुनरेव योऽक्षततनुः पुत्रीकृतश्चोभया ।
भीत्या यस्य सुरासुरेश्वरनराः स्थातुं न नशक्ताः पुरः[1]
शुक्रोऽसौ शुभदायकोऽस्तु भवतां यस्याऽद्य वारो दिने ॥११॥

गात्रं यस्य घनालिनीलसदृशं नित्यं जगद्भीषणम्
स्थूलास्थिप्रतिविम्बमीक्षणभयान्मृत्युञ्जयं सेवते[2] ।
घोरे यस्य महावलाहकतडित्प्रस्पर्द्धिनि लोचने
सोऽयं पातु शनैश्चरो रविसुतो यस्याऽद्य वारो दिने ॥१२॥

वसिष्ठनारदौ–

रवेः

कुर्यान्मिङ्गलपौष्टिकानि नृपते राज्याभिषेकं तथा
सेवा भेषजचर्मकर्मकनकग्रामप्रवेशादयः ।
विद्याध्यानवरव्रतानि लवणं शिल्पं रणं साहसं
क्षिप्रालङ्करणं दिने दिनकृतो लग्नस्थिते वा रवौ ॥१३॥

नारदः–

नृपाभिषेकमाङ्गल्यसेवायानास्त्रकर्म यत् ।
औषधाहवधान्यादि विधेयं भानुवासरे ॥१४॥

चन्द्रस्य

सेवापण्य विभूषणादिकर्माणि संध्यं तथा भेषजम्
वृक्षारोमणसेतुधान्यसलिलं क्षिप्राणि देवालयम् ।

---

[1] पुनः ख । [2] विम्बितं प्रकटितं क्रूरं महासन्ततम् क च ।

CC-0. Nepal Sanskrit Academy, Kathmandu

यज्ञं शान्तिकपौष्टिकानि भवनं रत्नक्रियाऽऽकर्षणं
वाणिज्यं सरसायनं पितृमखं माङ्गल्यमप्यैन्दवे ॥१५॥

शंखमुक्ताम्बुरजतवृक्षेषुस्त्री विभूषणम् ।
पुष्पगीतक्रतुक्षौद्रकृषिकर्मेन्दुवासरे ॥१६॥

भौमस्य

विषाग्निबन्धनस्तेयसन्धिविग्रहमाहवम् ।
धात्वाकरप्रवालास्त्रकर्म भूमिजवासरे ॥१७॥

रक्त स्रावविषास्त्रकर्म हुतभुग्दानानि बादं रणं
शत्रोर्बन्धविधौ[1] च दुष्टदमनं सेतुप्रभेदं तथा ।
बृक्षच्छेदनभेदनानि मृगया चौर्यं तथा साहसं
सेनान्यं कृषिकर्म धातुकरणं भौमस्य लग्नेऽह्निवा ॥१८॥

बुधस्य

माङ्गल्य ध्रुवपौष्टिकानि सलिलेचर्या व्रतं भेषजं
सेवा पण्यविभूषणादि गमनं बीजोप्तियोक्तृक्रिये ।
राज्ञामप्यभिषेचनं चरमथक्षेत्रं च मैत्री धन
विद्याशिल्पविवाहवाहनविधिं संधिं च बौधेऽहनि ॥१९॥

नृत्यशिल्पकलागीतलिपिभूरससंग्रहम्[2] ।
विवाह[3] धातुसंग्राम‌कर्म सौम्यस्य वासरे ॥२०॥

---

[1] बन्ध वधौ खः । [2] भूसुरसंग्रहम् ख । [3] विवाद ख ।

CC-0. Nepal Sanskrit Academy, Kathmandu

गुरोः

यज्ञ पौष्टिकमाङ्गल्य-स्वर्णवस्त्रादि-भूषणम् ।
वृक्षगुल्मलतायानकर्म देवेज्यवासरे ॥२१॥

बसिष्ठः—

देवार्चा गुरुसेवनं ब्रतविधिं यज्ञक्रियां पौष्टिकं
यात्रां यद् ध्रुवकर्म शिल्पमपि च क्षिप्रप्रतिष्ठामपि ॥
विद्यारम्भमथाग्निहोत्रमसकृज्ज्ञानक्रियां वैद्यकं
माङ्गल्यानि बुधोदितानि च गुरौ लग्नेऽन्हि वा कारयेत ॥२२॥

शुक्रस्य

उद्वाहं गमनं तुरङ्गगजयोः पूर्वे तथा वाहनं
माङ्गल्यध्रुवपौष्टिकानि भिषजां कर्माणि शिल्पान्यपि ।
नानारत्नविभूषणानि सुरतं कृष्णोपयोगां स्तथा
यच्चोक्तं बुधजीवयोश्च दिवसे कुर्याद्दिने तद्भृगोः ॥२३॥

नृत्यगीतादिवादित्रस्वर्णस्त्रीरत्नभूषणम् ।
भूषण्योत्सवगोधान्यकर्म भार्गववासरे ॥२४॥

शनेः

दासीदासखरोष्ट्रपक्षिमहिषीलोहानि कर्माश्मनां
नीलीकण्टकचर्मसंग्रहमथ क्षारास्त्रयोगानपि ।
दीक्षां भिक्षुजनस्य वेश्मविशनं कर्मध्रुवं बन्धनं
भौमोक्तं च शनौ[1] विवाहसहितं कुर्यादसत्पौष्टिकम् ॥२५॥

---

१ मूलपुस्तकेषु शनेःफलं नारदोक्तं नवर्ततेऽतोऽत्र समुद्धृतो वर्तते एष पाठः

CC-0. Nepal Sanskrit Academy, Kathmandu

त्रपुसीसायशिश्मास्त्र विषया पासवानृतम् ।
स्थिरं कर्माखिलं वास्तुसंग्रहं सौरिवासरे ॥२६॥

श्रीपतिः---

सोमसौम्यगुरूशुक्रवासराः सर्वकर्मसु भवन्ति सिद्धि[1]दाः ।
भौमसूर्यशनिवासरेषु तु प्रोक्तमेव खलु कर्म सिध्यति ॥२७॥

अथकालचक्रभ्रमणनाडिका

नीलनीतिनिधिनामनाभिशानादिनाथमितिनाडिकाक्रमात् ।
मन्दवारमुखवारनाडिकाः प्राहुरिन्दु ग्रहमुख्यसूरयः ॥२८॥

अथ कुलिक-यमघण्टकार्धपहरज्ञानम्

रविसमभं शशितमसं भुविजमागानि चन्द्रजं भेरीशम् ।
दिविजगुरूलोकदानं कवि रसगं शनि कुजाति यामार्धम् ॥२९॥

अर्धप्रहर आदौ तु मध्यमे यमकण्टकम् ।
कुलिकेऽन्त्यो विवर्ज्याः स्युस्तिस्रो द्वावेकनाडिका ॥३०॥

यामार्धोदयकण्टकः कुलिक इत्येवं हि वारोद्भवा
दोषा लग्नगतांश-सौम्यखचरप्रोद्‌भूतसर्वान् गुणान् ॥
निघ्नन्त्येव यथा शरीरमखिलं दोषत्रयंप्रोत्कट
चान्योऽन्यं गुणसंचयानपि महान् यामार्धतुल्या पृथ[2]क् ॥३१॥

कुलिके निधनं विद्याद् यमकण्टेऽर्थनाशनम् ।
यामार्धे कार्यनाशश्च प्रोक्ता यामार्धसंख्यया ॥३२॥

---

१ सोमसौम्यगुरूशुक्रवासरं सर्वकर्मशुभदं तु सिद्धिदम् पू. अ. प. ।

२ मदान्मासार्धतुल्याः पृथक् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

मनुः—

निधनं प्रहरार्धे तु निःस्वत्वं यमकण्टके ।
कुलिके सर्वनाश स्याद् रात्रावेते नदोषदाः ॥३३॥

गर्गः—

विन्ध्यस्योत्तरकूले तु यावदातुहिनाचलम् ।
यमकण्टकदोषोऽस्ति नान्यदेशेषु विद्यते ॥३४॥

कुलिकदोषभङ्गमाह वसिष्ठः—

शुभग्रहश्च वारेशो वलयुक्तो यदा तदा ।
कुलिकेऽपि नः दोष स्याद् वारेशो वा विलग्नगः ॥३५॥

यमकण्टक भङ्गमाह

लग्नाच्छुभग्रहः केन्द्रे त्रिकोणे स्थितवान् यदि ।
चन्द्रो वाऽपि न दोषः स्याद् यमकण्टकसमुद्भवम् ॥३६॥

अथकालहोराफलभङ्गमाह गुरूः—

आद्यः षष्ठो द्वितीयोऽस्मात् तस्मात् षष्ठः पुनः पुनः ।
सार्धनाडी द्वयं चैव दिवारात्रौ तथा क्रमात्[1] ॥३७॥

श्रीपतिः—

वारप्रवृत्तिर्घटिका द्विनिघ्ना कालाख्यहोरापतयः शराप्ताः ।
दिनाधिपाद्या रविशुक्रसौम्यशशाङ्कसौरेज्यकुजाः क्रमेणः ॥३८॥

---

१ यथाक्रमात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अत्र श्रीपतिना 'सूर्योदयाद् रावणराजधान्या' मित्यादि, सूर्यब्रह्म लोमश पौलिशवसिष्ठसोमेन्द्रगुर्वादिषु सिद्धान्तेषु वचन विरोधात् कालचक्रभ्रमण मन्यथा स्यात् ।।

अत्र कमलासनः—

पुस्करद्वीपमध्ये तु मया संस्थापिता गृहाः ।
मध्योदयार्धरात्रास्तकाले वारः प्रजायते ।।३९।।

सूर्यसिद्धान्तेऽपि --

वारः प्रवृत्तिः प्राग्देशे क्षपाऽर्धेप्यधिके भवेत् ।
तद्देशान्तरनाडीभिः पश्चादूने विनिर्दिशेत् ।।४०।।

चन्द्रसिद्धान्तेऽपि --

उदयति दिननाथे वासरस्य प्रवृत्तिर्भवति सततमिक्षुप्लक्षयोः सन्धिदेशे।
अथ सुजलसमुद्रप्लक्षपूर्वेषु सन्धिष्वपि दिनदिनपांशस्यान्तरे तत्तदूर्ध्वे ।।४१।।

द्वीपाद्द्वीपान्मेरुसंसक्तरेखा याया जम्बूद्वीपभूमिं स्पृशन्ती ।
तस्यां तस्यां वासरस्य प्रवृत्तिस्तत्तद्द्वीपे यत्र तत्रैव नूनम् ।।४२।।

होराफलानि ।

भानुहोरा मृतिं कुर्याच् शुक्रहोरा विवाहदा ।
बुधहोरा पुत्रदा स्याच्चन्द्रहोरा स्थिरासनम् ।।४३।।

जाड्यता शनिहोरायां वस्त्रालङ्कारदा गुरोः ।
कारावन्धं भौमहोरा सप्तहोराः प्रकीर्तिताः ।।४४।।

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रश्नकाले यदा होरा तदा फलमवाप्नुयात् ॥४५॥

श्रीपतिः—

रविः स्थिरः शीतकरश्चरश्च महीज उग्रः शशिजश्च मिश्रः ।
लघुः सुरेज्यो भृगुजो मृदुश्च शनिश्च तीक्ष्णः कथितो मुनीन्द्रैः ॥४६॥

नारदः—

बलप्रदस्य खेटस्य वारे सिध्यति यत्कृतम् ।
तत्कर्म बलहीनस्य दुःखेनाऽपि न सिद्ध्यति ॥४७॥

श्रीपतिः—

यस्य गृहस्य वारे यत्किञ्चित् कर्म प्रकीर्तितम् ।
तत्तस्य कालहोरायां सर्वमेव विधीयते ॥४८॥

सप्तसमुद्रद्वीपक्रमः—

उदयो यो लङ्कायां सोऽस्तमयः सवितुरेव सिद्धपुर्याम् ।
मध्याह्नो यमकोट्यां रोमकबिषये तदर्धरात्रं स्यात् ॥४९॥

ब्रह्मसिद्धान्ते—

शाल्मलिप्लक्षपुष्करशाकक्रौञ्चकुशाह्वयाः ।
जम्बूद्वीपाश्च सप्तैते लङ्कायाः पूर्वतः क्रमात् ॥५०॥

सुरेक्षुसुजलक्षीरदध्याज्यलवणार्णवाः ।
जम्बूद्वीपस्य सप्तैते लङ्कायाः पूर्वतः क्रमात् ॥५१॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने वारप्रकरणाऽध्यायः ॥५२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

एकोनत्रिंशोऽध्यायः

नक्षत्रप्रकरणम्

श्रीपतिः–

भेशा दस्रयमाग्निधातृशशिनः शर्वोऽदितिर्वाक्पतिः
कद्रूजाः पितरो भगोऽर्यमरवित्वष्ट्राह्वया मारुतः ।

शक्राग्नी त्वथ मित्र इन्द्रनिर्ऋती तोयं च विश्वे विधि
र्गोविन्दोवसवोऽम्बुपाजचरणाहिर्बुध्नपूषाभिधाः ॥१॥

एषु कर्मसु धिष्ण्यानि मुनिभिः कीर्तितानि तु ।
तेषु तानि प्रयुञ्जीत राशिष्वपि तथैव च ॥२॥

अथनक्षत्रफलानि

वसिष्ठनारदौ–

हस्त्यश्वबन्धरथयानपुरप्रवेश–भैषज्यमन्त्रगृहदेवसुरप्रतिष्ठा ।
यात्राभिषेकमखदीक्षणचौलमौञ्जीपुण्यादिशान्तिकविधानमथाश्विनीषु ॥३॥

वस्त्रोपनयनक्षौरसीमन्ताभरणक्रिया ।
स्थापनाश्वादियानं च कृषिविद्यादयोऽश्विभे ॥४॥

बापीकूपतडागाग्नि विषशस्त्रोग्रदारुणः ।
विलप्रवेशगणितनिक्षेपा याम्यभे शुभाः ॥५॥

युद्धाभिघातवधबन्धविषाग्निशस्त्रभेदानृताभिभवसाहसचौर्यकर्म ।
द्युताभिचारनिधिमन्त्रविलप्रवेशखन्यञ्जनानि यमभे खलु यान्तिसिद्धिम् ॥६॥

CC-0. Nepal Sanskrit Academy, Kathmandu

आधानहोममखदीक्षणवह्निपूजाधाजूश्च धातुविहिताऽभरणादिकर्म ।
मन्त्रौषधारसरसायनसाधनानिसिध्यन्तिवह्निविहितानिहुताशनर्क्षे ।।७।।

अग्न्याधानास्त्रशस्त्रोग्रसंधिविग्रहदारुणाः ।
संग्रामौषधवादित्रक्रियाः शस्ताश्च वह्निभे ।।८।।

सीमन्तोपनयोद्वाहवस्त्रभूषाः स्थिरक्रियाः ।
गजवास्त्वभिषेकाश्च प्रतिष्ठा ब्रह्मभे शुभा ।।९।।

राजाभिषेकगृहहर्म्यपुरप्रवेशहोमादिशान्तिकविवाहवधूव्रतानि ।
शालीक्षुवृक्षयवसर्षपवापनानि नव्याम्बराभरणभूषणमब्जजर्क्षे ।।१०।।

माङ्गल्यव्रतहोमदानतपसोयज्ञक्रियासाधनं
कृष्णारम्भपुरप्रवेशगमनं क्षौरक्रियासंगमम् ।

शान्तिस्नानजपाभिषेकनियम देवाग्निपित्रर्चनं
कुर्याच्छोभनपौष्टिकानि विविधानीन्दोश्चभे [1] संयुते ।।११।।

प्रतिष्ठा भूषणोद्वाहसीमन्तोपनयक्रियाः ।
क्षौरवास्तुगजोट्राश्वयात्राः शस्ताश्च चन्द्रभे ।।१२।।

ध्वजतोरणसंग्रामप्राकारप्रक्रियाः शुभाः ।
सन्धिविग्रहवेतालरसाद्याः शर्वभे सदा ।।१३।।

शत्रूणां निधनं तथाऽग्निदहनं दुष्टाश्वसंमर्दनं
शास्त्रा[2]र्थग्रहणं प्रचौर्यमवनं द्वारोर्गलोद्[3]घाटनम् ।

---

[1] इन्दौ स्वभे पा. । [2] शस्त्रास्त्र पा. । [3] द्वारोद्गलो ख ।

CC-0. Nepal Sanskrit Academy, Kathmandu

रक्षोभूतपिशाचडाकिनिगणावेशास्ततोच्चाटनं
यच्चान्यद् भुविरौद्रकर्म गदितं तद्रौद्रभे कारयेत् ॥१४॥

सीमन्तपुंसवनपौष्टिकचौलमौञ्जीवेदव्रतानिविविधाध्ययनं प्रयाणम् ।
आन्दोलदोलवरवाहनवस्त्रशटयाऽ लङ्कारमप्यदितिभे
विदधीत धीमान् ॥१५॥

प्रतिष्ठायानसीमन्त वस्त्रवास्तूपनायनम् ।
क्षौराऽश्वकर्माऽदितिभे विधेयं धान्यभूषणम् ॥१६॥

यात्रा प्रतिष्ठासीमन्तव्रतबन्धप्रवेशनम् ।
करग्रह विना सर्वं कर्म देवेज्यभे शुभम् ॥१७॥

वेदाध्यापनशास्त्रसंग्रहविधिं शस्त्रास्त्र संशिक्षणं
मन्त्राराधनदेव पूजनभिषक्कार्यं नृपालोकनम् ।
कुर्याच् शान्तिक पौष्टिकानि नृपतेर्यात्राभिषेकं तथा
पुष्ये भूषणचित्रवस्त्रविविधाऽलङ्कार संधारणम् ॥१८॥

मन्त्रप्रयोगमभिचारविषाग्निदाह–
व्यायामशस्त्र शठकर्मविवादनाद्यम् ।
कुन्तासिशक्तिशरकार्मुकसंग्रहं च
कुर्याद्विषप्रहरणे खल सर्पधिष्णे ॥१९॥

अनृत व्यसनद्यूत धातुवादौषधाहवम् ।
विवाह रसवाणिज्यकर्म कद्रुजभे हितम् ॥२०॥

कृषिवाणिज्यगोधान्यरणोपकरणादिकम् ।
विवाहनृत्यगीताद्यं निखिलं कर्म पितृभे ॥२१॥

CC-0. Nepal Sanskrit Academy, Kathmandu

कन्यादानं सर्वमन्त्रप्रयोगं कुर्याच्छ्राद्धं तर्पणं वै पितॄणाम् ।
द्यूतारम्भं खन्यवादं विलं च पित्रे चोक्तं संयुगंचौरकार्यम् ॥२२॥

पुरप्रवेशं नगराऽभिघातं शस्त्रादिविद्याभ्यसनं च चौर्यम्।
मन्त्रौषधं गारूडतन्त्रवादं भाग्येस्थितेन्दौ नियतं विदध्यात् ॥२३॥
विवादविषशस्त्राग्निदारूणोग्राहवादिकम् ।
पूर्वात्रयेऽखिलं कर्म कर्तव्यं मांसविक्रयम् ॥२४॥

वस्त्राभिषेकसीमन्तविवाहव्रतबन्धनम् ।
प्रवेशस्थापनाश्वेभवास्तुकर्मोत्तरात्रये ॥२५॥

वापीकूपतडागदीर्घिकपुरप्रासाददेवालयाम्
शय्यारत्नविभूषणाङ्गरचनासिंहासनाध्यासनम् ।
स्नानोद्वर्तनमङ्गलं परिणयं नीराजनाऽरार्तिकं
कृष्णारम्भपुरप्रवेशमखिलं कर्तव्यमर्यम्णभे ॥२६॥

पाणिग्रहाद्यखिलमङ्गलकर्मयात्रा राजाभिषेकगृहहर्म्यसुरप्रतिष्ठाम् ।
वीणादिवस्त्रवरभूषणवाहनानी मन्त्रक्रियामखिलकर्म करे विदध्यात् ॥२७॥

प्रतिष्ठोद्वाहसीमन्तयानवस्त्रोपनायनम्
क्षौरवास्त्वभिषेकाश्च भूषणं कर्म हस्तभे ॥२८॥

प्रवेशवस्त्रसीमन्त प्रतिष्ठाव्रतबन्धनम् ।
त्वाष्ट्रभे वास्तुविद्याश्च क्षौरभूषणकर्म यत् ॥२९॥

चित्राम्बराऽभरणभूषण चित्रकर्म मुक्तामणिश्रवणविद्रुमवेधनं च ।
त्वाष्ट्रे व्रतोपनयनक्षुरकर्म कुर्यात् संगीतनृत्यविविधानि[1]
चवाद्यविद्याम् ॥३०॥

---

[1] विविधसंगीतनृत्यानीतिभाव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

सस्योद्यानपुराऽमरालयनृपप्रासादसंस्थापनं
दोलान्दोलसुखासनोष्ट्रतुरगस्तम्बेरमाऽऽरोहणम् ।
विद्यारम्भविवाहपौष्टिकमणिकृष्णाद्यनेकोद्यमा
नानारत्तविभूषणाङ्गरचनाः प्राहुर्बुधा मारुते ॥३१॥

मणिकनकविभूषायज्ञहोमोपवासान् वृतहुतवहकर्म स्नेहपाकादि कुर्यात् ।
जगदुरिह[1] मुनीन्द्रा धातुकर्मद्विदैवे सुरगुरूपितृपूजां
वर्जयेत् क्षेमयात्राम् ॥३२॥

चित्रक्रियाकनकरत्नपरीक्षणं च संबाहनंतुरग गोवृषकुञ्जराणाम् ।
चूर्णप्रयोगनयनाञ्जनभैषजानि यात्राविवाहशुभपौष्टिककर्म मैत्रे ॥३३॥

अरिनगरविघातं भेदयुक्तोग्रकर्म धनुरसिमुसलादिन् स्वीकृतं शान्तिकार्थम् ।
कपटकुटिलमिथ्या स्नेहदम्माऽभिचारैर्द्रविणहरणमैन्द्रे
प्रोक्तमन्यायमार्यैः ॥३४॥

संरोहणं विविधगुल्मलतातरूणां मुद्गेक्षु-माष-तिल-सर्षपवापनं च ।
मन्त्रौषधास्त्रनिखिलागमतन्त्रविद्याप्रारम्भणं वरवधूवरणं च मूले ॥३५॥

तडागवापीह्लदकूपदीर्घिका प्रवालमुक्तामणिसंग्रहं च
गृहार्गलोद्घाटनशस्त्रशिक्षां समारभेताम्बुभिधे निशाकरे ॥३६॥

कुर्यादायतनंस्थिरं शुभगृहंगीर्वाणसंस्थापनं
देवाद्यर्चनशान्तिकोत्सवविधिं भूपाभिषेकं तथा ।
स्तम्भस्थापनबीजवापनमखं गुल्मादिसंरोहणं[2]
सीमासाधनवस्त्रभूषणशुभोद्वाहादिकं वैश्वभे ॥३७॥

---

[1] जगुरिह हि क.च. । [2] सवाहनं प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहने

कुर्याद् होमं यज्ञदीक्षाव्रतादि विद्यारम्भं चौलमौञ्जीविधानम् ।
गर्भाधानं कर्णवेधप्रयाणं व्राह्मे[1] धिष्ण्ये देववास्तुप्रतिष्ठाम् ॥३८॥

विद्यागमोपनयनाम्बरभूषणादिश्वेतातपत्रचमरासनवाहनानि ।
यात्राभिषेकशुभशान्तिकपौष्टिकानि सिध्यन्ति हर्म्यनगराणि च वासवर्क्षे३९

जलाशयोद्यानकृषिक्रियाश्च प्रवालमुक्तामणिसंग्रहं च ।
तुरङ्गशान्ति जपहोमदानं कुर्याच्छतर्क्षे नयनाञ्जनं च[2] ॥ ४० ॥

विद्यारम्भं बन्धनं कुञ्जराणां वेतालाद्यावेशनं खन्यवादः ।
द्यूतं चौर्यं हिंस्तयन्त्रप्रयोगः शास्त्राभ्यासश्चाजपादे विधेयम् ॥४१॥

स्थिरक्रियामङ्गलपौष्टिकानि विवाहयज्ञाश्च परिग्रहाश्च ।
नृपाभिषेकाम्बरभूषणानि सिध्यन्त्यहिर्बुध्न्यभसंयुतेऽब्जे ॥४२॥

कृषिक्रियासेतुनृपाभिषेकविवाहसीमन्तजलक्रियाश्च ।
गजाश्चसंरोहण[3]वास्तुकार्यं कुर्यात् प्रवेशं गमनं च पौष्णे ॥४३॥

श्रीपतिः—

मूलाग्नेयमघाद्विदैवभरणीसार्पाणि पूर्वात्रयं
ज्योतिर्विद्भिरधोमुखं हि नवकं भानामिदं किर्तितम् ॥
वापीकूपतडागगर्तपरिखाः खातो निधेरुद्धृतिः
क्षेपोद्यूतविलप्रवेशगणितारम्भादि तत्रेष्यते ॥४४॥

ज्येष्ठादित्यकराश्विनीमृगशिरः पौष्णानुराधानिल
त्वष्ट्राख्यानि वदन्ति भानि मुनयस्तिर्यङ्मुखान्येषु[4] तु ।

---

[1]विष्णौ । [2]शततारकायाम् । [3]संवाहन प्र । [4] तिर्यङ्मुखाख्येषु प्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अश्वेभोष्ट्रलुलायरासभवृषोरआदिद
मन्त्रीयन्त्रहलप्रवाहग मनारम्भः प्रसिद्ध्यन्ति च ॥४५॥

पुष्पार्द्राश्रवणोत्तराशतभिशगव्राह्मश्रविष्ठाह्वया–
न्यूर्ध्वास्यानि नवोदितानि मुनिभिर्धिष्णान्यथैतेषु तु ।
प्रासादध्वज धर्मवारणगृहप्राकारसत्तोरणो[1]–
च्छायारामविधिर्हितो नरपतेः पट्टाभिषेकादि च ॥४६॥

रोहिणीसहितमुत्तरात्रयं
कीर्तयन्ति मुनयो ध्रुवाह्वयम् ।
बीजहर्म्यनगराभिषेचना–
रामशान्तिषु हितं स्थिरेषु च[2] ॥४७॥

त्वाष्ट्रमित्रशशिपूषदैवतान्यामनन्ति मुनयो मृदून्य था ।
मित्रकार्यरतिभूषणाम्बरोद्गीतमङ्गलविवानमेषु तु ॥४८॥

अश्विनीगुरुभमर्कदैवतं साभिजिल्लघु चतुष्टयंमतम् ।
पण्यभूषणकलारतौषधंज्ञानशिल्पगमनेषु सिद्धिदम् ॥४९॥

मुलशक्रशिवसर्पदैवतंतान्युल्लपन्त्यथ च तीक्ष्णसंज्ञया ।
भूतयक्षनीधिमन्त्रसाधनोद् भेदबन्धवधकर्म चात्र तु[3] ॥५०॥

---

१ ध्वजहर्म्यतोरणगृह ।
२ रामयानविधिषु प्रशस्यते लि.पु. । ४७ अत्र 'चरं चलं ' चर स्थिरैति श्लोकद्वयमासीत् । ३ वधकर्मसिद्धिदम् क.च. । मठकर्मसिद्धिदम् पृ. । नक्षत्रफलाध्यायस्य ५१ श्लोकं यावत् पत्रत्रय त्रुटितत्वात् अ पुस्तके न सन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वैष्णवत्रययुतंपुनर्वसुमारूतं च चरपंचकं त्विदम् ।
दन्तिवाजिकरभोक्षवाहनारामयानविधिषु प्रशस्यते ॥५१॥

पूर्विकात्रितयमन्तकंमघेत्युग्रपंचकमिदं जगुर्बुधाः ।
शाठ्यनाशविशघातबन्धनोत्सादशस्त्रदहनादिषु स्मृतम् ॥५२॥

हव्यवाहभयुतंद्विदैवतं मिश्रसंज्ञमथ मिश्रकर्मसु ।
स्वाभिधानसमकर्मसाधने कीर्तितानि सकलानि सूरिभिः ॥५३॥

चरं चलं क्रूरमुशन्ति चोग्रं ध्रुवस्थिरं दारुणभं च तीक्ष्णम् ।
क्षिप्रं लघूक्तं मृदु मैत्रसंज्ञं साधारणं मिश्रमिति ब्रुवन्ति ॥५४॥

चरस्थिरमृदुक्षिपूतीक्ष्णमिश्रोग्रकाणि च
सप्तभेदानि भानिस्युः संज्ञाफलसमा हि ॥५५॥

अथ पुष्यप्रशंसा

पुष्यो निहत्यन्यकृतं च दोषं पुष्योक्तदोषं न निहन्ति चान्यः ।
यथार्क रश्मिस्तिमिरं निहन्ति निहन्तितं तन्न कदाचिदेव ॥५६॥

यथा विवस्वान्नखिलग्रहाणां तथा मृगाणां मृगनायकश्च ।
यथेन्द्रियाणां विमलं मनो वा तथैव पुष्यो बलवानुडूनाम् ॥५७॥

विधुर्विपन्नोऽपि युतोऽपि पापैर्विशुद्धचन्द्रे सति तारके च ।
सर्वार्थसिद्धिं विदधाति नूनं पुष्योऽपि पाणिग्रहणं विहाय ॥५८॥

कृत्तिकादि चतुस्तरा आदित्यादिस्त्रिभिस्तथा ।
अन्तर्वहिश्च ऋक्षाणि पर्यायेण पुन:पुणः ॥५९॥

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रत्यरिनैधनसंज्ञा विपत्करा वापि जन्मसंज्ञा वा।
पाणिग्रहणं मुक्त्वा ननं सर्वार्थसिद्धिदा पुष्यः ॥६०॥

अथ कुलाकुलादिनक्षत्राणि।

पितृवसुतिष्येन्द्वनलत्र्युत्तरभाग्यद्विदैवचित्राणि।
देवचिकित्सककौणपसहितानि कुलभानि ॥६१॥

अजचरणादितिपूषाधातृमरुद्विष्णुशक्राणि।
अहियमधातृजलान्युपकुलभान्यन्यानि कुलकुलानि ॥६२॥

उपकुलभेषु च याता विजयं प्राप्नोत्यसंशयं क्षिप्रम्।
कुलभेषु च भङ्गः स्याद् यातुः सन्धिस्तयोः कुलकुलेषु ॥६३॥

कुलभेषु च ये जाता मनुजा भवन्ति कुल मुख्याः।
उपकुलभेषु परविभवान् भोक्तारस्त्वन्यभेषु सामान्याः ॥६४॥

रविचन्द्रसुरेज्ययमाः कुलाख्या ह्युपकुले च सितभौमौ।
कुलकुलजः शशितनयः सन्धि कृदुभयोः क्षितीशयोर्नित्यम् ॥६५॥

अथ भुक्ताभुक्तनक्षत्राणि।

भुक्ताभुक्तं मध्याह्नमवलम्ब्य नक्षत्रवृन्दम् ॥६६॥

अध्यर्धादिनक्षत्राणि।

सिद्धान्तशिरोमणौ—

स्थूलं कृतं भाग्रयनं सुखार्थं ज्योतिर्विदां संव्यवहारहेतोः।
सूक्ष्मं प्रवक्ष्येऽथ मुनिप्रदिष्टं विवाहयात्रादिफलप्रसिद्धौ ॥६७॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अध्यर्घभोगानि षडत्र तज्ज्ञाः प्रोचुर्विशाखादितिभध्रुवाणि ।
षडर्द्धभागानि च भोगिरुद्र वातान्त केन्द्राधिपवारुणानि ॥६८॥

शेषान्यतः पंचदशैव भागो व्युक्तो भभोगःशशिमध्यभुक्तिः ।
सर्वर्क्षभोगानि च चक्रलिप्ता वैश्वाग्रतः स्यादभिजिद्भभोगः ॥६९॥

कलिकृतादिष्टखगाद्विशोध्य दस्रादिभोगान् गतभानिविद्यान् ।
खपौष्णभाद् द्वादशरौद्रधिष्ण्या न्सुराधिपाद भानि नव क्रमेण।७०।

पूर्वापरार्धापरभागगेन्दु भुक्तेऽखिलव्योमचरास्तयैव ।
जघन्यधिष्ण्यानि जलेशसार्परौन्द्रेन्द्र याम्यानिलदैवतानि ॥७१॥

अध्यर्घधिष्ण्यान्यदितिर्द्विदैव स्थिराणि शेषाणि समाह्वयानि ।
अध्यर्धधिष्ण्ये ह्युदितः शशाङ्कः करोति धान्यं महदर्शमन्तः ।
जघन्यभेऽनर्घमसंशयेन समर्घमन्येषु च मासिमासि ॥७२॥

ज्ञात्वैवमेवं मणिवजीधातुमूलोर्णकर्पूररसादिकानाम ।
अर्घं वदेज्ज्योतिषिकः प्रजानां समस्तवस्तूत्तमसंग्रहार्थम् ॥७३॥

एतानि जाद्यन्यसमाधिकर्क्षाण्यत्रार्थखण्डे विनियोजितानि ।
नोद्वाहजन्मादिषु यत्र चोक्तं तत्राऽभिजिद्भं विनियोजनीयम् ॥७४॥

श्रीपतिः—

अन्धकं तदनु मन्दलोचनं मध्यलोचनमतः सुलोचनम् ।
रोहिणी प्रभृतिभि चतुर्विधं नूनमत्र गणयेत् पुनः पुनः ॥७५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ कालविधाने

रोहिण्युत्तरभं स्थिरं गिरिशमूलेन्द्रोरगं दारुणं
क्षिप्रं चाश्विदिनेशपुष्यमनलेन्द्राग्नी तु साधारणम् ।
उग्रं पूर्वमघान्तकंमृदुमृगत्वष्ट्रान्त्यमैत्रं चरं
विष्णुस्वातिशतोडुवस्वदितयः कुर्युः स्वसंज्ञाफलम् ॥७६॥

वसिष्ठः—

शशाङ्कः तोयेशकरार्यमित्रध्रुवाम्बुपित्रेवसुदैवतेषु ।
उद्यानवाप्यादि तडागकूपकार्याणि सिद्ध्यन्ति जलोद्धृतंयत्[1] ॥७७॥

कमलासनसंहितायाम् ।

विषवृक्षोद्भवोऽश्विन्यां भरण्यामलकोद्भवः ।
उदुम्बरस्तथाग्नेय्यां रोहिण्यां चैव जम्बुकः[2] ॥७८॥

खदिरः सोमनक्षत्रे कृत्स्नो सौ रौद्रभे भवः[3] ।
वंशः पुनर्वसूजातः पुष्ये चाश्वत्थ एव च ॥७९॥

अश्लेषानागवृक्षस्य मघा न्यग्रोधजन्मभम् ।
पलाशवृक्षभं भाग्यं प्लक्षश्चार्यमणोद्भवः ॥८०॥

अम्बष्टवृक्षजोहस्तश्चित्रायाश्वितरूभवः ।
स्वात्यामर्जुनवृक्षस्तु विशाखाकनकोद्भवः ॥८१॥

---

१ यतो ध्रुवं यत् पू० । २ विन्दुक प्र. पा । ३ रौद्रभोद्भवः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

मैत्रेवकुलजन्मस्याज्ज्येष्ठायां विष्टिजातकः[1] ।
मूलंसर्जस्यजन्मर्क्षं श्रवणोऽर्कस्यजातकम् ।।८२।।

धनिष्ठायां शमीजन्म वारूणे तु कदम्बकः ।
अजैकपादेचूतः स्यादहिर्बुध्ने तु निम्बजम्[2] ।।८३।।

मधुकोरेवतीजातः क्रमात्पादपभान्यमी ।
यस्य यज्जन्मनक्षत्रे तस्य तद्गक्षतुल्यताम् ।
भावं रूपं फलं सत्वं रसं सौचं विचिन्तयेत् ।।८४।।

अथ नक्षत्रस्वरूपसंख्याज्ञानं वसिष्ठ आह :--

गुणऋतुपवनगुणेन्दुकृताग्निपवनशराः ।
द्विभुजशरेन्द्विन्दुयुगयुगाग्निरूद्राब्धिवेदगुणाः ।।८५।।

वेदशतद्विद्विरदा दसादीनां च तारका[3] संख्या ।
हृतनष्टादिषु कार्यं तारकसंख्यैः पृथक् पृथग्रूपैः ।।८६।।

अश्वमुखसमानरूपं योन्याकारं च नापितक्षुरवत् ।
सुरगृहसदृशं शश्वन्मस्तकसदृशं मृगस्यैव ।।८७।।

मणिनिभमोकः सदृशमाशुगसदृशं[4]च चक्रसंकाशम् ।
प्राकारमञ्चशय्याहस्ताकारं च मौक्तिकाकारम् ।।८८।।

---

१ ज्येष्ठाभं विष्टिजातम् । २ अहिर्बुध्न्यं तु निम्बभं
३ वङ्गभाषायाः साहित्यसंहितायाः १२, १३ पत्रे श्रीपत्युक्तास्तारकी संख्या वर्तन्ते । ४ सदृशं हयुदयेन्दुनिभं प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

रत्ननिभं तोरणवत् बलिसदृशं कुण्ड़लाकारम् ।
केसरिविक्रमसदृशं शय्याकारं गजेन्द्रदन्ताभम्[1] ॥८९॥

वरश्रृङ्गाटकरूपं विकसितपद्मोपमं नित्यम् ।
वरशय्यासदृशमतः फलसदृशं मातुलुङ्गस्य ॥९०॥

अश्विमुखतारकाणां कथितानीमानि तु स्वरूपाणि ।
दैवविदखिलं सम्यग् ज्ञात्वा सर्वं वदे नियतम् ॥९१॥

इतिश्रीसारङ्गधरसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने नक्षत्रफलाऽध्यायः ॥

अथ त्रिंशोऽध्यायः

योगप्रकरणम्

विष्कम्भः प्रीतिरायुष्मान् सौभाग्यः शोभनस्तथा ।
अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च ॥१॥

गण्डो वृद्धिध्रुवश्चैव व्याघातो हर्षणस्तथा ।
वज्रः सिद्धिर्व्यतीपातो वरीयान् परिघः शिवः

सिद्धिः साध्यः शुभः शुक्लो ब्रह्म ऐन्द्रश्च वैधृतिः ॥२॥

विष्कम्भे घटिकात्रयं च नवकं व्याघातवज्रद्वये
शूले पञ्चविहाय षट्कघटिका गण्डेऽतिगण्डे तथा । ॥३॥

---

१. गजेन्द्रवैलासम् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पूर्वार्धे परिघे विवर्ज्य सकलं निन्द्यं व्यतीपातकं[1] ।
तद्वद्वैधृतिसर्वकर्मशुभदं जालं[2] सदा नश्यति ॥४॥

विरूद्धयोगेषु य आद्यपादः शुभेषु कार्येषु विवर्जनीयः ।
सवैधृतो यो व्यतिपातयोगः सर्वोऽप्यनिष्टः परिघार्धपूर्वम् ॥५॥

चन्दार्कयोर्नयनवीक्षणजातमूर्तिः कालानल[3]द्युतिनिभः पुरुषोऽतिरौद्रः ।
शस्त्रोघतो भुवि पतस्तु निरीक्षणः संघातयेयुरिति च व्यतिपातयोगः ॥६॥

श्रीपतिः—

दीर्घबाहुं महारौद्रं तीक्ष्णदंष्ट्रमथोत्कटम् ।
ब्रह्माण्ड़व्यापिनं देहं कृष्णाङ्गं रक्तलोचनम् ॥७॥

व्यतीपातमिदं रूपं सद्योमरणकारकम् ।
द्वात्रिंशद् घटिकाः पूर्णा भ्रमणे चैकविंशतिः ॥८॥

तिष्ठन्ति घटिकाः सप्त निपाते दश नाडिकाः ।
पूर्णे लक्षगुणं दानं भ्रमणे कोटिरुच्यते ॥९॥

तिष्ठन्ति दश कोटयस्तु निपाते चाक्षयं फलम् ।
व्यतीपातस्य च समो वैधृतिः सर्वकर्मसु ॥१०॥

एष एव व्यतीपातो नामभेदेन वैधृतिः ॥११॥

दिनकर हिमरश्म्योर्दृष्टिसंपातजन्मा
भवति विकृतमूर्तिः कोऽपि रौद्रो मनुष्यः ।

---

१ सकलो निन्द्यो व्यतीपातकः । २ चिन्त्यमिदम् ३ । कालानिल प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पतति भुवनमध्ये मङ्गलानां विनष्टयै[1]
ज्वलनकपिलदृष्टया निर्दहन् वै जगन्ति ।।१२।।

व्याघातशूलपरिघव्यतिपातपूर्वं गण्डाऽतिगण्डकुलिशेषु सवैधृतेषु ।
आदित्यचान्द्रपितृसर्पभदस्रमूल मैत्राख्यतिष्यसुखर्धकिभानि मूर्ध्नि ।।१३।।

एका मूर्द्धगता त्रयोदश तथा तिर्यग्गता स्थापयेद् --
रेखाश्चक्रमिदं बुधैरभिहितं खार्जूरिकं तत्र तु ।
व्याघातादिषुमूर्ध्निभं तु कथितं तत्रैकरेखास्थयोः
सूर्याचन्द्रमसोर्मिथो निगदितो दृक्पात एकार्गलः ।।१४।।

एकार्गले वैधृतिपातयोगे प्रायोऽपि सर्वा परिघस्य वाऽर्धम्[2] ।
सर्वेषु कालेष्वरिवलेषु नूनं शुभार्थिभिस्ता परिवर्जनीयाः ।।१५।।

यथा हि वस्तु प्रबले हुताशे निक्षेपितं तत्र तदाशु भस्म ।
एकार्गले दारुणवह्निरूपे कृतं शुभं सर्वमलं तथैव ।।१६।।

अथाद्यपादमन्त्यगो द्वितीयगस्तृतीयगम् ।
तृयीयगोद्वितीयगं चतुर्थमाद्यपादगः ।।१७।।

बालाग्रदृष्टिपातो यद्वल्लक्षं भिनत्ति धानुष्कः ।
तद्वत् समदृष्टिगतो वेधो विद्धं प्रदूषयति ।।१८।।

विषप्रदिग्धेन हतस्य पत्रिणा मृगस्य मांसं शुभदं क्षताहृते ।
यथा तथात्राऽप्युडुपादवेधतः प्रदूषियोऽन्यत्रितयं शुभावहम् ।।१९।।

---

१ मवृद्धयै । २ प्राप्नोति सर्वं परिघस्य चार्धम् च.प.

CC-0. Nepal Sanskrit Academy, Kathmandu

खार्जूरचक्रस्य समाङ्घ्रिदोषो विलग्नसंभूतगुणाननेकान् ।
शुभग्रहोत्थानिव तान् निहन्ति दारिद्र्यमेकं गुणसंहतीयाः ॥२०॥

विष्कम्भे वैधृतौ वज्रे व्याघाते हर्षणे तथा ।
ऐन्द्रे च क्रान्तिसाम्ये च महापातस्य संम्भवः ॥२१॥

रविबिम्बनेकमार्गाच्छशिबिम्बात् प्रक्रमो व्रजति यावत ।
तावत्फलं तदुक्तं तदभावे तत्फलाभावः ॥२२॥

अहिमर्हिमयूखान्योऽन्यदृष्टिप्रसंगाद् भवति कपिलकेशः
शङ्कुकर्णो मनुष्यः ।
क्षपयति च समस्तोद्वाहयात्राप्रसक्तं जनयति तदनन्तं यच्च
विप्राय दत्तम् ॥२३॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने योगप्रकरणनामाऽध्यायः ॥ ॥

अथ एकत्रिंशोऽध्यायः

करणप्रकरणम्

आद्यं ववं बालवकौलवाख्ये यस्तैतिलं तद्गरसंज्ञितं च ।
वणिक् च विष्टिः करणानि सप्त चराणि यानि क्रमशो भवन्ति ॥१॥

तिथ्यर्धमाद्यं शकुनिद्वितीयं चतुष्पदं नागक संज्ञितं च ।
किंस्तुघ्नमेतान्यचलानि कृष्णचतुर्दशीपश्चिमभागतश्च ॥२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

श्रीपति :—

इन्द्रो ब्रह्मा मित्रनामार्यमभाभूः श्रीःकोनाशश्चेति तिथ्यर्धनाथाः ।
कल्युक्षारव्यौ सर्पवायू तथैव ये चत्वार स्ते स्थिराणां चतुर्णाम् ॥३॥

सिते चतुर्थ्यामिल्त्यार्धमष्टम्याद्यर्धमेव च ।
एकादश्याः परार्धं तु पूर्वार्द्धं पूर्णशीतगोः ॥४॥

कृष्णेऽन्त्यार्धं तृतीयाथाः सप्तम्याद्यर्धलेव च ।
दशम्यालपरार्धं तु पूर्वार्धं तु चतुर्दशी[1] ॥५॥

विष्टिः केवलदुष्टेयं यथाकालसमुद्भवा ।
तद्विपर्ययभद्रा तु सर्वकार्यशुभावहा ॥६॥

इतिलल्लपराशरौ ॥ ॥

ज्यौतिषरत्नमालायाम् श्रीपतिः—

कृष्णे तृतीया दशमी च रात्रौ ससप्तमी भूतदिवा च विष्टिः ।
एकादशी नक्तमतश्चतुर्थी शुक्लाष्टमी पूर्णदिवा च विष्टिः ॥७॥

स्वकालजनिताविष्टिः सा भद्रास्यादकालजा ।
विष्टिरिष्टविनाशाय भद्राभद्रबलप्रदा ॥८॥

दैत्येन्द्रैः समरेऽमरेषुनिजितेष्वीषः क्रुधा दृष्टवान्
तत्कोपात् किलनिर्गता खरमुखी लाङ्गूलिनी च त्रिपात् ॥
विष्टिः सप्तभुजा मृगेन्द्रगलका क्षामोदरी प्रेतगा
दैत्यघ्नी मुदितैः सुरैस्तुकरणंप्रान्ते नियुक्ता सदा ॥९॥

---

१ पूर्वार्धं शूलिनस्तिथेः पा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहने

उवाच सेश्वरं भद्रा ग्रासोपायः कथं मम ।
कृतानि शुभकर्माणि त्वं सदा लक्ष्यसे त्वयि ॥१०॥

ज्यौतिषरत्नमालायाम्—

नाड्यस्तु पञ्चवदनं गलकस्तथैका वक्षो दशैकसहिता नियंत, चतस्त्र । नाभिः कटिः षड्थ पुच्छलता च तिस्रो विष्टेर्बुधैरविहितोऽङ्ग विभाग एष ॥११॥

मुखे कार्यध्वंसो भवति मरणं चाथ गलके
धने हानिर्वक्षस्यथ कटितटे[1] बुद्धिविलयः ॥
च्युतिर्नाभीदेशे[2] विजयमथ पुच्छे च जगदुः
शरीरे भद्रायाः पृथगिह फलं पूर्वमुनयः ॥१२॥

असितजलदवर्णा दीर्घनासाग्रदंष्ट्रा विपुलहनुकपोला पिण्डकोद्धूतजङ्घा । अनलशतसहस्रं चोद्गिरन्ती समन्तात् पतति भुवनमध्ये कार्यनाशाय विष्टिः ॥१३॥

मृत्योः सुता केतुशताग्रजाता कृष्णाकुमूर्तिः सततं कुचेला ।
देवैर्नियुक्ता करणान्तसंस्था विष्टिस्तु सर्वत्र विवर्जनीया ॥१४॥

पृथिव्यां यानि कार्याणि शुभान्यप्यशुभानि च ।
तानि सर्वाणि सिद्ध्यन्ति विष्टिपुच्छे न संशयः ॥१५॥

लल्ल :—

दिवा परार्धजा विष्टिः पूर्वार्धोत्था यदा निशि ।
तदा विष्टि शुभायेति कमलासन भाषितम् ॥१६॥

---

१ कटितले क. च. । २ नाभेर्देशे ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ब्रह्मसिद्धान्ते —

दिवा परार्धजा विष्टिर्विष्टिरेति दिवानिशो ।
सा ग्राह्या त्वन्यथा विष्टिः सर्वकर्मविनाशिनी ।।१७।।

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने करणऽध्यायः

अथ द्वात्रिंशोऽध्यायः

चन्द्रावस्था–चन्द्रबलं च ।

लल्लः–

ताराबलेन चन्द्रश्चन्द्रबलाद् भास्करग्रहणम् ।
भास्करबलेन सर्वं यद्यप्यशुभास्तथापि शुभा ।।१।।

वसिष्ठः–

रविसंक्रमणे ग्रहणे ग्रहसंक्रमणे यदाऽयनाब्दादौ
यादृग्विधे हिमांशौ तादृक्फलमिनमुखादीनाम् ।।२।।
विधोर्बलाबलेनैव संक्रममाणो दिवाकरः ।
ददाति तत्फलं नृणां तस्मिन् मासे तु गौणतः ।।३।।

लल्लः–

यादृशेन शशाङ्केन ग्रहःसंचरते नृणाम् ।
तादृशं फलमाप्नोति शुभं वा यदि वाऽशुभम् ।।४।।

यादृशन हिमरश्मिमालिना संक्रमो भवति तिग्मरोचिषः
तादृशः फलमवाप्नुयान्नरः साध्वसाध्वपि वशेन शीतगोः ।।५।।

CC-0. Nepal Sanskrit Academy, Kathmandu

जन्मानलर्तुसप्तमदशमैकादश शुभश्चन्द्रः ।
यदि विषय नव द्वादश पक्ष समुद्राष्टकैर्नहतः ॥६॥

गोचरशीतकरः सितपक्षे पञ्चमगो नवगोधनगो वा ।
वासवमन्त्रिसमं फलकाले प्रीतिकरोऽयमिति प्रवदन्ति ॥७॥

उत्तरायण आदित्ये शुक्लपक्षेऽपि चन्द्रमाः ।
द्विपञ्चनवमे श्रेष्ठ इति गार्ग्यस्य निश्चयः ॥८॥

वलक्षपक्षादिगते हिमांशौ शुभाशुभं पक्षमुदाहरन्ति ।
सितेतरादावशुभं शुभं च पक्षावनिष्टौ भवतोऽन्यथा तौ ॥९॥

वसिष्ठः–

प्रथमदिने वत्सरतः शुभदे चन्द्रे च यस्य पुरुषस्य ।
तद्वर्षं शिशिरकरः शुभफलदस्तस्य वेधयुक्तोऽपि ॥१०॥

अयनादौ ऋतुसमये मासे चाप्येवमेव जानीयात् ।
ताराबलमपि तच्छुभतारा चेत्तत्तथैव शुभदा स्यात् ॥११॥

मासे तु शुक्लप्रतिपत्प्रवृत्ते पूर्वे शशीमध्यबलो दशाहे ।
श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यैस्तु दृष्टो बलवान् सदैव ॥१२॥

विधुरधिकबलीयान् कान्तिमान् शुक्लपक्षे
बलमबलमिहोक्तं तारकाया ग्रहज्ञैः ।
वलवति सति कान्ते विद्यमानेऽपिदक्षे
प्रभवति नहि कर्तुं सर्वकार्याणि योषा ॥१३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

३२ चन्द्रबलाऽध्याय :

नारदः–

चन्द्रस्य द्वादशावस्था राशौ राशौ यथा क्रमात् ।
यात्रोद्वाहादिकार्येषु संज्ञातुल्य फलप्रदा ॥१४॥

षष्टिघ्नं चन्द्रनक्षत्रं तत्कालघटिकान्वितम् ।
वेदघ्नमिषुवेदाप्तमवस्था भानु भाजिता ॥१५॥

प्रवासनष्टाख्यमृताजयाख्या हास्यारतिक्रीडितसुप्तिभुक्तिः ।
ज्वराह्वयाकम्पितसुस्थिते च द्विषट्कसंख्या हिमगोरवस्थाः ॥१६॥

अथ चन्द्रस्य घटिकावस्था ।

स्थानभ्रष्टस्तपोऽन्यस्त्रीसेवी चोरो गजस्थितः ।
सिंहासनस्थो राजा च तत्सेव्यो जितभूपतिः ॥१७॥

हीनः पाणि शिरः पादबन्धनो देशनाशभाक् ।
राजाध्ययनकृत् स्यासी धर्मस्मारी च पुण्यकृत् ॥१८॥

सद्वंशजो निधिः पापी कुलस्थोऽध्यापकोऽरिहा ।
ज्वरी स्थानच्युतो याता परसेवी कृतार्थकः ॥१९॥

आस्थानस्थोऽरिहा बोधो भार्योपेतो गजेस्थितः ।
सम्नग्नी युद्धभीरुश्च प्रवासी चान्नदोऽग्निदः ॥२०॥

चौरो भोक्ता चरन्मर्त्य भक्षी स्वधितिना हतः ।
स्वस्त्रीरतः कन्दुकभृद् दूरस्थो नृपदर्शनः ॥२१॥

शयानः शत्रुभिर्मित्रैः सेव्यो ध्यानी च तत्ववित् ।
मिष्ठभुक् पायसाशी च नृत्यगीतसुखासयः ॥२२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

यानें युद्धे विवाहे च वस्त्रालङ्कारभूषणे ।
क्रमेण घटिकाऽवस्था चिन्तयेन्नामजं फलम् ॥२३॥

चन्द्रस्थितं च नक्षत्रं नाडीः कृत्वाऽब्धिसंगुणम् ।
शररुपहृतं लब्धं चन्द्रावस्था वदेत् सुधीः ॥२४॥

चन्द्रस्य षट्त्रिंशदवस्थाफलम् ।

शिरोरोगं महाप्रीतिर्देवकार्यं सुखासनम् ।
नेत्ररोगी सुकर्मा च नारीक्रीडा महाज्वरी ॥२५॥

सुवर्णभूषासंयुक्तं[1] विषभुक्तिं च मैथुनम्
कुक्षिरोगं जलक्रीडा हास्यान्तं चित्रलेखनम् ॥२६॥

गान्धर्वगन्धसंयुक्तं कलहो गमनं तथा ।
क्षुधा च शास्त्रगोष्ठी च शीलं गोष्ठी च युद्धतः ॥२७॥

क्रोधं च नृत्यकार्यं[2] च जयमानन्द तिष्ठति ।
उन्मत्तः स्नानकर्मा च क्षुधा भुक्तिश्च निद्रता ॥२८॥

सुकर्मा पापकर्मा च क्रूरकर्मा हनिष्यति ।
इत्येता श्चन्द्रलीलाः स्युः षट्त्रिंशत् स्यात् फलोदयः ॥२९॥

चन्द्रः पुष्पसमश्चिन्त्याद् ग्रहान् विद्यात् फलैः समान्[3] ।
पुष्प नष्टे फलं नास्ति तस्माच्चन्द्रबलं बलम् ॥३०॥

---

१ सुवर्णभूषणयुक्तम् प्र. । २ वृत्तकार्यं प्र.। ३ विद्याद् ग्रहान् महफलान् ग्र.।

CC-0. Nepal Sanskrit Academy, Kathmandu

एकतस्तु ग्रहाः सर्वे एकतः शशलाञ्छनः ।
ततोऽधिकतर श्चन्द्रस्तस्माच्चन्द्रबलं बलम् ॥३१॥

विकलविगतरश्मि श्चन्द्रमाः कृष्णपक्षे
बलमधिकमिहार्यैस्तारकाया नितान्तम् ।
परविषयगते वा दुर्बले वाऽपि कान्ते
प्रकृतसकलकार्याण्यङ्गना संविदध्यात् ॥३२॥

आधारमिन्दोर्बलमुक्तमार्यैराधेयमन्यग्रहजं च वीर्यम् ।
आधारशक्तौ परिनिष्ठितायामाधेयवस्तूनि हि वीर्यवन्ति ॥३३॥

बलाबलं चान्द्रसमं प्रसाध्य दद्युर्ग्रहेन्द्रा हि बलाबलानि ।
मनः प्रचारेण यथेन्द्रियाणि वदन्ति वस्तूनि हि केवलानि ॥३४॥

वसिष्ठः—

अमृतकरस्त्वमृतभवस्तद्बलमखिलं च तद्वदेवः स्यात् ।
अमृतमयं तत्तस्मादभ्यधिकं त्वत्रखेटबलात्[1] ॥३५॥

आनन्दकरो जगतां यद्वत्तद्वच्च तद्बलं त्वखिलम् ।
तन्महिमान व्याचष्टे गुणरुपं निखिलजन्तूनाम् ॥३६॥

अखिलमृगाणां हरिरिव खचरबलानां च चन्द्रबलम्
हिमकिरणे बलिनि सति सर्वे बलिनो वियच्चरा नित्यम् ॥३७॥

अभ्यधिकं चान्द्रबलं त्वबलं ताराग्रहोद्भवं निखिलम् ।
हिमकिरणबलार्धादपिनो तुल्यं ग्रहबलं सर्वम् ॥३८॥

---

१ त्वन्यखेटवलात् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

तिथिवारर्क्षयोगेभ्यः करणाश्च सहस्त्रधा ।
बलाधिकं चन्द्रबलं तन्मुख्यं बलनिर्णये ॥३६॥

प्रशस्तपक्षे शुभदे शशाङ्के नीचारिराश्यंशकवर्जिते च ।
सुभग्रहैर्वीर्ययुतैः सुदृष्टे चन्द्रे भवेशेषतमः ससौम्यः ॥४७॥

यथा प्रधानं प्रणवः श्रुतीनां यथा प्रधानं प्रसवः फलानाम् ।
तथैव शीतांशुबलं प्रधानं नूनं बलानामपि खेटकानाम् ॥४१॥

इतिश्रीसारङ्गसाधुवचनामृतेनभट्टश्रीलक्ष्मणाचार्यविरचितेजगन्मोहने चन्द्रबलाऽध्यायः ॥ ॥

अथ त्रयस्त्रिंशोऽध्यायः

ताराबलाऽध्यायः

जन्माद्वृग्रा संपदितिर्विपत्तिः क्षेमा च पापा च शुभा च कष्टा ।
मैत्रातिमैत्रेति नवेति तारा स्युर्जन्मभात्त्रिः परिवर्तनेन ॥१॥

जन्मभसनुजर्क्षं त्रिजन्मभं नेयमखिलकार्येषु ।
संपत्तारा संपद् विपदाख्या विपत्प्रदा तारा ॥२॥

क्षेमाख्या क्षेमकरा प्रतिकूला प्रत्यरी तारा ।
साधनभं साधनदं नैधनदं निधनभं नृणाम् ॥३॥

मैत्रीकरणं मित्रभमतिमैत्रं परममित्रर्क्षे ।
एवं विचार्य सततं बलाबलं दैववित् कथयेत् ॥४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

३३ ताराबलाऽध्याय :

सितपक्षे हिमकिरणो बलवान् कृष्णेऽपि बलवती तारा ।
शशिबलमप्राधान्यं कृष्णे शुक्ले च तारकायाश्च ॥५॥

श्री पतिः—

नखलु बहुलपक्षे शीतरश्मिप्रभावः
कथितमिह तु तारा वीर्यमार्यैः प्रधानम् ।

अतिविकलशरीरे प्रेयसि प्रोषिते च
प्रभवति खलुकर्तुं सर्वकार्याणि योषा ॥६॥

पर्याये प्रथमे वर्ज्या विपत्प्रत्यरिनैधनाः
द्वितीये चांशका वर्ज्या स्तृतीयेस्त्वखिलाः शुभाः ॥७॥

विपदि प्रत्यरौ चैव वधे चैव यथाक्रमात् ।
प्रथमांशतृतीयांशा वर्ज्या शेषाः शुभप्रदाः ॥८॥

सर्वमङ्गलकार्येषु त्रिषु जन्मसु कारयेत् ।
क्षौरं विवाहं भैषज्यं यात्रां श्राद्धं च वर्जयेत् ॥९॥

इति पराशरनारदवचनात्

पट्टबन्धनचौलाशप्राशने चोपनायने ।
शुभदं जन्मनक्षत्रमशुभं त्वन्यकर्मणि ॥१०॥

लल्लः—

'हित्वैकं जन्मर्क्षं द्वे तारे जन्मसंज्ञके शुभदे ।
उद्वाह उपनयने यात्रायामन्नभोजने क्षुरकार्ये ॥११॥

CC-0. Nepal Sanskrit Academy, Kathmandu

गर्गः–

स्नानं दानं जपं पूजां होमकर्म च भूषणम् ।
माङ्गल्यं चैव वस्त्राणि त्रिषु जन्मसु कारयेत् ॥१२॥

च्यवनः–

श्राद्धं विवाहं भैषज्यं क्षुरकर्म च मैथुनम् ।
क्रयविक्रययात्रादि त्रिषु जन्मसु वर्जयेत् ॥१३॥

थमं जन्मनक्षत्रं दशमं कर्मसंज्ञितम् ।
एकोनविंशनक्षत्रं गर्भाधानमिति स्मृतम् ॥१४॥

विवाहं कारयेन्नित्यं युवत्या त्रिषु जन्मसु ।
जन्मांशादिषु सर्वेषु जन्मोढा पतिवल्लभा ॥१५॥

सप्तपञ्चत्रिचन्द्राष्टसप्तविंशतिभेषु तु ।
वैनाशिका त्रिजन्मर्क्षे नकर्तव्याः शुभादयः ॥१६॥

संपद्विपद्विपत्संपत्पर्ययेति तृतीयके ।
वैनाशिकात्परं मैत्रं सप्तविंशतिभं विना [1] ॥१७॥

द्वाविंशज्जन्मनक्षत्राद्वैनाशिकमितिस्मृतम् ।
द्वाविंशाद्वा त्रयोविंशादष्टाशीत्यंशिको भवेत् ॥१८॥

शेषांशाः शुभदाः [सर्वे जन्मनीन्दुगतांशतः ।
व्यापदं कुरुते यस्माद्विपत्कृदिति संज्ञितम्] ॥१९॥

---

[1] विभा प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

कार्याणां प्रतिषेधत्वात्प्रत्यरित्विति चोच्यते ।
निधनं हि भवेद्यस्मात् सप्तमी वधसंज्ञिता

तस्मादेतानि यत्नेन वर्जयेन्नैव योजयेत् ॥२०॥

बलप्रयुक्तो बलकर्मसक्तो हिमद्युतिः सद्ग्रहवीक्षितश्चेत् ।
विपत्करप्रत्यरिनैधनर्क्षे त्रिजन्मनक्षत्रजदोषनाशम् ॥२१॥

जन्मत्रिपञ्चसप्ताख्या ताराऽनिष्टफलप्रदा ।
अनिष्टपरिहाराय दद्यादेतद् द्विजायते ॥२२॥

शाकं गुडं च लवणं सतिलं[1] काञ्चनं क्रमात् ।
कृष्णे बलवती तारा शुक्लपक्षे बली शशी ॥२३॥

लल्ल :—

नतु चन्द्रबलाऽभावे केवलताराबलेऽपि कार्याणाम् ।
भवति प्रसिद्धिरग्रातदेव सर्वत्र योग्यं स्यात् ॥२४॥

श्रीपति :—

न कृष्णपक्षे शशिनः प्रभावस्ताराबलं तत्र शुभं प्रदिष्टम् ।
देशान्तरस्थे विकले च पत्यौ सर्वाणि कार्याणि करोति नारी ॥२५॥

गुरु :—

आद्यांशो[2] विपदि त्याज्यः प्रत्यरौ[3] च समोऽशुभ ।
वधे त्याज्यस्तृतीयांशाः शेषांशेष्वपि शोभनाः ॥२६॥

---

१. सलिलम् प्र. । २. अंशांशो प्र. । ३. प्रत्यरे प्र. अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

गृहारम्भं प्रवेशं च भूषणं कृषिकर्म च ।
विद्यारम्भं प्रकुर्वीत नव वस्त्राणि जन्मसु ॥२७॥

वास्त्वारम्भं प्रवेशं च यज्ञं पुंसवनक्रियाम् ।
यजमानानुकूलर्क्षे कुर्याज्जिन्मत्रयेषु च ॥२८॥

अत्रि :—

गृहप्रवेशं चौलं च अन्नप्राशनमौञ्जिकम् ।
पट्टबन्धाभिषेकं च जन्मर्क्षे च शुभावहम् ॥२९॥

वसिष्ठ :—

वस्त्राभिषेकवनभूषणपट्टबन्धहस्त्यश्वरोहकृषिबीजनीवापनं च ।
स्वर्णादिभूमिधनसञ्चयलाङ्गलं च भुक्तिद्वयं जननभेषु गृहं च
कुर्यात् ॥३०॥

कश्यप :—

प्रथमे सकलास्त्याज्या द्वितीये तु तदंशकाः ।
तृतीये सकला ग्राह्या विपत्प्रत्यरिनैधनाः[1] ॥३१॥

प्रथमांशतृतीयांशे विपत्प्रत्यरिनैधने ।
वर्जनीया विशेषेण नाशुभोपनये विपत् ॥३२॥

मरीचि :—

जन्मकर्मर्क्षपत्योस्तु मैत्रे तौ नातिदोषदौ ।
जन्मेऽष्टमे तयोर्मैत्रेऽप्यष्टमस्थे शशी तदा ॥३३॥

१. प्रत्यरनैधनाः प्र. अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

जन्मसूद्वाहसीमन्तयानक्षौरौषधांस्त्यजेत् ।
श्राद्धे जन्मनि कन्याया दानं भुक्तिं च वर्जयेत् ॥३४॥

व्यास :—

शास्त्रक्रियोपनयनाग्निविवाहयात्रा सीमन्तपुंसवनभेषजपैतृकाणि ।
क्षौरं निषेक वरवाज्यधिरोहणानि जन्मत्रयेऽपि विसृजेदथ
तैलकम् ॥३५॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्य विरचिते जगन्मोहने ताराबलाऽध्यायः ॥

अथ चतुस्त्रिंशोऽध्यायः

गोचराऽध्यायः

लल्ल :—

षट्त्रिदशस्थो भानुः षड्दशजन्मत्रिसप्तमश्चन्द्रः ।
द्वाष्टचतुः षट्ज्ञो गुरुरद्रिद्विनवपञ्चमे शुभदः ॥१॥

कविः सप्तरवषड्वर्ज्यः कुजशनिराहुकेतवः षट्त्रिस्थाः ।
एकादशगाः सर्वे खचराः समतारा परममित्रतारा शुभफलदाः ॥२॥

द्विदिनं चन्द्रमास्तिष्ठेत् दश पञ्च च नाडिकाः ।
बुधशुक्ररविर्मासं मासं मासार्धतः कुजः ॥३॥

गुरोर्द्वादशमासाश्च त्रिंशन्मासाः शनैश्चरः[1] ।
राहोर्विंशतिमासाश्च राशीनां चार एव च ॥४॥

---

१ शनेरपि ।

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहने

वङ्गेषु सूर्यो यमनेषु चन्द्रो भौमोऽप्यवन्तीमघधेषु सौम्यः ।
सिन्धौ गुरुर्भोज्रकटे तु शुक्रः सौरः सुराष्ट्रे विषयेषु भूयः ।।५।।

म्लेच्छेषु केतुश्च तमः कलिङ्गे जातो यतो नः परिपीडितास्ते ।
स्वजन्मदेशान् परिपीडयन्ति ये तेऽपि योज्या क्षितिपेन देशाः ।।६।।

विधिरत्ने–

स्थानं जन्मनि नाशयेद् दिनकरः कुर्य्याद् द्वितीये भयम् ।
दुश्चिक्ये श्रियमातनोति हिबुके मानक्षयं यच्छति ।
दैन्य पञ्चमगः करोति रिपुहा षष्टेऽ र्थहा सप्तमे ।
पीडामष्टमगः करोति पुरुषं कान्तिक्षयं धर्मगः ।।७।।

कर्मसिद्धिजनकस्तु कर्मगे वित्तलाभकर आयसंस्थितः ।।
द्रव्यनाशजनितां महापदं यच्छति व्ययगतो दिवाकरः ।।८।।

चन्द्रस्य–

जन्मन्यन्नं दिशति हिमगुर्वित्तनाशं द्वितीये
दद्याद्द्रव्यं सहजभवने कुक्षिरोगं चतुर्थे ।
कार्यभ्रंशं तनयगृहगो वित्तलाभं च षष्ठे
द्यूने द्रव्यं युवतिसहितं मृत्युसंस्थोऽपिमृत्युम् ।।९।।

नृपभयं कुरुते नवमः शशी दशमधामगतस्तु महत्सुखम् ।
विविधमायगतः कुरुते धनं व्ययगतस्तु रुजं धनसंक्षयम् ।।१०।।

कुजस्य–

प्रथमगृहगः क्षौणीसूनुः करोत्यरिजं भयं
क्षपयति धनं वित्तस्थाने तृतीयगतोऽर्थदः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अरिभयं गतः पातालेऽर्थं क्षिणोति च पञ्चमे
रिपुगृहगतः कुर्याद् वित्तमृजुं स्मरस्थिरः[1] ॥११॥

जनयति निधनस्थः शत्रुबाधां धराजो
दिशति नवमसंस्थः कायपीडामतीव ।
शुभमपिदशमस्थो लाभगो भूरिलाभं
व्ययभवनगतोऽसौ व्याध्यनर्थार्थनाशान् ॥१२॥

अथ बुधस्य

बुधः प्रथमधामगो भयं दिशति बन्धमर्थं
धनेधनं रिपुभयान्वितं सहजग श्चतुर्थेऽर्थदः ।
अनिवृत्तकरो भवेत्तनयगो रिपुगतः स्थानदः
करोति मदनस्थितो बहुविधां शरीरापदम् ॥१३॥

अष्टमे शशिसुतो धनवृद्धिं धर्मगस्तु महतीं तनुपीडाम् ।
कर्मगः सुखमुपान्त्यगतोऽर्थं द्वादशे दिशति वित्तविनाशम्[2] ॥१४॥

अथ गुरोः

भयं जन्मन्यार्यो जनयति धनस्थोऽर्थमतुलं
तृतीयस्थः श्क्लेशं दिशति च चतुर्थेऽर्थनिलयम् ।
सुखं पुत्रस्थान ऋजुमपि च कुर्यादरिगृहे
द्युने भूभृत्पूजां धननिचयनाशं च निधने ॥१५॥

धर्मगतो धनबृद्धिकरः स्यात् प्रीतिहरो दशमेऽमरपूज्यः ।
स्थानधनानि ददाति स आये द्वादशगस्तनुमानसपीडाम् ॥१६॥

---

१ मृजुमनः स्थितः प्र. । २ वित्तनाशकः प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ शुक्रस्य

जन्मन्यरिक्षयकरो भृगुजोऽर्थदोऽर्थे दुश्चिक्यगः सुखकरो धनदश्चतुर्थे
स्यात्पुत्रदस्तनयगोऽरिगतो विबृद्धि शोकप्रदो मदनगो निधनेऽर्थदाता।१७।।

जनयति विविधाम्बराणि धर्मे न शुभकरो दशमस्थितशुक्रः ।
धननिचयकरः स लाभसंस्थो व्ययभनेऽपि धनागमं करोति ।।१८।।

अथ शनेः

चित्तभ्रंशं विधत्ते दिनकरतनयो जन्मराशिं प्रपन्न
श्चित्तक्लेशं द्वितीये धनहरणकृतं वित्तलाभं तृतीये ।
पाताले शत्रुवृद्धि सुतभवनगतः पुत्रभृत्यार्थनाशं
षष्ठस्थानेऽर्थलाभं जनयतिमदने दोषसङ्घातमार्किः ।।१९।।

शरीरपीडांनिधने च धर्मे धनक्षयं कर्मणि दौर्मनस्यम् ।
उपान्त्यगो वित्तमनर्थमन्त्ये शनिर्ददातीत्यवदत्सुवृत्तः ।।२०।।

अथ राहोः

राहुर्जन्मगतो भयं च कलहं सौभाग्यमानक्षयं
वित्तभ्रंशमहत्सुखे नृपभयं चार्थक्षयं यच्छति ।
सन्तापं कलहं च वित्तमधिकं शीघ्रं विनाशन्नृणां
केतुस्तत्फलमेव राशिषुवदेच् शंसन्ति गगार्दयः

कमलासनः–

ऋक्षसन्धिगताः खेटा राशिसन्धिगता ग्रहाः ।
एष्यराशेः फलं दद्युर्वक्रे च विपरीतगम् ।।२२।।

CC-0. Nepal Sanskrit Academy, Kathmandu

सर्वेग्रहा विकृतिजं दद्युः स्वदृष्टिजं फलम् ।
अतिचारे च वक्रे च पूर्वराशिफलं वदेत् ॥२३॥

गुरुः—

पक्षं दशाहानि तथैव सार्धमासं दशाहं खलु षट् च मासान् ।
भौमादिखेटास्त्वतिचार वक्रे दद्युः फलं पूर्वगृहे यदुक्तम् ॥२४॥

वसिष्ठः—

भवनान्त्यगताश्च यदा धिष्ण्यान्त्यगताश्च गगनचराः ।
दद्युः परभवनफलं प्रारम्भवनफलं च कृताङ्के च ॥२५॥

दशदिवसं पञ्चदिनं त्रिपक्षमतिचारवक्रयोर्दद्युः ।
भौमाद्याः पञ्चदिनं प्राग्राशिफलं च पञ्च मासाश्च ॥२६॥

आदित्यादिग्रहाः सर्वे लग्ने वा गोचरेऽपि वा ।
सप्तविंशतिभागोर्द्ध्वं परराशिफलं भवेत् ॥२७॥

नीचगता रिपुविजिताः रव्यभिभूताः स्वशत्रुगेहस्थाः ।
भुजगा इव मन्त्रहता भवन्त्यकार्यक्षमाः खचराः ॥२८॥

नददाति गोचरबलं शुभराशिस्थोऽपि यो ग्रहैर्विद्धः ।
तद्ग्रहवेधविधानं यवनोक्तं संप्रवक्ष्यादि ॥२९॥

शुभस्थितो वाऽप्यशुभप्रदः स्याद् ग्रहेण विद्धोऽपि च खेचरेन्द्रः ।
यो गोचरेणाप्यशुभः शुभः स्यात् स वामवेधः
क्रमशो नितान्तम् ॥३०॥

CC-0. Nepal Sanskrit Academy, Kathmandu

श्री पतिः—

लाभविक्रमरवशत्रुसुस्थितः शोभनो निगदितो दिवाकरः ।
खेचरैः सुततपो जलान्त्यगैर्व्योकिभिर्यदि न विध्यते तदा ॥३१॥

अथ चन्द्रस्य

द्यून जन्मरिपुलाभरवत्रिगश्चन्द्रमाः शुभफलप्रदस्तदा ।
स्वात्मजान्त्यमृतिबन्धु धर्मगैर्विध्यते न विबुधैर्यदि ग्रहैः ॥३२॥

अथ भौम शनैश्चरयोः

विक्रमायरिपुगः शुभः कुजः स्यात्तदान्त्यसुतधर्मगैर्यदि ।
चेन्नविद्ध इनसूनुरप्यसौ किंतु धर्मधृणिना न विध्यते ॥३३॥

अथ बुधस्य

स्वाम्बुशत्रुमृतिरवायगः शुभो ज्ञो तदा न खलु विध्यते तदा ।
आत्मजत्रितयमाद्यनैधनप्रान्त्यगैर्वविधुभिर्नभश्चरैः ॥३४॥

अथ गुरोः

स्वायधर्मतनयद्युनसंस्थितो नाकनायकपुरोहितः शुभः ।
रिष्फरन्ध्ररवजलत्रिगैर्यदा विध्यते गगनचारिभिर्नहि ॥३५॥

अध शुक्रस्य

आसुताष्टमतपोव्ययायगो विद्ध आस्फुजिदशोभनः स्मृतः ।
नैधनास्ततनुकर्मधर्मधीलाभवैरिसहजस्थखेचरैः ॥३६॥

CC-0. Nepal Sanskrit Academy, Kathmandu

एवमत्र खचरा व्यधा[1]न्वितास्तत्फलं नहि दिशन्ति गोचरे ।
वामवेधविधिना त्वशोभना अप्यमी शुभफलं दिशन्त्यलम् ॥३७॥

ये वदन्ति खचरव्यध[2]क्रमं नो ग्रहक्रमविधो हि गोचरे ।
ते मृषा वचनभाषिणो जना यान्ति हास्यमपकीर्तिलाञ्छिता ॥३८॥

मनुः—

वलवद्ग्रहवेधे च तद्ग्रहे बलमुत्तमम् ।
तद्ग्रहे बलहीने च निष्फलं ग्रहवेधकम् ॥३९॥

श्रीपतिः—

विध्यते गगनचारिभिर्ग्रहैर्जन्मभादिति वदन्ति चार्यकाः ।
ये वदन्ति खचरादिवेधिते[3] नो वदन्ति खचरव्यथाक्रमम् ॥४०॥

विदन्ति नो खेचरविद्धमार्गं प्रायेण ये खेचरगोचरज्ञाः ।
तेषां जनानां वचनाक्षराणि घुणाक्षराणीव भवन्ति नूनम् ॥४१॥

शुभवीक्षितकष्टफलस्त्वशुभेस्थितः सत्फलः खचरः ।
शत्रु– विलोकननिहताः[4] सर्वे ते निष्फलाः खचराः ॥४२॥

भवनादिगतौ फलदौ रविभौमौ मध्यगौ च गुरुशुक्रौ ।
अन्यगतो रवितनयः सदैव फलदौ शशाङ्कचन्द्रसुतौ ॥४३॥

बसिष्ठः—

आदित्यो नृपदर्शने धरणिजो युद्धे बुधेः शास्त्रके
देवेज्यश्च बली विवाहसमये शुक्र प्रयाणेबली ।

---

१ व्यथा प्र । २ व्यथा प्रः । ३ विद्धे भाव्यम् ।
४ शत्रु विलोकनविहताः प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

मन्दाख्यो सखदीक्षणेषु बलवानिन्दुस्ततः सर्वदा
सर्वेष्वेव शुभेषु चात्र बलवानेवं मुनीन्द्राः जगुः ॥४४॥

चन्द्राष्टमं च धरणीसुतसप्तमं च राहुस्तपश्च शनिजन्मगुरुस्तृतीये ।
अर्कद्विपञ्च भृगुषष्ठबुधश्चतुर्थे प्राणापमानहरणं भयशोकदुःखम् ॥
॥४५॥

खचरेषु यदा विषमे त्वखिलनृणां व्याधिरर्थहानिः स्यात् ।
सम्यग् विचार्य मनसा ग्रहशान्तिं कारयेद् धीमान् ॥४६॥

उच्छ्रयपतनानि नृणां खचराधीनं विशेषतो यस्मात् ।
अखिलानामपि लोकानां वृद्धिस्तस्माद् ग्रहाश्च पूज्यतमाः ॥४७॥

श्रीपतिः—

अकालचर्यां मृगयां च साहसं सुदूरयानं गजवाजिरोहणम् ।
गृहे परेषां गमनं च वर्जयेद ग्रहेषु राजा विषमस्थितेष्विह ॥४८॥

प्रारब्धसुस्थितैर्ग्रहैर्यत्कर्म तद्विवृद्धये नरैः ।
विनिहन्ति तमेव कर्मणा वैतालीयमिवायथा कृतम् ॥४९॥

वसिष्ठः—

ग्रहदौस्थेतु विवादं परगृहगमनं न दूरतो यानम् ।
साहसमकालचर्या मृगया च वाहनं त्याज्यम ॥५०॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्य विरचिते
जगन्मोहने गोचरबलाऽध्यायः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ पञ्चत्रिंशोऽध्यायः

अथ लग्नबलाऽध्यायः

श्रीपतिः—

मेषस्य

अभिषेकं नृपतीनां साहसकर्मादि विरोधम् ।
आकरधातुर्वादमखिलं मेषोदये कार्यम् ॥१॥

वृषस्य

स्थिरचरकार्यं त्वखिलं विवाहवास्त्वादिकं यकावरणम् ।
क्षेत्रारम्भणमखिलं भूषणशील्पाकरादिकंवृषभे ॥२॥

मिथुनस्य

मेषवृषोक्तं यत् कर्म च गजतुरगोष्ट्रादिकं च कर्माख्यम् ।
आविकमामिषमेष क्षितिपतिसेवाहवं मिथुने ॥३॥

कर्कटस्य

शान्तिकपौष्टिकमङ्गल गजबन्धनमोक्षमखिल जलकर्म ।
दीर्घिककूपतडागशिल्पोद्वाहादिकर्कटे कार्यम् ॥४॥

सिंहस्य

परयोगो नृपसेवा कृषिकर्म वणिङ्महाहवाद्यखिलम् ।
स्थिरकर्माखिलवास्तुनिवेशशिल्पादि सिंहभे कार्यम् ॥५॥

कन्यायाः

भूषणमङ्गलकार्यमौषधं[1] विज्ञानमन्य शिल्पादि ।
उद्वाह शान्तिपौष्टिकगजतुरगोष्ट्रादि कन्यायाम् ॥६॥

१। कार्यं वौषध प्र.।

CC-0. Nepal Sanskrit Academy, Kathmandu

तुल्यायाः

कन्योक्ताखिलकार्यं तुलादिमानानि भाण्डकर्माणि ।
यात्रावास्तुविधानं तौलिनिकृषिकर्मवाणिज्यम् ॥७॥

वश्चिकस्य

साहसदारुणचित्रकलेखकवास्तूगूशस्त्रकर्माद्यम् ।
आहवकृषिवाणिज्यक्षितिपतिवादादि वृश्चिके कार्यम् ॥८॥

धनुषः

शान्तिकपौष्टिकशिल्पिकसंधानाश्वादि नृत्यगीताद्यम् ।
राजोपकरणमखिलं भूषणवास्त्वादि चापभे सेवा ॥९॥

मकरस्य

शंवरमोचनबन्धनभूषणरत्नानि शिल्पधान्यानि ।
क्रयविक्रयमखिलं यद् रिपुहननोद्योगमाहवं मकरे ॥१०॥

कुम्भस्य

युद्धोपकरणभूषाजलधान्यशिल्पगोगवाद्यं यत् ।
पण्यासवपुरनगरप्रवेशनं कर्म घटलग्ने ॥११॥

मीनस्य

यज्जलबन्धनमोचन जलयात्रा रत्नभूषणं कर्म ।
रथतुरगादिपशुनां कार्यं मीनोदये शैल्यम् ॥१२॥

पापयुतेक्षितरहिता मेषाद्याश्चोक्तफलदाः स्युः ।
नोचेदुक्तफलौघं दातुं शक्ता भवन्ति न कदाचित् ॥१३॥

सम्पूर्णफलदमादौ विलग्नमथ मध्यमे मध्यफलम् ।
अन्त्ये तु तुच्छफलदं सर्वत्रैवं विचिन्तयेद् धीमान् ॥१४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

घटमिथुनकुलीराधन्विगोमीनकन्या
इह शुभभवनत्वाद् राशयः सप्त सौम्याः ।
अलिघटमृगसिंहाजाश्च पापाऽस्पदत्वान्-[1]
मुनिभिरभिहितास्ते राशयः क्रूरभावाः ॥१५॥

अथ षड्वर्गः

गृहं गृहार्धं च तथा त्रिभागो नवांशकश्च द्विरसांशकश्च ।
त्रिंशांशकश्चेति जगाद वर्गो वर्गो बलं तस्य यथोत्तरः स्यात्[2]।१६।
त्रिंशद्भागं लग्नं तदर्धतुलिता च होराख्या ।
लग्ने तृतीयभागो द्रेक्काणः स्यान्नवांशको नवमः ॥१७॥

द्वादशभागो द्वादशस्त्रिंशत्तमस्त्रिंशदंशः स्यात् ।
षड्वर्गो भवति सदा शुभखचरसमुद्भवः शुभदः ॥१८॥

पापसमुत्स्थस्त्वशुभस्तस्माद् ग्राह्यस्तु सौम्यषड्वर्गः ।
शुभकर्मणि सततं तत् त्याज्यः पापाह्वयो वर्गः ॥१९॥

स्वतनयनवसभेशाद् द्रेक्काणांशः क्रमाच्च होराणाम् ।
रविचन्द्राविन्दुरवी[3] विषमसमेष्वर्धराशीनाम् ॥२०॥

अथ नवांशः

मेषसिंहनवमेऽजादयस्तौलिकुम्भमिथुने तुलादयः ।
कन्यकामृगवृषे मृगादयो मीनकर्क्यलिषु कर्कटादयः ॥ २१ ॥
अंशका नवनवव्यवस्थिता द्वादशं प्रतिगृहं गृहादयः ।

---

१ पापाश्रयत्वात् प्र. । २ यथोत्तराणाम् प्र. । ३ रविचन्द्रौ विधुरवीत्र

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ त्रिंशांशाः

शरपञ्चाष्टमुनिशरभागैस्त्रिशांशकस्तु विषमेषु ।
युग्मेषूत्क्रमगण्या कुजार्किजीवज्ञशुक्राणाम् ॥ २२ ॥

राशिस्वामिनः

मेषवृश्चिकपतिर्महीसुतो भार्गवो वृषतुलाधरेश्वरः ।
बोधनस्तु मिथुनाङ्गनापतिर्भास्करिर्मकरकुम्भनायकः ॥ २३ ॥

सिंहकर्कटकयोरिनेन्दुपौ मीनधन्विपतिरिन्द्रपूजितः ।

अथ लग्नादि पर्यायनामानि

कल्पो देहो विलग्नं च लग्नं होरादयः स्मृतम् ।
द्वितीयं द्रविणं चेति कुटुम्बमिति चोच्यते ॥ २३ ॥

सहोत्थश्चेति दुश्चिक्यं तृतीयं विक्रमं स्मृतः ।
हिबुकं वेश्म बन्धुश्च सुखमम्बु चतुर्थकम् ॥ २५ ॥

त्रिकोणं च सुतो बुद्धिः पञ्चमः परिकीर्तितः ।
अरिश्चेति तदा षष्ठः क्षत इत्यभिधीयते ॥ २६ ॥

जामित्रं जूकमस्तं च कामभार्येति सप्तमः ।
रन्ध्रं निधनकं चायुस्तथाष्टममिति स्मृतम् ॥ २७ ॥

त्रित्रिकोणः शुभो धर्मो नवमं च गुरुस्तपः ।
आज्ञा च मानं दशमं च कर्म मेषूरणं चास्पदमम्बरं च ।
एकादशं चायभवं च लाभो रिःफं व्ययं द्वादशराशिमाहुः ॥२८॥

CC-0. Nepal Sanskrit Academy, Kathmandu

लग्नभावादि शुद्धिः

शुद्धेलग्ने निषेकः स्याद् द्वितीये धनसंग्रहः ।
तृतीये मित्रसंबन्ध श्चतुर्थ शत्रुदर्शनम् ॥२९॥

प्रयाणं पञ्चमे चैव षष्ठे छेदनभेदजम् ।
सप्तमे तु विवाहः स्यान्नामादिस्थापनाष्टके ॥३०॥

नवमे लवनं शस्तं दशमे चान्नभोजनम् ।
युद्धं चैकादशे श्राद्धं द्वादशे वास्तुनाम च ॥३१॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्य विरचिते जगन्मोहने लग्नबलाऽध्यायः ।

अथ षड्त्रिंशोऽध्यायः

अन्धादिलग्नफलम्

मेषादिरन्धकं षड्कं चत्वारो वधिरास्तथा ।
द्वौ पङ्गू चेति विज्ञेया चित्येतद्राशिलक्षणम् ॥१॥

क्रियानड्डुर्हासिहास्तु[1] रात्रौ ते चान्धकास्तथा ।
नृयुक्कर्कटकन्यास्ते मध्याह्ने चान्धकास्तथा ॥२॥

तुला च वृश्चिक श्चैवपूर्वाह्ने वधिरस्तथा ।
धनुश्च मकरश्चैव वधिरौ चापराह्णके ॥३॥

१ 'क्रियानडुत्सिहास्तु' भाव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

कुम्भमीनद्वयेपङ्गू पूर्वपश्चिम-सन्ध्ययोः ।
अन्धे बन्ध्यत्वमाप्नोति वैधव्यं वधिरे तथा ॥४॥
अर्थनाशो भवेत् पङ्गाविति गर्गेण निश्चितम् ।

इति वादरायणः

कालः	अन्धलग्नानि	वधिरलग्नानि	पङ्गुलग्नानि
	राशयः	राशयः	राशयः
रात्रिः	मेष वृष सिंह		
मध्याह्नम्	मिथुन कर्कट कन्या		
पूर्वाह्णम्		तुला वृश्चिक	
अपराह्णम्		धनु मकर	
प्रातःसन्ध्या			कुम्भ
सायंसन्ध्या			मीन

दिनमुहूर्त्त०	रुद्रः	अहिः	मित्रः	पितरः	वसुः	वारिः	विश्वे	वेधा	विधिः	इद्रा	इद्राग्नि	राक्षस	वरुण	अर्यमा	भगः
रात्रिमुहुर्त्त०	गिरिश	अजचरण	अहिर्बुध्न	पूषा	अश्विन	यमः	अग्नि	ब्रह्मा	चन्द्र	अदिति	जीव	विष्णु	सूर्य	त्वष्टा	समीरण

CC-0. Nepal Sanskrit Academy, Kathmandu

पापमध्यस्थितो राशिः स एष ग्रहकर्तरी ।
स एव सर्व कार्येषु निर्दोषः शुभसंयुतः ॥५॥

लग्नस्यपूर्वापरयोरसांध्वो सा कर्तरी स्यादृजुवक्रगत्योः ।
तावव शीघ्रौ यदि वक्रचारौ न कर्तरी चेति पितामहोक्ति ॥६॥
इतिश्रीसारङ्गसाधुवचनामृतेन भदृश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने लग्नप्रकरणे अन्धकपङ्गुवधिरादिलग्नसंज्ञानामाध्यायः

मुहूर्त्तफलाऽध्यायः

श्रीपतिः—

रुद्राहिमित्रपितरोवसुवारीविश्वेवेधाविधिः शतमरवः पुरुहूतवह्नी ।
नक्तञ्चराश्च वरुणार्यमयोनयश्च प्रोक्ताश्चते दश च पञ्चदिवा
मुहूर्ताः ॥१॥

निशामुहूर्ता गिरिशाजपादाऽहिर्बुध्न्यपूषाऽश्वियमाग्नयश्च ।
विधातृ चन्द्रादितिजीवविष्णुस्तिग्मद्युतित्वष्टृसमीरणाश्च ॥२॥

दिनस्य यः पञ्चदशो विभागो रात्रेस्तथा तद्धिमुहूर्तमानम् ।
नक्षत्रनाथ' प्रतिमे मुहूर्ते मौहूर्तिकास्तत्समकर्म चाहुः ॥३॥

अर्यम्णोऽर्के तुहिनकिरणे राक्षसब्राह्मसंज्ञौ,
पित्र्यग्नेयौ क्षितिसुतदिने, चन्द्रपुत्रेऽभिजिच्च ॥
पित्र्यब्राह्मौ भृगुसुतदिने, राक्षसाऽप्यौ च जीवे,
भौजङ्गेशौ सवितृतनये वर्जनीया मुहूर्ताः ॥४॥

नक्षत्राद् बलवान्, चाह्नर्मुहूर्तः सर्वकर्मसु ।
वासरार्द्धलिनी नूनं कालहोरेति तद्विदुः ॥५॥

दिक्शूलाख्यं चिन्तनीयं समस्तं तद्वद्दण्डः पारिघस्य क्षणेषु ॥६॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ मुहूर्तदेवता:

वैराजनामा विजय सिताख्या[1] सवित्रमैत्रावभिजिद्वलश्च ।
सर्वार्थसिद्ध्यै कथिता मुहूर्ता मौहूर्तिकैरत्र पुराणविद्भिः ॥७॥

पञ्चदशांशो दिवसः क्षणमानं तावच्चत्रियामायाः ।
नक्षत्रेश्वरसदृशे क्षणे च तन्नामधिष्ण्यं स्यात् ॥८॥

नैरृतिपितृसार्प्याख्या रौद्रेन्द्राग्निनिशाचराख्यभगाः[2] ।
पापमुहूर्तास्त्वेते शुभकर्मणि दुःखदा नित्यम् ॥९॥

द्युमुहूर्तास्त्ववशिष्ठाः सौम्याः शुभदाश्च मङ्गले नूनम् ।
शान्तिकपौस्टिककर्मसु विशेषतस्तत्प्रदाः सततम् ॥१०॥

यस्मित् वारे यो मुहूर्तो निन्द्यस्तं विषवत् त्यजेत् ।
उद्वाहादिषु कार्येषु त्वपि सर्वगुणान्वितः ॥११॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्य विरचिते जगन्मोहने मुहूर्तफलाऽध्यायः

तिथिरेकगुणाः प्रोक्ता वारश्चाष्ट गुणोभवेत् ।
नक्षत्रं षोडशगुणं योगो द्वात्रिंशकस्तथा[3] ॥१॥

करणं चैव षष्टिश्च ताराशीतिगुणं भवेत् ।
चन्द्रः शतगुणं दद्यान्मुहूर्तः कोटिरुच्यते ॥२॥

नक्षत्रतोर्थ प्र. । [1] सिता स्यात् प्र. ।

[2] रौद्रेन्द्राख्यनिशाचराख्यभगाः प्र. । [3] द्वाविंशक- स्तथा प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

बुधे तृतीया कुजपञ्चमीच षष्टी गुरौ शुक्रदिनेऽष्टमी च ।
एकादशीन्दौ च शनिर्नवम्यां [1] द्वादश्यथार्केण च दग्ध [2] योगाः ॥३॥
षष्ठी शशाङ्के नवमी च शुक्रे बुधे द्वितीया तपने चतुर्थी ।
जीवेऽष्टमीसौरिदिने च सप्तमीयोगाविषा [3] ख्याःकुलनाशनाःस्युः॥४॥
षष्ठ्यादि तिथयः सप्त चन्द्रवारादिभिर्युताः ।
क्रमात्पक्षद्वये चैव सप्त योगा हुताशनाः ॥५॥
प्रोक्तःप्रोष्टपदाऽष्टमी मुनिजनैस्तत्कृत्तिकापञ्चमी
सार्पद्वादशिका त्रयोदशतिथिश्चार्यम्णनक्षत्रगाः ।
आप्यर्क्षप्रथमप्रजेशदशमीनक्षत्र लक्ष्मी सदा
संवर्ज्यः शुभकर्मणीह विहितं पक्षद्वयोरप्यसौ ॥६॥

२ दग्धयोगाः

वासरा	रविः	सोमः	भौमः	बुधः	गुरूः	भृगुः	शनिः
तिथम	द्वादशी	एकादशी	पञ्चमी	तृतीया	षष्ठी	अष्टमी	नवमी

विषयोग

वासराः	रविः	सोमः	भौमः	बुधः	गुरुः	भृगुः	शनिः
तिथयः	चतुर्थी	षष्ठी		द्वितीया	अष्टमी	नवमी	सप्तमी

[1] चन्द्रे भाव्यम्

CC-0. Nepal Sanskrit Academy, Kathmandu

अनुराधा द्वितीयायां तृतीयायां च त्र्युत्तराः ।
पञ्चमीच मघायुक्ता चित्रस्वात्योस्त्रयोदशी ॥७॥

एककार्यं कृतं नु षण्मासान्मरणं ध्रुवम् ।
सौम्याश्वयुग्याम्यमघाविशाखामैत्रं च चन्द्रेण युता स्तुदग्धाः ॥८॥

श्रवणं वासव ज्येष्ठ रौद्रं विश्वं च वारुणम् ।
अग्नेयं चाजपादं च भौमवारेण मृत्युदम् ॥९॥

याम्यं च पौष्णं निर्ऋतिं च वाजी विश्वं वसुः सौम्यदिनेन मृत्युः ।
रूद्राहि [1] सौम्या वसुभं प्रजेशं चैत्रं भगं जीवदिनेन मृत्युः ॥१०॥

ऐन्द्राग्न्याहिवसुप्रजेशपितृभं ज्येष्ठां च मैत्रं गुरुं
चैत्रं चासुरपूज्यवासरयुता योगा विनष्टाः स्मृताः ।
आषाढादितिसर्पं विश्वकरभं पौष्णं च विष्णोस्तु भं
फल्गुन्युत्तरभं शनैश्चरयुता योगा विषाख्याः पराः ॥११॥

आदित्यवारमारभ्य विशारवादि चतुष्टयम् ।
उत्पातमृत्युरन्ध्रं च मृतयोगं पुनःपुनः ॥१२॥

सौरैर्वारयुतं हरिः शतभिषक् शुक्रेणवेधानिलं ।
जीवेनैन्दवभं मघा रवियुतं पुष्पेण चेन्दोर्दिनम् ॥१३॥

आदित्यानलचन्द्रपुष्पमहिजे मैत्राग्नियाम्ये बुधे
हस्तार्द्रोत्तरफल्गुनीसुरगुरोर्मूलामृगोरेवती ।

---

[1] रूद्राग्नि प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

शुक्रे स्वाति च रोहिणी शनिधनिष्ठावारूणं वैष्णवम्
इत्युक्तं यमकण्टकं भवतितं तत्थ्यं [1] त्यजेद् बुद्धिमान् ॥१४॥

यात्रायां मरणं विवाहविधवाविद्यागमे मूर्खता ।
कृष्यल्पं वणिजां गृहं च दहनं नश्यन्ति तत्कण्टकम् ॥१५॥

पञ्चम्यार्काग्नियोगो हिमकरदिवसे चित्रया च द्वितीया
रोहिण्यारे च पूर्वा बुधयमसहिता सप्तमी मन्त्रियुक्ता ।
युक्ता चादौ तिथौ च श्रवणभृगुयुता षष्टिकार्कस्य सूना—
वष्टम्यां पौष्णमेते विषसम कथिताः सप्तयोगाः सुवर्ज्याः ॥१६॥

दिनकरकरमैत्रसोमवारेणवैश्वं शतभिषग धराजं चाश्विनीचन्द्रसूनौ ।
सुरगुरुदिनसौम्यं सार्पभंशुक्रवारे रविसुतमितिहस्तं मृत्युयोगं वदन्ति ॥१७॥

इतिकथितमुदारैः पूर्वसौम्योक्तयोगैस्त्विह कथितयुगेषु प्रत्यहं विष्टि-रिक्ता ।
तिथिकथितयुगेभ्यो योगसंज्ञायुतेभ्यो वरुणमपि युगेभ्यो शोभने कम [2] नीष्टाः ॥१८॥

पुत्रस्थं भानुसूनु परिहर सततं भार्गवं सप्तमस्थं
जीवं षण्मृत्युसंस्थं नवमदशमयो भौमसौम्यौ क्रमेण ।
चन्द्रं षण्मृत्युसंस्थंद शशतकिरणं द्वादशस्थं समस्तम् —
एते वै मृत्युयोगा मरणभयकराः कीर्तिताः सर्वकार्ये ॥१९॥

---

[1] चावश्यं प्र. । [2] चिन्त्यमिदम

CC-0. Nepal Sanskrit Academy, Kathmandu

वसुहस्तौ विशाखार्द्रेऽर्बुध्न्याही याम्यनैर्ऋते ।
द्वन्द्वेष्वेषु चतुर्थं च क्रमशो मृत्युदोऽह्नि चेत् ॥२०॥

सार्पबुध्नौ याम्यमूले श्रोणा[1]र्यम्नेऽनिलेन्दुभे ।
रोगसद्द्वन्द्वयोऽपीन्दौ[2]काले बलिनि नाशुभाः ॥२१॥

सार्पाश्वितारयोराद्यौ द्वितीयौ यममूलयोः ।
श्रोणोत्तरे तृतीयांशावन्त्यांशौ वायुसोमयोः ॥२२॥

दिनरोगा इमाख्याता एषु रोगी भवेन्नरः ।
रोगांशे तु दिवा कुर्याच्छुभरोगी न तं निशि ॥२३॥

याम्यनैर्ऋतयोराद्यः सार्पोपान्त्यतृतीयकः ।
आर्द्रेन्द्राग्न्योद्वितीयांशो हस्तवस्वोरथान्त्यगः ॥२४॥

दिनमृत्युरिमेवांशाः कर्मकर्तुर्विनाशकाः ।
अह्निदोषा इमे नित्यं रात्रौ चैते न दोषदाः ॥२५॥

अष्टमराशेरंशो दिनमृत्युं प्रोक्त आचार्यैः ।
दिनरोगाश्च मुनिभिः षष्ठस्यांशो विनिर्दिष्टः ॥२४॥

सूर्यादि सप्तमं कम्पं दशमं चोल्कमुच्यते ।
ब्रह्मदण्डं त्रिपञ्च स्यादेकविंशतिमोघकम् ॥२७॥

कम्पं कम्पयति स्थानादुल्कं दहति तत्कुलम् ।
ब्रह्मदण्डं विनाशाय मोघं मरणमादिशेत् ॥२८॥

---

१ श्रोत्रार्यम्णो पा. २ रोग सद्द्वन्द्वयो पक्षौ पा.

CC-0. Nepal Sanskrit Academy, Kathmandu

कम्पोल्कदण्डमोघानां स्वरसामऋतुर्नव ।
घटिका वर्जनीयाः स्युः शेषाः सर्वे सुशोभनाः ॥२९॥

त्रिगुण्यं सूर्यवारादि अश्विन्यादिषु तं त्यजेत् ।
शेषेषु सप्तसूर्याः षट् काणनेत्रद्वयान्धकः ॥५०॥

अन्धे चेन्नाशयेत् कर्म काणे चापि न शोभनः ।
नेत्रयुग्मे शुभं कुर्यात् काणे चापि बलैर्युते ॥३१॥

अर्क युक्तर्क्षतो मूलं यावन्मूलं च तावतु ।
नक्षत्रकण्टकस्थूणः सर्वकर्मवहिष्कृतः

अङ्गारकस्थितर्क्षान्तिर्यावन्नैर्ऋतिभं ततः ।
तावत् संख्या तु नक्षत्रं रक्तस्थूणसमाह्वयम् ॥३३।

रक्तस्थूणे तु नक्षत्रे यत्कृतं शोभनं भवेत् ।
तत्कर्ता सह सर्वस्वं विनाशमुपगच्छति ॥३४॥

स्वोच्चवर्गयुत भौमभास्करौ[1]स्थूणकण्टकजदोषनाशनम् ।
भक्तयुक्तजनपापनाशनं पार्वतीशपदपङ्कजं यथा ॥३५॥

चन्द्रार्कयोगताराया द्वितीयं नवपञ्चभम् ।
त्रयोदशं च षष्ठं च रुद्रधृत्याह्वयो भवेत् ॥३६॥

एकोनविंशनक्षत्रं सप्तनाम्नातिदोषदाः ।
विरोधः परिघो वज्रो दण्डः खड्गश्च शूलकः ॥३७॥

---

१ सौम्यभास्करौ प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

व्यतीपात इति ख्याताः सर्वे चाशीविषोपमाः ।
अपवादैर्न विद्यन्ते बलिभिर्वा गुणैरपि ॥३८॥

सूर्याधिष्ठितभाद् भुजङ्गपितृभात् त्वाष्ट्रेषु मैत्रे श्रुतौ
पौष्णे च क्रमशोऽश्विभाद् गणनया शीतांशुना संयुते ।
धिष्ण्ये तावतिथे पतत्यवितथं चण्डीश चण्डायुधं
तस्मिन्नात्महितेच्छुभिर्निगदितं कार्यं नकार्यं बुधैः ॥३९॥

ऋक्षं द्वादशमुष्णरश्मिरवनीसूनुस्तृतीयं गुरुं
षष्ठं चाष्टममर्कजश्च पुरतो हन्ति स्फुटं लत्तया ।
पश्चात् सप्तममिन्दुजश्च नवमं राहुः सितः पञ्चमं
द्वाविंशत्परिपूर्णमूर्तिरुडुपः संताडयेन्नेतरे ॥४०॥

रोहिणी चाश्विनी चैत्रे शून्यभे परिकीर्तिते ।
वैशाखे त्वाष्ट्रवायव्यौ वैश्यतिष्यौ तु शून्यभे ॥४१॥

मासे ज्येष्ठे तथाऽऽदित्यमाषाढे भगवासवौ ।
श्रावणे वैश्वपूर्वौ द्वौ नभस्य पौष्णवारुणौ ॥४२॥

अजैकपादिषे नेष्टं पुष्पेन्द्राग्निमघापरे ।
सहे विशाखमैत्रं च उत्तराभाद्रपादपत् ॥४३॥

सहस्येऽश्विकरार्द्राः स्युर्हरिमूले तपस्य तु ।
तपस्ये भरणीशाक्रो शून्यभान्याहुरग्रजाः ॥४४॥

घटमत्स्यवृषायुग्ममेषकन्यालयस्तुला ।
चापकर्किमृगा सिंहश्चैत्रादौ राशिशून्यकाः ॥४५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

केन्द्रे चैव त्रिकोणे च शुभे चोपचयेऽपिवा ।
एकोऽपि बलवान् वापि शून्यतिथ्योडुनाशकः ॥४६॥

चरेषु सप्तमं भागं स्थिरराशिषु पञ्चमम् ।
उभयोर्नवमं चैव षडशीति मुखं विदुः ॥४७॥

षडशीति मुखे प्रोक्ते षष्ठनाड्यस्तु वर्जयेत् ।
तुलामृगौ प्रतिपदि तृतीयायां मृगार्किभौ ॥४८॥

पञ्चम्यां बुधराशी द्वौ सप्तम्यां चापचन्द्रभौ ।
नवम्यां हरिकीटौ द्वावेकादश्यां गुरोर्गृहे ॥४९॥

त्रयोदश्यामन्त्यवृषौ दिनदग्धाश्च राशयः
मासदग्धाह्वया राशीन् दिनदग्धाश्च वर्जयेत् ॥५०॥

शून्यतिथयः ।

अष्टमीनवमी चैव पक्षयोरुभयो पराः ।
एकादशी मासशून्या तिथयः परिकीर्तिताः ॥५१॥

इति गुरूः

अथ कश्यपः–

भानुर्विशाखा शशिपूर्वषाढा भौमे धनिष्ठा बुधरेवती च ।
बृहस्पतौ रोहिणी शुक्रपुष्यं मन्दोत्तरा पातकयोग एषः ॥५२॥

दिवादृष्टो गुरूर्व्योम्नि शुक्रो दृष्टोऽथवा जनैः ।
तदा प्रभृति सप्ताह शुभकर्म विवर्जयेत् ॥५३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रतिपद् बुधवारेण सप्तम्यां रविवासरः ।
वर्षशूलाविति ख्यातौ शुभकर्म विनाशदौ ॥५४॥

ऋक्षसन्धिगताः खेटा राशिसन्धिगतास्तथा ।
तत्तद्राशिफलं दद्युः वक्रे तु विपरीतकम् ॥५५॥

शक्रमरुद्यमशङ्करवरुणानलयक्षरक्षसां दिक्षु ।
विचरति यामार्धं हि तत्र गतो जयति परचक्रम् ॥५६॥

पृष्ठस्थो जयति जयं पुरतश्च पराजयं रणे राहुः ।
दक्षिणदिक्स्थोऽपि जयं पराजयं वामपार्श्वस्थः ॥५७॥

प्रतिपन्नवमी पूर्वे द्वितीया दश चोत्तरे ।
तृतीयैकादशी चाग्ने चतुर्द्वादिश नैर्ऋते ॥५८॥

पञ्चत्रयोदशीयाम्ये षष्ठी भूते च पश्चिमे ।
सप्तमीपूर्णवायव्ये अमावास्याष्टमी शिवे ॥५९॥

विशाखार्कस्य जन्मर्क्षं तारानाथस्य कृत्तिका ।
वैष्णवं भूमिपुत्रस्य धनिष्ठा चन्द्रजस्य तु ॥६०॥

शुक्रस्य जन्मभं तिष्यं गुरोरुत्तरफल्गुनी ।
शनेस्तु रेवती जन्म राहोजन्माश्विनी भवेत् ॥६१॥

शुभग्रहाणां जन्मर्क्षे शुभकर्म शुभावहम् ।
पापग्रहाणां जन्मर्क्षे शुभकर्माशुभं भवेत् ॥६२॥

अश्विचित्रोत्तराषाढाः श्रविष्ठोत्तरफल्गुनी ।
ज्येस्ठा च रेवती चैव सूर्यादिसहिताः क्रमात् ॥६३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

विवाहे विधवा नारी यात्रायां मरणं ध्रुवम् ।
विद्यारम्भेषु मूर्खत्वं कृष्णारम्भेषु निष्फलम् ॥६४॥

शकुनादि चतुष्केषु करणेष्वपि विष्टिषु ।
कुलिकेषु शुभं वर्ज्यमशुभान्येषु कारयेत् ॥६५॥

गुरुस्थानात् तु शीतांशुः षडन्त्यसंश्रितोऽष्टमम् ।
योगोऽयं शकटो नाम सर्वकर्म वहिष्कृतः ॥६६॥

जीवयुग्राशितश्चन्द्रो व्यय षष्ठेऽष्टमे स्थितः ।
यदि स्याच्छकटो योगः शुभांशस्थोऽपि मृत्युदः ॥६७॥

जीवचन्द्रौ शुभांशस्थौ ज्ञशुक्राभ्यां निरीक्षितौ ।
यदा शकटयोगं स्यात् तदा दोषो नदोषकृत् ॥६८॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने अवयोगाऽध्यायः

अथ उनचत्वारिंशोऽध्याय

भृगुः—व्यास वृहस्पतिमतानुसारेण नक्षत्रसारावलि—

अश्विनी

अश्विन्यश्वमुखाकारा त्रितारा तिर्यगानना ।
क्षिप्रोऽश्वयोनिर्देवगणः पुमांश्चैव विषद्रुमः ॥१॥

कपोतो विहगः प्रोक्त श्चुचेचोलाक्षरात्मकः ।
क्रमादशाधिपतयो भौमशुक्रबुधेन्दवः ॥२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

वर्णश्चामृतकुम्भाभो राहुजन्मर्क्षमेव च ।
शस्तः पथ्यम्बरक्षेत्रेबीजवापविभूषणे ॥३॥

शान्तिप्रवेशदीक्षासु रोपहस्त्यश्वबन्धने ।
रथयानोपनयन गृहवास्तु भिषक्क्रिया ॥४॥

चौलकेशानलस्थैर्यनारिकेलादिरोपणे ।
मन्त्रयात्राप्रतिष्ठासु प्रवेशेऽथाभिषेचने ॥५॥

पञ्चाशद्घटिकाभ्योऽथ चतस्रो विषनाडिका ।
चैत्र श्रावणयोः शून्यं नासत्यावधि दैवतम् ॥६॥

कुजस्य योगः सिद्धाख्यो मृत्युयोगो ज्ञशुक्रयोः ।
पञ्चम्यां भानुवारे च मृत्युयोगः प्रकीर्त्तितः ॥७॥

आनन्दाख्यो रवौ शस्तो गुरुवारे शुभाह्वयः ।
महाशूलाभिधो योगः फाल्गुन्यां ग्रहसंगतः ॥८॥

शून्ययोगो भवेत् पौषे प्रतिपत्संगमे सति ।
मुद्गान्नभुग् ब्रजेत् सार्वद्वारिकोऽश्व गृही शुभः ॥९॥

श्राद्धकर्मणि शस्तः स्याद्नशुभो वाजिविक्रये ।
अर्घहित् संग्रहे[1]पीडा नव पञ्च दिनानि वा ॥१०॥

पर्यते पक्षमात्रं वा, अत ऊर्ध्वं भवेत् सुखी ।
तथा बुधयुते मृत्युरश्विन्योर्वलिमाहरेत् ॥११॥

---

१ संगमे प्र.अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ओषधं गोस्पदरजः श्रीगन्धं पुष्पमुत्पलम् ।
घृतं गुग्गुलु धूपं च क्षीरान्नमुपहारकम् ॥१२॥

देवस्यत्वेति मन्त्रेण शान्ति कुर्यात् ततो जनम् ।
अश्वत्थसमिधो होमद्रव्यमन्त्रविशेषतः ॥१३॥

भरणी

अधोमुखी त्रितारा च भरणी योनिरूपिणी ।
उग्रभं नृगणो योनिर्गजश्चामलकः पुमान् ॥१४॥

मयूरो विहगः प्रोक्तो लीलुलेलोऽक्षरात्कम् ।
कृष्णाभोंऽशाधिपतयो रविज्ञ भृगु भूमिजाः ॥१५॥

वृन्ताकवधशस्त्राग्निद्रव्यसंग्रहभेदने ।
चौर्यसाहसयुद्धेषु मन्त्राञ्जनविषामृते ॥१६॥

विलप्रवेशखनने प्रशस्तो द्यूतभेदने ।
चतुर्विशति नाडीभ्य श्चतस्रो विषनाडिकाः ॥१७॥

मार्गफाल्गुनयोः शून्या यमोऽस्यश्चाधिदेवता ।
कुजवारे विघ्नयोगो नाशाख्यः सप्तमीबुधैः ॥१८॥

कर्क्यालिचापेषु वरो योगोऽर्के यमकण्टकः ।
शुक्रवारे मृत्युयोगो द्वितीयायां विषाविघः ॥१९॥

महाशूलाभिधो योगो मघायां संस्थिते गृहे ।
मिथुने स्यात् कृषिः शून्या गुरुवारे शुभाभिघः ॥२०॥

पितृकर्मणि शस्तः स्याद् यायात् तण्डुलभुग् नरः ।
मध्याद्येकः संक्रमणे[१]व्याधिः स्याद् न निवर्तते ॥२१॥

---

[१] मध्याघ्र्येक संक्रमणे प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अन्त्यपादे ज्वरः पञ्चदिनामामन्तरे मृतिः ।
इतरेषु तु पादेषु सैकादश दिनानि च ॥२२॥

विषमो रविवारे तु यामरात्रि बलिं हरेत् ।
गुडापूपौदनं होमः सदूर्वातिलतण्डुलैः ॥२३॥

गन्धः कृष्णागुरुर्धूपः पुष्पं सौगन्धिकं स्मृतम् ।
आयङ्गौरिति मन्त्रेण यजेत् सिद्धार्थमौषधम् ॥२४॥

अथ कृत्तिका

षट्तारा कृत्तिका चाधोमुखी स्यात् क्षुररूपिणी ।
साधारणच्छागयोनिर्गणो रक्ष उदुम्बरः ॥२५॥

वकश्च विहगो रक्त अ इ उ एऽक्षरात्मकः ।
गुरूराद्यन्तयोर्नाथो मध्ययोस्तु शनैश्चरः ॥२६॥

आमान्नहोमक्रमुक शत्रुनिग्रहमन्त्रणे ।
रसवल्लीधातुमुखदीक्षारम्भण साहसे ॥२७॥

द्रव्याधानचिकित्साग्नितालगोसंग्रहे शुभः
नाडीम्यश्च त्रिशतश्च चतस्रो विषनाडिकाः ॥२८॥

अस्याधिदेवताऽग्निः स्याच् शून्यो मासश्च कार्तिके ।
दोषकृन्नाम योगः स्याच् शनैश्चरदिने शुभः ॥२९॥

वरयोगो भवेद् युक्तो नन्दभार्गवभौमयोः ।
बुधवारे शुद्धयोगोऽमृताख्यो गुरुसूर्ययोः ॥३०॥

CC-0. Nepal Sanskrit Academy, Kathmandu

पञ्चम्यामुग्रयोगस्तु गुरुवारे शुभाभिधः ।
यात्रायां दधिभुक् प्राचीं व्रजेत् तत्रातिपातिके ॥३१॥

अर्घहृत्संक्रमे सोमजन्मर्क्षे रोगसम्भवः ।
दिनानि सप्तमे पीडा भवेदन्त सुखी नरः ॥३२॥

अनलाय बलिं तत्र पूजायां रक्तचन्दनम् ।
समिधः खादिराः सर्पिर्धूपः पुष्पं तु यूथिका ॥३२॥

वल्मीकमौषधं चाग्निन्दुते मन्त्रं घृतौदनं ॥३४॥

अथ रोहिणी

रोहिणी पञ्चताराधोमुखी शक्षटरूपिणी ।
पुमान् स्थिरो नागयोनिर्द्रुमो जम्बुर्गणो नरः ॥३५॥

सरटो विहगो रक्त ओ वा वी वू क्षरात्मकः ।
क्रमादंशाधिपतयो भौमशुक्रबुधेन्दवः ॥३६॥

ऋतुसीमन्तचौलान्नप्राशनस्नाननामसु ।
विद्यारम्भोपनयनविवाहनृपदर्शने ॥३७॥

पुरप्रवेशवास्त्वम्बुप्रतिष्ठाऽऽरामवापने ।
वस्त्रारम्भणशालीक्षु वृक्षसर्षपवापने ॥३८॥

गृहशान्त्यादिकार्येषु प्रशस्तो बीजवापने ।
चत्वारिंशद् नाडिकाभ्यश्चतस्रो विषनादिका ॥३९॥

CC-0. Nepal Sanskrit Academy, Kathmandu

चान्द्रचैत्रे भवेच्छून्यं देवताऽस्य प्रजापतिः ।
योगःस्याद्दोषहृन्नाम सोमभौमार्कयोगतः ॥४०॥

शुभयोगःसौम्यवारे शुक्रवारे शुभाभिधः ।
पूर्णिमायोगतो योगो विषमोऽयं प्रकीर्तितः ॥४१॥

तृतीयायामुग्रयोगो षष्ठीषु दशमीषु च ।
पञ्चम्यां शुभयोगःस्याद् भानुवारे शुभाह्वयः ॥४२॥

यात्रायामध्यमश्चैव प्राचीं कृशरभुग् व्रजेत् ।
संक्रमेवार्घबृद्धिःस्याद् रात्रीशबलिमाहरेत् ॥४३॥

ज्वरो यदिभवेत् तस्मिन् ऋक्षे यस्य नरस्य च ।
अष्टाहाच्च त्र्यहाद्रूध्वं सप्ताहाद् वा सुखी भवेत् ॥४४॥

क्षीरान्न कुङकुमो गन्धः कमलं पुष्पमेव च ।
धूपश्च साज्यकुसुम ईशनिर्माल्यमेव च ॥४५॥

होमं धान्याष्टकेनैव प्राजापत्येन मन्त्रतः ॥४६॥

अथ मृगशिरः

मृगशिरस्त्रितारा च मृगशीर्षनिभाकृतिः ।
तिर्यङमुखं देवगणो मृदुःस्त्री नागयोनिकम् ॥४७॥

स पक्षी खदिरश्चैव वे वो का क्यक्षरात्मकः ।
अंशाधिपतयो भानुबुधशुक्रकुजाः क्रमात् ॥४८॥

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रवेशक्षौरनामाम्बुविद्यारम्भविवाहके ।
ऋतुसीमन्तचौलोपनयनात्मप्रभावके ॥४९॥

बीजत्रापे निषेकाग्निशान्तिपौष्टिकसंगमे ।
स्नानदेवजपश्राद्धमङ्गले राजदर्शने ॥५०॥

दानयात्रावणिग्वास यज्ञसाधनसंग्रहे ।
कर्णवेधे व्रतकृतौ होमे गोसंग्रहे शुभः ॥५१॥

चतुर्दशभ्यो नाडीभ्यश्चतस्रो विषनादिका ।
अस्याधिदेवता चन्द्रः कार्तिके शून्यमिश्रिते ॥५२॥

जया भानौ भौमवारे पूर्णिमा सोमवासरे ।
नवम्यां गुरुवारे च बुधवारे शुभाह्वयः ॥५३॥

सोमविद्गुरूवारेषु दोष हृक्षोभते मृतः [1] ।
चन्द्रोदये नवांशे तु स्तम्भसंस्थापने शुभः ॥५४॥

मृगमांसाशनो गच्छेद् दूर्वा च स्वेतवर्णकः ।
अष्टाहाम्यन्तरे वृष्टिश्चापे संक्रमणेऽर्घकृत् ॥५५॥

ज्वरे नवाहात् पञ्चाहादष्टाहाद् वा सुखी भवेत् ।
सोमपात्रबलिं दद्यात् त्रिंशाहाद् वा सुखी भवेत् ॥५६॥

श्रीगन्धं कुमुदं पुष्पं दशाङ्गं धूपमेव च ।
नैवेद्यं पायसं चैव जुहुयात् [2] क्षीरमासकैः ॥५७॥

नमो भवति मन्त्रेण मन्त्रस्तत्रैव जाप्यकः ॥५८॥

---

[1] दोषहृच् शोभनोऽमृतः । [2] हुनेत् स लि. पु. पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ आर्द्रा

आर्द्रा मणिनिभश्चैकतारा चोर्ध्वमुखी तथा ।
श्वयोनिर्मानुषगणः पुमान् वंशस्तु दारुण ॥५९॥

गृध्रस्तु विहग श्चैव कु घ ङ छाक्षरात्मकः ।
सुराचार्यः शनिर्मन्दो गुरुश्चांशाधिपाः क्रमात् ॥६०॥

द्रव्यसंग्रहणं कार्यं धनत्यागो न जातुचित् ।
नामविद्याकर्णवेधे चाग्निदुष्टाश्वमर्दने ॥६१॥

दैत्यभूतपिशाचादिरौद्रच्छेदविभेदने ।
शत्रुनिग्रह उच्चाटे चौर्यादिगमने शुभम् ॥६२॥

एकविंशतिनाडीभ्यश्चतस्रो विषनाडिकाः ।
चांन्द्रपौषे शिवः शून्य रुद्रस्तस्याधिदेवता ॥६३॥

आदित्यमन्दयोर्नन्दं योगोऽयं वरनामकः ।
कुजवारे मृत्युयोगस्तृतीयायां शुभाह्वयः ॥६४॥

वृषोदये मन्दवारे सेतुबन्धनमाचरेत् ।
मेषकर्कटलग्ने तु तथा भौमार्कवारयोः ॥६५॥

वृषवृश्चिककन्यासु सौम्यजीवकुजोदये ।
भद्रा रक्तचिनं (लं ?) हित्वा सर्वकार्ये शुभप्रदः ॥६६॥

आत्यन्तिकेषु कार्येषु मृगरक्ताशनो[1] व्रजेत् ।
अर्घह्रस्व[2]स्त्रिसंक्रान्तौ ज्वरे मृत्युर्न संशयः ॥६७॥

---

१ मृगरक्तोसनो प्र. पु । २ अर्घेदुस्व प्र. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

रुद्रमन्त्रैर्वलिं दद्यात् मृत्युनाशाय वै सुधीः ।
पञ्चचत्वारि विशाहाददृष्टश्चेत् स जीवति ॥६८॥

श्रीगन्धोन्मत्तकुसुमं दशाङ्गं घृतपायसम् ।
सर्पिषा चरुणा होमः कद्रुदायेति मन्त्रितः ॥६९॥

ओषधान्यत्र मुस्ता च शतपत्रप्रियङ्गवः ॥७०॥

अथ पुनर्वसुः

कपोताकृतिषट्तारा तिर्यगास्यात् पुनर्वसुः ।
आखुयोनिर्देवणश्चलस्त्रीपिप्पलद्रुमाः ॥७१॥

के को हा हि वर्णरुपो वकस्तु विहगोमतः ।
क्रमादंशाधिपतयो भौमशुक्रबुधेन्दवः ॥७२॥

स्नानभेषजसीमन्त क्षौरनामक्रियासु ।
कर्णवेधे च चौलान्नप्राशने चोपनायने ॥७३॥

विद्याप्रक्रमराजाभिषेके वाहादिरोहणे ।
शय्यापुंसवनान्दोलप्रयाणाऽध्ययन व्रते ॥७४॥

वस्त्रभूषाग्रामवास्तुबीजवापे प्रशस्यते ।
ऊर्ध्वं खरामनाडीभ्य[1] श्चतस्रो विषनाडिका ॥७५॥

अदितिर्देवता चास्य शून्य स्याज्ज्येष्ठचान्द्रयोः[2] ।
गुरुवारे सिद्धयोगो भौमवारे शुभाह्वयः ॥७६॥

---

१ उर्ध्वं त्रिशतिनाडीभ्यः लि पु. । २ ज्येष्ठ भाद्रयोः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहने

सर्वार्थसाधको योगो भानुवारे प्रकीर्तितः ।
शनिवारे मृत्युयोगो सिद्धाख्यश्चन्द्रवासरे ॥७७॥

अतिपातिक कार्येषु पटोलिं प्राश्य च व्रजेत् ।
संक्रमे चार्घवृद्धिः स्यात् ज्वरे दित्यै बलिं हरेत् ॥७८॥

त्रयोदशाहादष्टाहात् सप्ताहाद् वा सुखी भवेत ।
हरिद्राकुङ्कुमो गन्धो मल्लिका कुसुमं तथा ॥७९॥

धूपो मलयजश्चात्र नैवेद्यं च गुडौदनम् ।
घृततण्डुलहोमोऽत्र सर्पितैलं यमौषधम्[1] ॥८०॥

अदिति द्यौरिति नमः पीतवर्णः प्रकीर्तितः ॥८१॥

अथ पुष्य

वाणाकृतिस्त्रितारा च पुष्यश्चोर्ध्वमुखी तथा ।
छागयोनिर्देवगणः क्षिप्रः पुन्नागकः पुमान् ॥८२॥

पिकस्तु विहगः प्रोक्तो हू हे हो डाक्षरात्मकः ।
क्रमादंशाधिपतयो रविज्ञभृगुभूमिजाः ॥८३॥

चौलोपनयनश्राद्ध क्षौरसीमन्तनामसु ।
विद्यारम्भेषु भैषज्ये वस्त्राभरणधारणे ॥८३॥

बीजवापग्रामवास्तुनववेश्मप्रवेशने ।
अन्नप्राशनराजावलोकने कर्णवेधने ॥८५॥

---

१ सर्पिस्तैलं तथौषधम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

शास्त्राध्ययनपूजासु शस्त्रमन्त्राभिषेचने
शान्तिपौष्टिकयात्रासु चित्रवस्त्रप्रधारणे ॥८६॥

नृपाभिषेके वाहानामधिरोहे शुभावहः ।
उर्ध्वं विंशतिनाडीभ्यश्चतस्रो विषनाडिकाः ॥८७॥

शून्य कार्तिक वैशाखपौषचान्द्रेषु संमतः ।
मृतयोगो मन्दविदो सिद्धाख्यः सोमभौमयोः ॥८८॥

दशम्यामुग्रयोगोऽर्कवारे स्याच्छुभनामकः ।
गुरुवारे सिद्धयोगाः शुक्रजन्मर्क्षमेव च ॥८९॥

सर्पिषा विल्वजो धूपो नैवेद्यं गुडमण्डकाः[1]।
बृहस्पते परिदिय मन्त्रेण पायसं र्यजेत्[2] ॥९०॥

अश्लेषा

आश्लेषा पञ्चताराऽधोमुखी स्याच्–शुक्तिकाकृतिः ।
गणो रक्षः पुमान् योनिर्मार्जारो दारुणो मतः ॥९१॥

ति तु ते तो वर्णरूपः कपोतो विहगो मतः ।
गुरूराद्यन्तयोर्नाथो मध्ययोस्तु शनैश्चरः ॥९२॥

गुडमाक्षिकवर्णाभो[1] भौमजन्मर्क्षमेव च ।
द्रव्यसंग्रहताम्बूलकल्लीक्षुस्थापने कृषौ ॥९३॥

---

[1]पायसं हुनेत् अ. प. । मन्त्रं ना पायसं हुनेत् प्र. क च. ।
[2] गुडमाक्षीरकर्णाभो लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहने

मन्त्रप्रयोगव्यायामशरशस्त्राभिचारके ।
विषप्रयोगच्छेदाग्निदाहशस्त्रभये' शुभः ॥९४॥

द्वात्रिंशद्घटिकाभ्योऽथ चतस्रो विषनाडिका ।
चान्द्रपौषे च शून्यं स्यात् सर्पस्तस्याऽधिदेवता ॥९५॥

वरनामा भवेद् योगो भौममन्दार्कवासरे ।
गुरुभार्गवयोर्मृत्युर्दिनमृत्युस्तृतीयके ॥९६॥

प्रथमे दिनरोगः स्यात् सोमवारे शुभाह्वयः ।
अतिपातिककार्येशु पायसं प्राश्य च व्रजेत् ॥९७॥

संक्रमेऽर्घ्रक्षयो व्याधौ मृत्युस्तस्य न संशयः ।
बलिदद्याद् विशेषेण सर्पेभ्यस्तस्य शान्तये ॥९८॥

जीवेद् यद्यायुषः शेषात् नवरात्रं तु जीवति ।
अतसीकुसुमं गन्धः कुसुमं चाथ धूपकम् ॥९९॥

सर्प्पिषा गुग्गुलुः प्रोक्तो नैवेद्यं साज्यक्षीरकम् ।
औषधं च यथा प्रोक्तं कमण्डलु मनोहरम्
सावनं दधिमध्वाज्यं नमो अस्त्विति मन्त्रतः ॥१००॥

अथ मघा

मघा लाङ्गुलपुच्छाभा चतुस्तारा ह्यधोमुखी ।
आखुयोनिर्गणो रक्षो दारुणो स्त्री पलाशकः ॥१०१॥

' विषप्रयोक्तच्छेदाग्नदाहशस्त्रभये प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

काकस्तु विहगः प्रोक्तो मा मीमू मेऽक्षरात्मकः ।
क्रमादंशाधिपतयो भौमशुक्रबुधेन्दवः ॥१०२॥

सस्यारम्भे विवाहान्नप्राशने भूप्रवेशने ।
बीजवापकृषौ धान्यसंग्रहे श्राद्धकर्मणि ॥१०३॥

विलप्रवेशने शस्तो द्यूतमन्त्रप्रवेशने ।
ज्ञेयास्त्रिंशत् ३० नाडिकाभ्य श्चतस्रो विषनाडिकाः ॥१०४॥

चान्द्रमाघे भवेच्छून्यं पितरोऽस्याधिदेवताः ।
सुधानन्दा भृगोर्वारे भौमयोगः शुभाह्वयः ॥१०५॥

सोमवारे सुधायोगः सर्वमङ्गलदायकः ।
अव्यक्तवर्णस्तित्तिरिभुक् स यायाद् दक्षिणां दिशम् ॥१०६॥

अर्घवृद्धिः स्थितिस्तद्वत् वृष्टिः स्यात् संक्रमो भवेत् ।
ज्वरे मृत्यु न सन्देहः प्रितृभ्यो बलिमाहरेत् ॥१०७॥

द्वादशाहात् तु पञ्चाहादष्टाहाद् वा सुखी भवेत् ।
अदृष्टयत्नबाहुल्यात् सुखी ज्वरनिपीडने ॥१०८॥

गन्धः कृष्णागुरुः पुष्पं चम्पकादिति तां मनुः ।
नैवेद्यं पुलिकापूपौ गुग्गुलुस्तिलतण्डुलः ॥१०९॥
होमस्यादौषधान्यत्र मत्स्यं क्षौद्रं च पद्मकम् ॥११०॥

अथ पूर्वफल्गुनी

द्वितारा फल्गुनी पूर्वा खट्वाकारा ह्यधोमुखी ।
उग्रः पुमानाखुयोनिः प्लक्षः स्यात् मानुषो गणः ॥१११॥

CC-0. Nepal Sanskrit Academy, Kathmandu

मोटाटीट्टु सुवर्णात्मा पक्षी स्याच्चातको मतः ।
क्रमादंशाधिपतयः सूर्यज्ञभृगुभूमिजाः ॥११२॥

सुवर्णसंग्रहे विद्याऽऽरम्भद्रव्यादिसंग्रहे ।
धान्यसंग्रहणे श्राद्धे नगरौषधमन्त्रके ॥११३॥

शस्त्रास्त्राभ्यासने शौर्यपुरवेश्मप्रवेशने ।
ग्रहाच्छादनकार्येषु शस्तो गारुडसाधनेः ॥पू१४॥

उर्ध्वं विंशतिनाडीभ्य श्चतस्रो विषनाडिकाः ।
कर्कटाख्ये मासशून्यं भगस्तस्याधिदेवता ॥११५॥

शुभयोगः सौम्यवारे शुक्रवारे मृताह्वयः ।
रविसोमेज्यवारेषु शुभयोगः शुभप्रदः ॥११६॥

प्रयागे दक्षिणेदेशे यायाच्छाल्यान्नभोजनः ।
परिघाविन्द्रचापे वा पञ्चाहाद् वृष्टिसंभवः ॥११७॥

संक्रमे यस्तिथिः[1]साध्वी ज्वरे भाग्ये बलिं हरेत् ।
सप्ताहाद् द्वादशाहाद् वा मासे वा यदि जीवति ॥११८॥

यत्नेन चायुशः शिष्टात् नरो जीवति नान्यथा ।
विल्वगन्धो विल्वधूपः क्रमगं तु प्रसूनकम् ॥११९॥

लाजहोम स्वेतवर्णो नदीकूलद्रुमौषधम् ।
भग एवेति मनुना पूजां कुर्याद् विचक्षणः ॥१२०॥

---

१ यस्थितिः प्र.क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथोत्तरफल्गुनी

उत्तरास्याद् द्वितारोद्‌र्ध्वमुखी कृतयुवाकृतिः ।
योनिर्वृषो नरगणः स्थिरः प्रोष्ठद्रुमः पुमान् ॥१२१॥

विहगः शुकनामा च टे टो पा प्यक्षरात्मकः ।
क्रमादंशाधिपतयो गुरुः शौरिः शनिर्गुरुः ॥१२२॥

ऋतुसीमन्तचौलान्नभुक्तिवाहनभूषणे ।
विद्याऽऽरम्भ स्नानकर्म वस्त्रशय्याविवाहके ॥१२३॥

रत्नसिंहाशनकृषिग्रामवास्तूपनायने ।
वापीकूपतडागाभिषेक[१] संग्रहे शुभः ॥१२४॥

अष्टादशभ्यो नाडीभ्यश्चतस्त्रो विषनाडिकाः ।
वैशाखमासे शून्याख्यश्चार्यमाऽस्याधिदेवता ॥१२५॥

शुभयोगो भानुसौम्यभृगुवारे प्रकीर्तितः ।
चतुर्थी गुरुवारे तु मृत्युयोगस्तु नामतः ॥१२६॥

मन्दाहे विषयोगाख्ये दिनरोगस्तृतीयके ।
दोषकृन्नाम योगः स्यात् तथा भौमे शुभप्रदः ॥१२७॥

यात्रायां मध्यमः प्रोक्तः पिष्ठभुग् दक्षिणां व्रजेत् ।
परिधाविन्द्रचापेषु दिनाद् व्यस्तस्तु पञ्चमात ॥१२८॥

अर्घकृत् संक्रमे चैव ज्वरेऽर्यमबलिं हरेत् ।
अष्टाहात् पञ्चविंशाहात् मासान्ते च सुखी भवेत ॥१२९॥

---

[१] षेचन पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहन

बन्धूककुसुमं चाथ कुङ्कुमोशीरगन्धकम् ।
घृतगुग्गुलुधूपञ्च नैवेद्यं घृतपायसम् ॥१३०॥

हेमसर्पिमुस्तशमीजटामांस्यौषधानि च ।
रक्तश्यामनिभं चैव अर्घमादिति मन्त्रतः ॥१३१॥

अथ हस्तस्य

हस्तो हस्ताकृतिः पञ्च तारास्तिर्यङ्मुखो भवेत् ।
अङ्कोलो महिषो योनिः क्षिप्रः स्त्री देवतागणः ॥१३२॥

सरठो विगः प्रोक्त पु ष ण ठात्म उच्यते[१] ।
क्रमादंशाधिपतयो भौमशुक्रबुधेन्दवः ॥१३२॥

सीमन्तनामकरणकर्णवेधर्तुभेषजे ।
सुरप्रतिष्ठाचौलान्नप्राशने[२] पवमन्त्रणे ॥१३४॥

विवाहवस्त्राभरणे श्राद्धवाहनरोहणे ।
विद्यारम्भे विले हर्म्यगृहप्राकारगोपुरे ॥१३५॥

देवतास्थापने वीजवापद्रव्यगृहे शुभः ।
एकविंशतिनाडीभ्यश्चतस्रो विषनाडिकाः ॥१३६॥

ज्येष्ठमासे तु शून्याख्यः सविताऽस्याधिदेवता ।
मृत्युयोगः शनेर्वारे सिद्धियोगो रवेस्तथा ॥१३७॥

---

[१] ठात्मकोच्यते पा. । [२] परमन्त्रणे पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

आनन्दाख्यो महायोगाः सोमपुत्रस्य वासरे ।
गुरुवारे सिद्धियोगो भौमवारे शुभाह्वयः ॥१३८॥

अष्टमी रविवारे च सुधायोगः प्रकीर्तितः ।
पयसा मिश्रितं भुक्त्वा व्रजेदन्नं तु दक्षिणाम् ॥१३९॥

इन्द्रचापे भवेद् वृष्टिर्दिने वा एष वासरे ।
एकोनविंशतिदिनादथवा भवति ध्रुवम् ॥१४०॥

संक्रान्तावर्घवृद्धिः स्यात् प्रदद्याद् द्युमणेर्बलिम् ।
ज्वरे सप्तदिनादेकविंशाहात् पञ्चहादथ ॥१४१॥

पीडाविमुक्तदेहस्यादत ऊर्द्धं सुखी भवेत् ।
रक्ताश्च[1] धूपकुसुमं रक्तचन्दन गन्धकम् ॥१४२॥

घृतापूपं तु नैवेद्यं पद्मकोशीरमौषधम् ।
रक्तान्तं[2] सल्लकीधूपं हवनं दधिसर्पिषा ॥१४३॥

जपहोमार्चनं मन्त्रमुदुत्यं जातवेदशम् ॥१४४॥

अथ चित्रा

मुक्ताकारा चैकतारा चित्रा तिर्यङ्मूखी तथा ।
अयस्त्रीव्याघ्रयोनिश्च मृदुस्त्रीराक्षसो गण ॥१४५॥

वर्णस्तु पे पो रा री स्याद् मालिङ्को विहगोमतः ।
क्रमादंशाधिपतयो सूर्यज्ञभृगुभूमिजा ॥१४६॥

---

१ रक्तं च पा. । २ रक्ताभं पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अन्नप्राशनचौलोपनय[1]राजावलोकने ।
वाहनारोहणे चैव वस्त्रारम्भणधारणे ॥१४७॥

वीजवापश्राद्धदान कर्णवेधर्तुभेषजे ।
मुक्तामणिकृषिक्षौरव्रतसंगीतने शुभा ॥१४८॥

उर्ध्वं विंशतिनाडीभ्यश्चतस्रो विषनडिकाः ।
चान्द्रवैशाखयोः शून्यं त्वष्टा चास्याधिदेवता ॥१४९॥

मृत्युयोगः शनेर्वारि भृगुवारे शुभाह्वयः ।
आनन्दाख्यः कुजदिने नन्दार्ककुजयोर्बुधः १५०॥

विषयोगःसोमदिने ज्ञगुर्वोर्यमकण्टकः ।
जयार्कोऽयं सुधायोगः कुजजन्मर्क्षमेव च ॥१५१॥

दक्षिणदिशि चित्रान्नभुग् व्रजेद् वातिपातिके ।
पूर्वाह्वे माघमासे तु इन्द्रचापस्य दर्शने ॥१५२॥

दशाहाभ्यन्तरे वृष्टिर्जायते नात्रसंशयः ।
सायाह्ने चैत्रमासस्य विशेषाद् मेघदर्शने ॥१५३॥

तन्मासाभ्यन्तरे वृष्टिः समग्रा जायते ध्रुवम् ।
वृष्टिवृश्चिक कन्यासु भद्रां च नवमीं व्रजेत् ॥१५४॥

अर्वहृत् संक्रमे जाते ज्वरे त्वष्ट्रे बलिं हरेत् ।
अष्टाहादथ सप्ताहात् पञ्चाहाद् वा सुखी भवेत् ॥१५५॥

---

१ उपनयन पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

चित्रवर्णं जपापुष्पं कुङ्कुमोशीरगन्धकम् ।
नैवेद्यं मोदको धूपं गन्धीपर्णं तथैव च ॥१५६॥

होमे चित्रौदनं दूर्वा नदीमृद् मुस्तमौषधम् ।
इह त्वष्टारमिति च मन्त्र पूजादिषु स्मृतः ॥१५७॥

अथ स्वातिः

तिर्कङमुखी स्वातिरेकताराविद्रुमसन्निभा ।
विल्वःपुमान् देवगणःस्मृतो महिषयोनिकः ॥१५८॥

पिङ्गलो विहगःप्रोक्तो रु रे रो ताऽक्षरात्मकः ।
क्रमादंशाधिपतयो जीवमन्दशनीज्यकाः ॥१५९॥

ऋतुप्रासादभैषज्यदोलान्दोलनवाहने ।
अन्नप्राशनसीमन्तचौलनार्मविवाहके ॥१६०॥

आरम्भवस्त्राभरणमौञ्जीनृपविलोकने ।
पुररम्यामरग्रामज्योतिषग्रहणे शुभः ॥१६१॥

चतुर्दशघटीभ्योऽथ चतस्रो विषनाडिकाः ।
चान्द्रवैशाखके शून्यं मरुतोऽस्याधिदेवता ॥१६२॥

शुभयोगः सोमवारे दोषजिद् गुरुसौम्ययोः ।
आरेज्यमन्दवारे तु भार्गवे यमकण्टकः ॥१६३॥

अतिपातिककार्येषु भक्षितामलको व्रजेत् ।
मन्दोदये मन्दवारे धान्यसंग्रहणं शुभम् ॥१६४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहने

विशेषतश्चापलग्ने चार्घवृद्धिस्तु संक्रमे ।
ज्वरे विशेषतो मृत्युर्वायवे बलिमाहरेत् ॥१६५॥

मासद्वयादेकमासाद् दशाहाद् वा सुखी भवेत् ।
पुष्पं चन्दनकक्षौद्रमौषधं गुडमेव च ॥१६६॥

धूपः कृष्णागुरुः साज्यं यवैर्होमं तु कारयेत् ।
दध्योदनं तु नैवेद्यं मरुत्वं मारुतं मनुः ॥१६७॥

अथ विशाखा

सूर्यक्कितिर्विशाखाष्टतारा वाधोमुखी तथा ।
विकङ्कतो व्याघ्रयोनी रक्षः साधारणः पुमान् ॥१६८॥

कौशिको विहगः पीतस्त्री तू ते तोऽक्षरात्मकः ।
क्रमादंशाधिपतयो भौमशुक्रबुधेन्दवः ॥१६९॥

ब्रतोपवासस्नेहान्नपानादिमणिहोमके ।
योगबीजाऽऽवापशस्त्राभरणेषु विशिष्यते[1] ॥१७०॥

चतुर्दशघटीभ्योऽथ चतस्रो विषनाडिकाः ।
शून्यं मार्गशिरे प्रोक्तं इन्द्राग्नी अधिदेवते[2] ॥१७१॥

भानुवारे वियोगः स्यात् सोमवारे शुभान्वितः ।
भौमविद्गुरुमन्देषु शुभयोगः प्रकीर्तितः ॥१७२॥

---

१ च्वविशिष्यते प्र. ।

२ चन्द्र तस्याधिदेवता अ. क. । चन्द्रसूर्यादिदेवता प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

भद्रातिथौ सुधा योगो[1] ज्ञेज्ययोर्यमकण्टकः ।
चन्द्रारवारयोर्मृत्युयोगो[2] नासाह्वयस्त्रितः ॥१७३॥

दिनमृत्युद्वितीयायां सूर्यजन्मर्क्षमेव च ।
शुक्रोदये भृगोर्वारे श्रेष्ठश्चारण्ययोः शुभः[3] ॥१७४॥

तत्काले व्यवहाराणामारम्भे विजयो भवेत् ।
भुक्त्वा पिष्ठोदनं गच्छेदर्वाचीं ककुभं पृति ॥१७५॥

अष्टाहाभ्यन्तरे वृष्टिरिन्द्रचापस्य दर्शने ।
धान्यसंग्रहणं कुर्यात् कन्याधन्वोर्विशिष्यते ॥१७६॥

अर्घवृद्धिस्तु संक्रान्तौ ज्वरइन्द्र, बलि हरेत् ।
विशाहादेर्काविशाहात्पक्षाहाद्वा सुखी भवेत् ॥१७७॥

इन्द्राग्नी आगतं मन्त्रो नैवेद्यं गुडपायसम् ।
औषधं दवनं पुष्पं वदरी देवदारु च ॥१७८॥

धूपं क्षीरोदनं होम, कुङ्कुमं गन्ध एव च ॥१७९॥

अथानुराधा

तिर्यङ्मुखी चाष्टतारा मित्रर्क्षं तारंसन्निभम् ।
मृदु स्त्री वकुलो देवगण, स्यान्मृगयोनिका ॥१८०॥

कोकिलो विहग, प्रोक्तो ना नी नू नेऽक्षरात्मक, ।
क्रमादंशाधिपतय, सूर्यज्ञाभृगुभूमिजा, ॥१८१॥

---

१ भद्रातिथौ शुभो योग, प्र. । २ मन्दारवारयो, प्र. ।
३ श्चारणशोभन, पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वस्त्राभरणसीमन्तकर्णवेधर्तुनामके ।
चौलवाहनभैषज्यमौञ्जीराजावलोकने ॥१८२॥

बीजान्नस्वर्णवैवाहरत्नयात्राञ्जने१ शुभम् ।
उर्ध्वं तु दशनाडीभ्यश्चतस्रो विषनाडिका, ॥१८३॥

चैत्रमासे भवेच्छून्यं मित्रस्तस्याधिदेवता ।
सिद्धयोगः सौम्यवारे शनिवारे शुभाह्वयः ॥१८४॥

सोमार्कवारयोर्मृत्युयोगः शुभ सनातन, ।
द्वादश्यां वा तृतीयायां वारयोगोऽभिधानतः ॥१८५॥

कन्यादिचापलग्नेषु कुजांशे धान्यसंग्रहः ।
तत्काले व्यवहाराणामारम्भः सर्वसिद्धिदः ॥१८६॥

सार्वद्वारिकमेवं हि गमने स्यात् कुरून्‌ शकान् ।
संरक्तकरवीरा च वारिवाहस्य दर्शने ॥१८७॥

त्र्यहाभ्यन्तरतो वृष्टिः संक्रान्तावर्घहृद् भवेत् ।
ज्वरे मृत्युर्न सन्देहो मित्रायात्र बलिं हरेत् ॥१८८॥

पक्षाद् दशाहादष्टाहाददृष्टे सति जीवति ।
लाक्षाधूप, श्वेतवर्ण, कुसुमं श्वेतपङ्कजम्२ ॥१८९॥

नैवेद्यं कृशरं होमः सूरणं गन्धकुङ्कुमम् ।
सहदेव्यौषधं देवः सवितः प्रसवो मनु ॥१९०॥

---

१ यात्राक्षणे प्र. २ कुक्कुमं श्वेतपङ्कजम् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ज्येष्ठा

ज्येष्ठा त्रितारका तिर्यग्मुखी स्यात् कुण्डलाकृति, ।
मृगयोनिर्गणो रक्ष, कपित्थो दारुण, पुमान् ॥१९१॥

नो या यी यु वर्णरूप, कुक्कुटो विहगोमत, ।
क्रमादंशाधिपतयो गुरुर्मन्द, शनिर्गुरुः ॥१९२॥

द्रव्या ऽऽ दानाभिषेकोग्रकार्यमिथ्याभिदम्भके ।
अन्यायकुटिलस्तेयशत्रुग्राह विघातके ॥१९३॥

शस्त्रास्त्रचापराजाभिषेककूपेषु शस्यते ।
चतुर्दशघटीभ्यो ऽ थ चतस्रो विषनाडिकाः ॥१९४

फाल्गुने मासि शून्याख्यं शक्रस्तस्याधिदेवता ।
नाशयोगो रवेर्वारे सर्वशोभननाशनः ॥१९५ ॥

भुक्त्वा तिलौदनं गच्छेदतिपातिककर्मणि ।
करवीरा च जीमूत दर्शने शनिहायने ॥१९६॥

दशाहाभ्यन्तरे वृष्टिः संक्रान्तावर्घवृद्धिदः ।
ज्वरे मृत्यु र्न सन्देहो शक्रायान्नबलिं हरेत ॥१९७॥

यदि पूण्यविशषेण सुखी पक्षाद्विशेषतः ।
नैवेद्यं साज्यशाल्यन्नं कर्पूरागरुधूपकः ॥१९८॥

यदिन्द्रेति च मन्त्र स्याद् होमे सुरणकं तथा ।
सीमन्तपुष्पं श्रीगन्धमौषधं तु फलानि च ॥१९९॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ मूलम्

नवतारा भवेन्मूलं सिंहाकृतिरधोमुखम् ।
ये यो भा भी वर्णरूपो भ्रमरः पक्षिरेव च[1] ॥२००॥

क्रमादंशाधिपतयो भौमशुक्रबुधेन्दवः ।
मन्त्रौषधामलगता तरुगुल्मा दिरूपिणी ॥२०१॥

बीजाग्रयणगजोष्ट्रमहिषीवृषसंग्रहे ।
धान्यसंग्रहणं कार्यं नामोद्वाहर्तुके शुभम् ॥२०२॥

ऊर्ध्वं रसाक्षनाडिभ्यश्चतस्रो विषनाडिकाः ।
माघमासे भवेच्छून्यं निर्ऋतिश्चास्यदेवता ॥२०३॥

रिक्ताष्टीद्वादशीषु प्रशस्तो रणदारुणे ।
अन्त्यांशे दिनमृत्युः स्याच्छुभो भार्गवभौमयोः ॥२०४॥

भद्रायां शनिवारे च जया, भानौ शुभाभिधः ।
बुधे शुक्रे चतुर्थ्यां तु शुभयोगः प्रकीर्तितः ॥२०५॥

सूरेज्यप्रतिपद्योगे विशाख्यः सर्वदोषकृत् ।
नन्दार्ककुजयोर्वारे स एव तद्वदांभयाः[2] ॥२०६॥

यात्रायां मध्यमः प्रोक्तो मूलं प्राश्य व्रजेन्नरः ।
अर्धह्रत्संक्रमे जाते ज्वरे च मरणं ध्रुवम् ॥२०७॥

निर्ऋतये बलिं दद्याददृष्टे सति जीवति ।
पक्षाद् वा द्वादशाहाद् वा नवाहाद् वा सुखी भवेत् ॥२०८॥

१अत्र श्लोकस्त्रुटितः। २तद्वदाह्वया अ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

मोषुणोति मनुः कृष्णं सुरभि कुसुमं तथा ।
गन्ध कृष्णागरुश्चैव धूपो मेषविषाणकम् ॥२०९॥

मत्स्यमांसं सुरायुक्तं नैवेद्यं शालिकौदनम् ।
तिलप्रियङ्गुहोमोत्र औषधं फलिनी मतम् ॥२१०॥

पूर्वाषाढा

पूर्वाषाढा त्रिताराधरधः पर्यङ्क आकृतिः ।
उग्रस्त्रीवञ्जुलो योनिर्मर्कटो मानुषोगणः ॥२११॥

भू ध फ ढात्मको वर्णो विहगस्तित्तिरिर्मतः ।
द्रव्यगोसंग्रहे बीजवापीकूपतडागके ॥२१२॥

शृङ्खलाबन्धने विद्यारम्भणे शस्त्रदीक्षणे ।
मणिमुक्ताप्रवालेषु स्याद्द्वारोद्घाटने शुभः ॥२१३॥

चतुर्विंशतिनाडीभ्य श्चतस्रो विषनाडिकाः ।
श्रावणे मासि शून्याख्यं तोयस्तस्याधिदेवता ॥२१४॥

गुरुवारे सुधायोगः शुभयोगः शनेर्दिने ।
रव्यारगुरुवारेषु शुभयोगः प्रकीर्तितः ॥२१५॥

नन्दाभौम सुधायोगो विषयोगो हिमद्युतौ ।
क्रमादंशाधिपतयो रविज्ञभृगुभूमिजाः ॥२१६॥

यात्रायामुदकं पीत्वा पश्चिमां वै दिशं व्रजेत् ।
वृष्टिरष्टदिनाच्छुक्रसप्तम्यां मेघंदर्शने ॥२१७॥

पञ्चाहाज्जायते वृष्टिरिन्द्रचापस्य दर्शने ।
संक्रान्तावघंहृच्चैव ज्वरे वारिबलिं हरेत् ॥२१८॥

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहन

विंशाहान्नवमाहाद् वा मासाच्चतुरहादथ ।
एकादशदिनाच्चैव त्रिपक्षाद् वा सुखी भवेत् ॥२१९॥

यत्किञ्चिदननुप्रोक्तः पद्मकेशरमौषधम् ।
रसशैलेयधूपः स्यान्नैवेद्यं गुडमण्डकाः ॥२२०॥

श्रीचन्दनं तुलाक्षार कुसुमं रक्तकान्तिकम् ।
होमं घृतयुतं चान्नं नीलजीमूतसन्निभम् ॥२२१॥

उत्तराषाढा

हस्तिश्रृङ्गसवृक्षोर्ध्वमुखी स्यात्तद्द्वितारका ।
गोरवण्डयोनि वभ्रुर्वानुत्तराषाढकः पुमान् ॥२२२॥

गणो मनुर्ष्य इत्युक्तः स्थिरः पनसवृक्षकः ।
शुकस्तु विहगः प्रोक्तो भे भो जा ज्य क्षरात्मकः ॥२२३॥

गजक्रयगजारोहे शङ्कुसंस्थापने वसं ।
विवाहान्नप्राशनाग्नि प्रतिष्ठादिषु चौलके ॥२२४॥

स्तम्भाभिषेकाभरणे वस्त्रवाहनबीजके ।
मौञ्जीविद्यास्नानगुल्मलताद्युत्सवके शुभः ॥२२५॥

ऊर्ध्वं विंशतिनाडीभ्यश्चतस्रो विषनाडिकाः ।
विश्वेदेवा देवतास्याच्छून्यं स्याच्चान्द्रज्येष्ठके१ ॥२२६॥

---

१ लिखितपुस्तकेषु शून्यं श्रावणज्येष्ठयोः पाठो वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

सोमार वारयोर्मृत्युर्योगोऽर्कस्य शुभाह्वयः ।
आनन्दयोगः शुक्रे तु गुरुवारे शुभाह्वयः ॥२२७॥

नन्दागुरौ सुधायोगो बुधवारे विशेषतः ।
वृषवृश्चिककन्यासु भद्रां च नवमीं त्यजेत् ॥२२८॥

सोमसौम्यारजीवांशे भद्रानागतिथौ मृतः ।
सोमसूर्यारजीवांशो भूप्रवेशे शुभाह्वयः ॥२२६॥

गुरुराद्यन्तयोर्नाथो मध्ययोस्तु शनैश्चरः ।
बीजपूररसं पीत्वा प्रयायादविचारतः ॥२३८॥

दशाहादथ पञ्चाहाद् वृष्टिः स्यादभ्रूदर्शने ।
अर्घहृत् संक्रमे जाते विश्वेदेव बलिं हरेत् ॥२३१॥

मासाद् वा विंशतिदिनात् सुखी भवति नान्यथा ।
मुस्ता धूपः सप्तपर्णं कुसुमं चन्दनं तथा ॥२३२॥

पञ्चपक्षापहारानं शल्लकीतण्डुलां हरेत् ।
विश्वेदेवास इति च मन्त्रः स्याद्रक्तवर्णकम् ॥२३३॥
सितकुन्देन्दुशर्णो वा औषधं स्याद् बलागुरुः ॥२३४॥

अथ श्रवणम्

त्रितारा श्रवणश्चोर्ध्वमुखी दण्डाकृतिर्भवेत् ।
चरो देवगणो योनिर्मर्कटोऽर्कद्रुमः पुमान् ॥२३५॥

तित्तिरिर्विहगः प्रोक्तो जू जे जो खा क्षरात्मकः
तडागयज्ञारामेषु प्रतिष्ठाधान्यसंग्रहे ॥२३६॥

CC-0. Nepal Sanskrit Academy, Kathmandu

कृष्यर्तुमौञ्जीनामान्नप्राशनाघ्रानदक्षिणे ।
वास्तुयात्राव्रते शस्तो विद्यादाताभिषेचने ॥२३७॥

दशभ्यो घटिकाभ्योऽथ चतस्रो विषनाडिका: ।
अस्याधिदेवता विष्णु: स्याच्छून्यं चान्द्रश्रावणे [1] ॥२३८॥

सोमवारे सुधायोगः शुभयोगो रवेर्दिने ।
रिक्तासोमे सुधायोगः शनेस्तु यमकण्टकः ॥२३९॥

विषयोगो भृगोः षष्ठयां पञ्चम्यामुग्रनामकः ।
कर्क्यालिचापलग्नेषु चन्द्रांशे धान्यसंग्रहः ॥२४०॥

सूर्योदये द्वितीयांशे गृहकार्ये शुभाह्वयः ।
क्रमादंशाधिपतयो भौमशुक्रबुधेन्दवः ॥२४१॥

यात्रायामुत्तमं प्रोक्तं व्रजेत् सक्तुजलाशनः ।
अर्घवृद्धिस्तु संक्रान्तौ ज्वरे[2] दद्याद् बलिं हरेः ॥२४२॥

एकादशाहादष्टाहात् सुखी मासद्वयाद् भवेत् ।
जातीपुष्पं तु नैवेद्यं सगुडंक्षीरमण्डकः ॥२४३॥

गन्धं स्याच्चन्दनं तत्र कृष्णवर्णस्तथैव च ।
रक्ततण्डुलहोमः स्यादौषधं शतपत्रकम् ॥२४४॥

इदं विष्णुर्मनु प्रोक्तं[3] शान्तिस्तस्य प्रवर्तते ॥२४५॥

---

१ लिखितपुस्तकेषु चान्द्रमाघयोः पाठो वर्तते ।
[2] द्वारे पा. ।[3] मनुः मन्त्रः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ धनिष्ठा

धनिष्ठा मुरजाकारा चतुस्तारोर्ध्ववक्त्रका ।
योनिः सिंहो नरो वा स्त्री गणो रक्षो द्रुम शमी[१] ॥२४६॥

काकस्तु विहगः प्रोक्तो गा गी गू गे ऽक्षरात्मकः ।
(वस्त्राभरणभैषज्य ऋतुराजावलोकने ॥२४७॥

वाहनागमचौलान्नप्राशनाशनशान्तिके ।
यात्राहर्म्योपनयेन शुभः स्वेतावपुत्रके ॥२४८॥)

उर्ध्वं च दश नाडीभ्यश्चतस्रो विषनाडिका। ।
आषाढचान्द्रयोः[२] शून्यं वसवोऽस्याधिदेवताः ॥२४९॥

जयायां रविवारे च सुधायोगः प्रकीर्तितः ।
क्रमादंशाधिपतयः सूर्यज्ञभृगुभूमिजा ॥२५०॥

यात्रायां शर्करां पाश्य व्रजेच्छान्तिकपौष्टिके ।
पञ्चाहाभ्यन्तरे वर्षं रक्तमेघस्य दर्शने ॥२५१॥

संक्रमेर्घं स्थिरोव्याधौ वसुभ्यो बलिमाहरेत् ।
दश–द्वादश–पक्षाद् वा त्रयोदशदिनात् सुखी ॥२५२॥

यो नः सपत्नीति मनुर्गन्ध [३] कर्पूरचन्दनम् ।
सीमन्तीकुसुमं श्वेतं धूपश्च कृतगुग्गुलुः ॥२५३॥

---

१ स्वरः शमी लिखितपुस्तकेषु पाठो वर्तते। ( ) चाप चिन्हान्तर्गतः प्राठः प्रपुस्तके नवर्तते । २ चान्द्राषाढके । ३ मनुः–मन्त्रः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहने

उदुम्बरसमिद्होमे नैवेद्यं गुडपूरिका ।
बुधस्य जन्मनक्षत्रमौषधं चाथ कथ्यत ॥२५४॥

गोरोचनं सर्षपस्तु सितश्चैव प्रकीर्तितम् ॥२५५॥

अथ शतभिषक्

शततारा शतभिषक् चोर्ध्वश्चावृत्तरूपकः ।
अश्वयोनिर्गणो रक्ष कदम्ब स्त्रीकदम्बकः ॥२५६॥

गो सा सी सू वर्णरुपः कपोतो विहगोमतः ।
ऋतुनाम क्षुद्रधान्यबीजस्नानजलाशये ॥२५७॥

भिषगारम्भथौलान्नप्राशनाञ्जनशान्तिके ।
जपहोमतुरङ्गोष्ट्रदानधर्मम्बुपौष्टिके ॥२५८॥

मुक्तामणिप्रवालाग्निकूपोद्याने शुभप्रदः ।
अष्टादशघटीभ्योऽथ चतस्रो विषनाडिका ॥२५९॥

शून्यं भाद्रपदे मासे वरुणोऽस्याधिदेवता ।
शुभयोगः सोमवारे नन्दार्ककुजयोः शुभः ॥२६०॥

शुभः स्याच्छुक्लपञ्चम्यां पूर्णभौमशुभाभिधः ।
कुजलग्ने भानुवारे शस्तं चौषधसेवने ॥२६१॥

क्रमादंशाधिपयो गुरुर्मन्दः शनिर्गुरुः ।
प्रयाणे चात्र चोदीचीं शालितण्डुलभुग् व्रजेत् ॥२६२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

कुम्भोदये कृषिः शस्ता संक्रमेऽर्घक्षयो भवत्ः ।
तीव्रज्वरे यथोक्तेन वरुणाय बलिं हरेत् ॥२६३॥

दशाहाद् द्वादशाहाद् वाषडहाद् वा सुखी भवेत् ।
दूर्वाश्यामं सकर्पूरागरुधूपस्तु चन्दनम् ॥२६४॥

इमं मे वरुणो मन्त्रः कमलं कुसुमं तथा ।
अश्वत्थसमिधा होमो नैवेद्यं घृतपूरिकाः ॥२६५॥

दूर्वाश्यामं चौषधानि[1] रोचनोशीरचन्दनम् ॥२६६॥

पूर्वभाद्रपदायाः

द्वितारा पूर्वभाद्रा तु कुचाकृतिरधोमुखी ।
योनिः सिंहो नरो वा स्त्री मानुषो गण उच्यते ॥ ६७॥

से सो दा दी वर्णरुपो विहगः कलविङ्ककः ।
द्रव्यगोसंग्रहेवशविद्याप्राकारनामके ॥२६८॥

हिंस्रयन्त्रप्रयोगस्त्रीवरके गजबन्धने ।
द्यूतचौर्यादिखननमिथ्यालाभे शुभप्रदः ॥२६९॥

षोडशभ्यो नाडिकाभ्यश्चतस्रो विषनाडिकाः ।
चन्द्राश्वयुजयोः शून्यं देवताऽजैकपात्स्मृता ॥२७०॥

नाशयोगो भौमवारे सोमवारे शुभाह्वयः ।
शुक्रोदये तृतीयांशे कूपस्य खनने शुभम् ॥२७१॥

---

१ दूर्वाश्यामाकौषधानि ।

CC-0. Nepal Sanskrit Academy, Kathmandu

महाशूलाह्वयो योगश्छिद्रायां तु बुधे शुभे ।
क्रमादंशाधिपतयो भौमशुक्रबुधेन्दवः ॥२७२॥

यात्रायामप्रशस्तं स्यादात्यैके दक्षिणां दिशम् ।
शर्करामधुसंमिश्रं सितान्नं प्राश्य च व्रजेत् ॥२७३॥

संक्रमेर्घस्थितिः प्रोक्ता ज्वरे मृत्युर्नशंसयः ।
अजैकचरणायात्र[1] बलिं दद्यात् ततः सुखी ॥२७४॥

समुद्रः सिन्धुश्च मनुर्गन्धः कुङ्कुमचन्दनम् ।
दधिसर्पिस्तु नैवेद्यं धूपं सर्जरसं तथा ॥२७५॥

अर्कप्रसूनैः कुष्माण्डैर्यजेद् दधिमधुप्लुतैः ।
श्यामवर्णनिशा चैव औषधं तु विनिक्षिपेत् ॥२७६॥

उत्तरभाद्रपदा

द्वितारा चोत्तराभाद्र चोर्ध्ववक्त्रानुरुपतः ।
स्थिरः स्त्री मानुषगणो योगोर्निनिम्बकस्तरुः ॥२७७॥

दुर्वर्णरुपको ज्ञेयो विहगः शुक एव च ।
वस्त्राभिषेककरणचौलोपनयनान्तके ॥२७८॥

विवाहस्नानसीमन्तनामपौष्टिकमङ्गले ।
राजाभिषेचने शस्तः कर्णवेधाग्निसंग्रहे ॥२७९॥

चतुर्विशतिनाडीभ्य श्चतस्रो विषनाडिका ।
शून्यं मार्गशीर्षमासि चाहिर्बुन्ध्योऽस्य देवता ॥२८०॥

---

१ अजैकपतयेचात्र लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

कुजवारे सुधायोगः सिद्धियोगो रवौदिने।
दिनमृत्युतृतीयांशे जयाभानौ शुभाभिधः ॥२८१॥

महाशूलाह्वयो योगो भवेद् हस्ते तु मृत्युदः।
दु थ झ ञ ति वर्णाख्यं स्तम्भर्क्षं नाम संज्ञितम् ॥२८२॥

क्रमादंशाधिपतयो रविज्ञभृगुभूमिजाः।
प्राश्य गव्यं पयो गच्छेद् यात्रायामतिपातिके ॥२८३॥

रविसंक्रमणे जाते चार्घवृद्धिः प्रशस्यते।
ज्वरे दशाहाद् पक्षाद्वा चाहिर्बुध्न्यबलिं हरेत् ॥२८४॥

घृतगुग्गुलूधूपश्च श्वेतवर्णं च चन्दनम्।
नैवेद्यं गुढदध्यन्नं होमे तु गुडमुद्गकम् ॥२८५॥

पत्रिकाकुसुमं [१]चैव गन्धं तु हरिचन्दनम्।
एष ब्रह्मेति मन्त्रः स्यादौषधं श्री फलं मतम् ॥२८६॥

अथ रवती

द्वात्रिंशत्तारका पूषा मुरजाकारकस्तथा।
तिर्यग्वक्त्रः सुविज्ञेयो[२] ज्योतिः शास्त्रविशारदैः ॥२८७॥

गजयोनिः मधूकः स्यान्मृदुः स्त्री देवतागणः।
देदो चा ची वर्णरुपो बर्हिणो विहगोमतः ॥२८८॥

क्रयाम्बुवास्तुभूपस्तुविद्यारम्भविवाहके।
चौलोपनयनस्नानकर्णवेधप्रवेशने ॥२८९॥

---

[१] पत्रिकाकुङ्कुमं प्र, । [२] तिर्यग्वक्त्रस्तु विज्ञेयो प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

राजाभिषेकसीमन्तयात्रानामान्नवस्त्रके ।
वाहनारोहवीजाग्निसेतुगोसंग्रहे शुभः ॥२६०॥

उध्वं त्रिशन्नाडिकाभ्यश्चतस्रो विषनादिकाः ।
शून्यंभाद्रपदे मासिपूषाभागाधिदेवताः ॥२६१॥

सिद्धयोगो भृगौ मन्दे विषयोगोऽष्टमीदिने ।
आनन्दाख्यो रवेर्वारे मृत्युयोगश्च भूमिजे ॥२६२॥

महाशूलाह्वायो योगश्चोत्तरस्थे ग्रहेसति ।
रव्यारगुरुमन्देषु शुभयोगः प्रकीर्तितः ॥२६३॥

नन्दाभौमे जयाभानौ सुधायोगः शुभप्रदः ।
क्रमादंशाधिपतयो गुरुमंदः शनिर्गुरुः ॥२६४॥

यात्रायामुत्तमा शालिपिष्ठमद्याद् व्रजेन्नरः ।
संक्रान्तावर्घवृद्धिः स्याज ज्वरे पुष्णे बलिं हरेत् ॥२६५॥

दशाहाद् द्वादशाहाद् वा सुखी भवति निश्चयात् ।
नक्तं दिव रसा(कांशं पूषा गावेति मन्त्रतः ॥२६६॥

मन्दारकुसुमं होमे लिलतण्डुलशक्तवः ।
घृतपूपस्तु नैवेद्यं यावकं रक्तचन्दम् ॥२६७॥

औषधं सहदेवी च शने जन्मर्क्षमेव च ॥२६८॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्य विरचिते
जगन्मोहने नक्षत्रासारावलिर्नाम[१] उनचत्वारिंशोऽध्यायः ।

---

[१] नक्षत्रमालावर्णनं नाम प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अथ चत्वारिंशोऽध्यायः

अथ देशव्यवस्थया सामान्यदोष निरुपणम् ।

तत्र वसिष्ठः—

उपग्रहो लात्तित[१]पातितर्क्षं शुभग्रैर्हेविद्धविदूषितं यत् ।
विरुद्धयोगेषु विरुद्धनाडयो द्युराशयश्च[२]ग्रहजन्मधिष्ण्यम् ॥१॥

या मासदग्धास्तिथयो विलग्नान्यन्धानि शून्यानि च वाधिराणि ।
द्युर्दग्धलग्नानि[३]सपङ्गुकाणज्वालामुखोद्वन्धनमासतिथ्योः ॥२॥

प्रत्यर्कनीहारमहेन्द्रचार्पविद्युल्लताभू भ्रमणाऽभ्रघोषः ।
मरुत्प्रचारः परिवेषकम्प प्रतीन्दुवैवर्ण्यमथेन्वुभान्वोः ॥३॥

द्युवारवारर्क्षजमृत्युघातहालाहलोत्पातमहानलाद्याः ।
एतेल्पदोषाः क्रमशस्तथैषां देशव्यवस्था क्रियते च सम्यक्[४] ॥४॥

उपग्रहर्क्षं कुरुवाल्हिकेषु कलिङ्गवङ्गेषु च पातितं भम् ।
सौराष्ट्रशाल्वेषु च लात्तितं भं देशेषु वर्ज्यं शुभविद्धभं[५]च ॥५॥

निषिद्धयोगद्युनिशासु जाता निसिद्धनाड्यो ग्रहजन्मभं वा, ।
निशासु वारप्रभवा हि दोषा[६]स्त्याज्याः सदा कोंकणसंज्ञदेशे[७] ॥६॥

ये मासदग्धादिशैव दोषा विवर्जनीयाः खलु मध्यदेशे ।
दुःस्वप्नदुर्दर्शनवुर्निमित्तं दुःशाकुनाद्या अपि यत्र तत्र ॥७॥

---

[१] लात्तिभ प्र.अ. । [२]द्युराशयश्च पू. । [३] दुर्ग्रद्धलग्नानि पू. ।
[४]क्रियते स सम्यक् लि.पु. । [५] शुभविद्धलं पू. अ. । [६] वारपभवादि दोषा प. ।[७] कंकण संज्ञदेशे अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रत्यर्कपूर्वादि दशैव दोषास्त्याज्याः सदा मालव गौडयोश्च ।
नानाभिधानास्तिथिवारजाता नक्षत्रवारप्रभवाश्च दोषाः ॥८॥

ते हूणवङ्गाङ्गखसेषु वर्ज्याः शेषेषु देशेषु न ते निषिद्धाः ।
तस्मात्तु तेष्वेवविवर्जितास्ते देशेषु नान्येषु च दोषदाःस्युः ॥९॥

मनुः—

पक्षक्षये दिने रक्ते क्षीणचन्द्रे ऋतुक्षये[१] ।
विषुवे च व्यतीपाते षडशीतिमुखे तथा ॥१०॥

क्षणे संवत्सरस्यान्ते अयनस्य परिक्षये ।
पृष्ठोदये[२] विलग्ने वा नीचस्थानगतेऽपि वा ॥११॥

उल्कापातितनक्षत्रे भूमिकम्पे तथैव च ।
निर्घातो यत्र नक्षत्रे दिग्दाहो यत्र वा पुनः ॥१२॥

आधानजन्मनक्षत्रे कर्मक्षीणे विपत्करे ।
प्रत्यरे चैव नक्षत्रे नैधने तु तथा पुनः ॥१३॥

ग्रहोपसृष्टनक्षत्रे नक्षत्रे ग्रहपिडिते[३] ।
क्रूरयुक्ते च मुक्तं च दूरतः परिवर्जयेत् ॥१४॥

ग्रहयुक्ते भयं वैरं ग्रहाकाङक्षी क्षुधाभयम् ।
ग्रहयुक्ते च नक्षत्रे दारिघ्रमुपजायते ॥१५॥

---

[१] ऋतु त्रये प. [२] पृष्टोदये प. ।
[३] (प्रस्थाने च प्रवेशे च विवाहं च न कारयेत् । ग्रहणे ग्रहसंयुक्ते क्रूरग्रह निरीक्षिते) चापापान्तर्गतः पाठः 'अ' पुस्तके प्रक्षिप्तोऽस्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

यत्र सूर्योपरागे वा नक्षत्रे केतुसंस्थिते ।
षण्मासाभ्यन्तरे चैव तस्य मृत्युं विनिर्दिशेत् ॥१६॥

अथोपग्रहदोषः

सूर्यादिपञ्चकमृक्षं[१] विज्ञेयं विद्युतोमुखम् ।
शूलं चाष्टमकं प्रोक्तं सन्तिपात चतुर्दशम् ॥१७॥

केतुरष्टादशःप्रोक्त उल्का स्यादेकविंशकः ।
कम्पद्वाविंशनक्षत्रं त्रिविंशं[२]वज्रमुच्यते ॥१८॥

निर्घातस्तु चतुर्विंश उक्ता अष्टावुपग्रहाः ।
स्वस्थाने विघ्नदाः प्रोक्ताः सर्वकार्येषु निन्दिताः ॥१९॥

अवमयोगप्रकरणम्

विवाहे प्राणहानिः स्याद् यात्रायां मरणं ध्रुवम् ।
बीजवापे गृहारम्भे धान्यसंग्रहणे तथा ॥२०॥

उपग्रहसमायुक्तमृक्षं तत् परिवर्जयेत् ।
दिव्यान्तरिक्ष भौमाश्च उत्पाता स्त्रिविधाःस्मृताः ॥२१॥

षण्मासान् तदुडुत्याज्यं सप्ताहं च तथोदितः ।
अब्दाः स्युस्त्रिविधा जीवसौरचान्द्राह्वयाः सदा ॥२२॥

तेषामादौ तथा चान्ते त्रिदिनं वर्जयेच्छुभम् ।
महापातो वैधृतिश्च, उपरागसमः सदा ॥२३॥

---

१ सूर्यादिपञ्चममृक्षं प. । २ त्रयोविंश इतिभाव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

तस्मादिनत्रयं त्याज्यं तच्चपूर्वापरं दिनम् ।
उपग्रहमहादोष भूमिकम्पादयश्च ये ॥२४॥

मङ्गलेषु सदा त्याज्याः कालकूटविषोपमाः ।
सूर्यस्थराशिर्ज्वलितो भश्मसंज्ञं तु पृष्ठभम् ॥२५॥

अग्रभं धूमसंज्ञं तु तस्माद् भत्रितयं ज्यजेत् ।
राशित्रये कृतं यत्तच्छुभं सर्वं विनश्यति ॥२६॥

रवौ युक्ते चतुर्भिश्च राशिभिर्विश्वभागकैः१ ।
धूमोऽयं मण्डलाच्छुद्धो व्यतीपातः स एव च ॥२७॥

एष षड् राशिभिर्युक्तः परिवेष इति स्मृतिः२ ।
परि वेषेण हीनाच्च मण्डलाज्जायते धनुः ॥२८॥

चापः सप्तदशैर्भागैर्युक्तोऽयं धूमकेतुकः ।
एकराशियुतः केतुः पूर्वस्फुटरविर्भवेत् ॥२९॥

एवं पञ्चार्करुपाणि गुरुणा कीर्तितानि च ।
शुभकार्येषु वर्ज्यानि मृत्युदानि विशेषतः ॥३०॥

तिथिवारं च नक्षत्रं लग्नं ध्रुवकमिश्रितम् ।
ग्रहसंख्याहरेद्भा ३ गं पञ्चशेषं तु वर्जयेत् ॥३१॥

तद्ध्रुवं पञ्चदशभिर्विभजेद् रोगपञ्चकम् ।
अर्केण विभजेच्छेषमग्निपञ्चकमेव च ॥३२॥

---

१ विश्वभागगैः प्र. । २ स्मृतः क. । ३ नवभिश्च हरेद्भागं ।

CC-0. Nepal Sanskrit Academy, Kathmandu

४० साधारणदोषनिरुपणाऽध्यायः

दशभिर्नृपपञ्चकं तथा नृपसंख्यैरिति१ चौरपञ्चकम् ।
मृत्युर्विदधीत वेधसंख्यया जन्माद्वाहवसेषु२ चिन्तयेत् ॥३३॥

मासप्रधानं किल चैककर्म मुक्त्वाखिलं कर्म नकार्यमत्र ।
यज्ञोपवासव्रततीर्थयात्राविवाहकर्मादि विनाशमेति ॥३४॥

वर्षान्ते वर्जयेत् पक्षं मासान्ते तु दिनत्रयम् ।
घटिकाद्वयमृक्षान्ते ग्रहणाद् दिनसप्तकम् ॥३५॥

सूर्यचन्द्रोपरागौद्वौ महादोषाह्वयावुभौ ।
सप्तरात्रं तयोरुर्ध्वं सर्वशोभननाशनम् ॥३६॥

चन्द्रसूर्योपरागेषु त्र्यहं पूर्वेऽशुभं भवेत् ।
सप्ताहमक्षुभं पश्चात् स्मृतं ग्रहणशूलकम् ॥३७॥

ग्रस्तोदयेऽर्वाक् त्रिदिनं ग्रस्तास्तमये परेऽर्केन्द्वोस्त्रिदिनम् ।
रवेखण्डे च त्रिदिनं निःशेषे सप्तसप्त चोभयत्र ॥३८॥

परिवेषेन्द्रचापे च प्रतिसूर्ये च दुर्दिने ।
रक्ताभ्रमेघनिर्घाते प्रसिद्धद्रुमपातने ॥३९॥

उल्कापाते महापाते महाशनिनिपातने ।
गान्धर्वदेहे दिग्दाहे धूमकेतौ प्रकाशिते ॥४०॥

युद्धे ग्रहाणामन्योऽन्यं तथा चाकालवर्षणे ।
ग्रामोपान्ते शिवाशब्दे दुर्निमित्ते च दुर्विधौ ॥४१॥

---

१ रसचन्द्रैरिति चौरपञ्चकम् । २ जन्मोद्वाह ।

CC-0. Nepal Sanskrit Academy, Kathmandu

नृपो वा नृपमन्त्री वा दैवज्ञो वा महाशयः ।
पुरोहितोऽथवा विद्वान् भिषग् वा वेदपारगः ॥४२॥

यज्वा वा ब्रह्मविद्वापि[३] यतिर्वा ऋषिसत्तमः ।
यत्र देशे मृतिर्ग्रामे[४] सप्ताहं वर्जयेच्छुभम् ॥४३॥

एतस्मिन् दोषसंयोगे द्रव्यविद्यायशः क्षयः ।
शुभकर्म विवर्ज्याः स्युरात्मनः पथ्यमिच्छताम् ॥४४॥

धिष्ण्यं च पापग्रहयुक्त विद्धमुत्पातदोषं विषनाडिकाश्च ।
शुक्रेज्ययोर्वाधकशैशवास्तमेकार्गलाख्यं ग्रहकर्तरीं च ॥४५॥

विष्टिं कुजाहं कुलिकार्धयामं क्रूराष्टमं शीतकराष्टमं च ।
होराष्टमं जन्मगृहाष्टमं च लग्नं च पापग्रहचन्द्रयुक्तम् ॥४६॥

पापांशपापग्रहसंयुतांशं पापप्रवेधांशकपापलग्नम् ।
उत्पातलग्नांशशिहीनलग्नं शुभेषु कार्येषु विवर्जयन्ति ॥४७॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविराजिराते जगन्मोहने अवयोगादि ग्रहणोत्पाताधिकारोनाम चत्वारिंशोध्यायः ॥ ॥

अथ एकचत्वारिंशोऽध्याय

गुणनिरुपण प्रकरणम्

कमलासनः--

अथातः संप्रवक्ष्यामि गुणानां रुपलक्षणम् ।
यानि तच्छोभनाध्याये चोदितानि गुणान्यपि ॥१॥

---

३ ब्रह्मविद्वान् वा लि. पु. । ४ यत्र तेषां मृतिर्ग्रामे ।

CC-0. Nepal Sanskrit Academy, Kathmandu

४१ गुणनिरुपणाऽध्यायः

एवं गुणानां संप्रोक्तं लक्षणं समुदायतः ।
दोष चिन्हानि यत्रास्ति तथापि गुणलक्षणम् ॥२॥

१शुभग्रहोदयमृक्षं शुभषड्वर्ग एव च ।
वेदविज्ञानवाक्यं च महान्तः शुभदा गुणा ॥३॥

शुक्लपक्षः शुभः प्रोक्तः कृष्णपक्षे त्रिधाकृते ।
अन्त्यभागं विनान्यौद्वौ गुणिनौ मध्यमाधमौ ॥४॥

रविकुजयोर्मन्दाख्या भद्राशुक्रशशाङ्कयोः सिद्धा ।
यदि वसेच्चन्द्रसुतो रिक्तायां जीवमन्दयो पूर्णाः ॥५॥

नन्दार्कशुक्रयोः सिद्धाः भद्रा सौम्यशशाङ्कयोः ।
जयाभौमे शनौ रिक्ता गुरौ पूर्णा प्रकीर्तिता ॥६॥

रौद्राग्निचित्रा वारुण्यां नन्दायार्क दिने युता ।
वरयोगा इमे सर्वे चतुर्मुखमुखोदिताः ॥७॥ इति वसिष्ठः

पौष्याप्यानिल सार्पर्क्षा भौमवारेण संयुताः ।
वरयोगा इमे चोक्ता नन्दाया च समायुताः ॥८॥

नन्दाभृगौ सोमसुते च भद्रा कुजेजया सूर्यसुते चरिक्ता ।
पूर्णा गुरौ पञ्चसु सिद्धियोगाः शुभेषु कार्येष्वति सिद्धिदा स्युः ॥९॥

पौष्णोत्तराणि हस्तश्च मूलश्रवण सप्तभे ।
सूर्यवारयुते योगा दोषा हालाहला ह्वयाः ॥१०॥

---

१ शुभग्रहोयं स्वर्क्षं ।

CC-0. Nepal Sanskrit Academy, Kathmandu

श्रवणादित्यवायव्य शक्रमैन्दवभैर्युते ।
सोमवारे महायोगा स्तार्क्षारोषोरगादिकाः ॥११॥

मैत्राश्विन्यर्यमापूषा साहिर्बुध्न्याच रोहिणी ।
भौमवारेण संयुक्ता योगाः स्युर्दोषसंमताः ॥१२॥

विश्वार्यमनिशानाथमैत्रपूर्वत्रयाग्नयः
बुधवारयुता योगा दोष राक्षसराघवाः[1] ॥१३॥

अश्वीपुनर्वसूतिष्यस्वाती चित्रा गुरोर्दिने ।
समायुक्ताः शुभायोगा दोषतूल प्रभञ्जनाः ॥१४॥

भाग्यनैऋति पौष्णाद्य तृतीया[2] भृगुवासरे ।
योगाः शुभफला दोषास्तमसो भास्करः स्वयम् ॥१५॥

गुणनिरूपण प्रकरणम्

कृतिकारोहिणीस्वाति शततारार्किवासरे ।
शुभयोगा महादोषा तएवादित्यवर्चसः ॥१६॥

हस्तान्त्यमूलादितिविष्णुजीवास्तिस्रोत्तराचार्किदिनेन सिद्धाः ।
श्रोणानिलादित्य शशिप्रवेशा सोमस्य वारेण युगास्तु सिद्धाः ॥१७॥

आदित्यतिष्याश्वयुजो मघा च वायुर्गुरोर्वारियुतास्तु सिद्धाः ।
विष्णवर्यमादित्य यमाश्विमूलाः सिद्धिप्रदा वारयुता भृगोश्च ॥१८॥

वाय्वग्निपद्मासनवारूणारव्यायोगाश्च सिद्धा रविजेऽह्नियुक्ताः॥१६॥

---

[1]राक्षसवायवः प्र । [2]द्य त्रितया प्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu

एषु योगेषु सर्वेषु सर्वदोषहरेष्वपि ।
अपहार शुभां कुर्यादित्युवाच पितामहः ॥२०॥

श्रीपतिः--

आदित्यहस्तो गुरुपुष्ययोगौ बुधानुराधा शनिरोहिणी च ।
सोमे च सौम्यो भृगु रेवती च भौमाश्विनी स्यादिति सिद्धियोगाः॥२१॥

ज्वलनपवनचित्रारेवतीवारुणानां फणिहरनिऋतीनामेकमेकंक्रमेण ।
यदिरविकुजयोर्वा यातिनन्दाकदाचित्सभवति वरयोगःसर्वकार्येषुसिद्धः॥२२॥

गुरूः--

वार्हस्पत्यंच सावित्रं नैऋतं सूर्यवारगम् ।
सर्वेषु शुभकार्येषु शुभदाःस्युः शुभप्रदाः ॥२३॥

चित्राश्रवण सौम्याः स्युर्यदि शीतांशुवारगाः ।
इमे वापि सुधायोगाः सर्वशोभनशोभनाः ॥२४॥

भाद्रपदाश्विनीचैव रोहिणी चोत्तरास्त्रयः ।
कुजवारेण संयुक्ता सुधायोगा दिवौकसाम् ॥२५॥

विश्वाग्निमैत्रनक्षत्रं बुधवारसमायुतम् ।
पञ्चमी सप्तमीयुक्ताः सुधायोगाः प्रकीर्तिताः ॥२६॥

पूर्वाषाढा पुनर्वसू रेवतीसहितौ यदि ।
गुरुवारे सुधायोगा स्त्रयोदश्याः समन्विताः ॥२७॥

स्वाती शतभिषग् भाग्याः सहिता यदिनन्दया ।
शुक्रवारे सुधायोगाः सर्वकर्मणि दोषहाः ॥२८॥

CC-0. Nepal Sanskrit Academy, Kathmandu

रोहिणिवसुवायव्याः शनिवार समन्विताः ।
भद्रया सहिता योगाः शुभाख्याः शुभवृद्धिदाः ॥२९॥

कृत्तिकादिचतुस्तारा बुधवारादितः क्रमान् ।
वृद्धि शुभंच सिद्धि च अमृतं च विनिर्दिशेत् ॥३०॥

मूलार्कवारे श्रवणे च चन्द्रे भौमोत्तराभाद्रवुधे च कृत्तिका ।
जीवेऽदितिर्भार्गवपूर्वफल्गुनी स्वात्यर्कपुत्रममृतानियोगाः ॥३१॥

इतिश्रीसारङ्गसाधुववनामृतेन भट्टश्रीलक्ष्मणाचार्य विरचिते जगन्मोहने वारनक्षत्र संभूतामृतसिद्धियोगोनामएकचत्वारिंशोध्यायः॥

अथ द्विचत्वारिंशोऽध्यायः

उक्त्वाखिलं दोषनिरुपणं यं निरूपणं स्वल्प महा गुणानाम् ।
वक्ष्येऽन्यपक्षस्यं विदूषणार्थं स्वपक्षसंस्थापन निर्णयार्थम् ॥१॥

दग्धविष्टिविषयोग भूबला मासशून्यदिनवारदुर्दिनः१ ।
चन्द्रसूर्यपरिवेषरिक्तया सिद्धयोगसहिताः शुभप्रदाः ॥२॥

विष्टि चन्द्राष्टमं दग्धं व्यतिपातं सवैधृतिम् ।
अन्यांश्च वहु दोषांश्च सिद्धयोगाः प्रशाम्यति ॥३॥

एकोऽप्यमृत योगोऽयं सकलं दोष संचयम् ।
विनाशयति घर्मांशावुदिते निमिरं यथा ॥४॥ इतिभृगुः ।

यः सिद्धियोगो विनिहन्ति दोषान् पापेक्षितोपग्रहलत्तपातान् ।
लग्नेषु जामित्रघनप्रचार नीहारविद्युत् परिवेशजांश्च ॥५॥

---

१ कोशेषु दिनशब्दो नपुंसके वर्तते परमत्र स एव पुंलिङ्गात्मकःप्रयुक्तोवर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

दोषानशेषानमृताख्ययोगो निहन्ति लोभो गुणवृन्दमेकः ।
प्रत्यर्क योगर्क्ष तिथीन्द्रचापकुवारपङ्गवन्धभवाश्च यद्वन् ॥६॥

सिद्धातिथिर्हन्ति समस्तदोषान् यान् मासशून्यानपि मासदग्धान् ।
दिनप्रदिग्धानपि काणदोषानेकादशी यद्वदशेष पापम् ॥७॥

गन्तव्यधिष्ण्यं खलु मुक्तभं यत् क्रूरैर्महोत्पात विदूषितं यत् ।
चन्द्रोपभोगादमलं तदानीं शुभेषु कार्येषु शुभप्रदं२ च ॥८॥

करणभगणदोषं वारयोगादिदोषं विषमदिवसदोषं शूलमुल्कादिदोषम् ।
रविकुजबुधदोषं शुक्रवारादिदोषं हरति सकलदोषं रोहिणी युक्त चन्द्रः॥९॥

राहुदोषं बुधोहन्यादुभयोस्तु शनैश्चरः ।
त्रयाणां भूमिपुत्रश्च चतुर्णांतुभृगोः सुतः ॥१०॥

पञ्चानां देवमन्त्री च षण्णां दोषं तु चन्द्रमा ।
सप्त दोषं रविर्हन्यात् विशेषा दुत्तरायणे ॥११॥

न ग्रहो न च नक्षत्रं न तिथि र्न च चन्द्रमा ।
सर्वमेव शुभंकार्यं रवावेकादशस्थिते ॥१२॥

दिवा सूर्ये निशाचन्द्रे लग्नस्यैकादशे स्थिते ।
कोटिदोषा विनश्यन्ति गर्गस्य वचनं यथा ॥१३॥

यथाह वसिष्ठः—

मित्राधिमित्रस्वगृहोच्चमूलत्रिकोणवर्गोत्तमगग्रहोत्थाः ।
तदंशकेन्द्रोपचयत्रिकोण महादशाधीशबलाथिकोत्थाः ॥१४॥

---

२ शुभ प्रदश्च लि.पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

लग्नांशकाधीश शुभावलोक संयोगतद्वर्गभतद्ग्रहोत्थः ।
ये सिद्धियोगामृतसिद्धियोगतिथिप्रजाताश्चमहागुणाःस्युः ॥१५॥

येऽन्येच सामान्यगुणाः सदैव स्वभाव संसिद्धगुणप्रदास्ते ।
किं चाल्पदोषानपि लग्नजातान् हन्तुं नशक्ताश्च कदाचिदेव ॥१६॥

मित्रर्क्षगो मित्रनवांशगो वा शुभग्रहस्तेन निरीक्षितो वा ।
यदा विलग्नोपगतः सखेट श्चेत्थंत्रिदोशानपि लग्नजातम् ॥१७॥

शुभोऽधिमित्रर्क्षगतस्तदंशसंस्थोऽपि वा तेन निरीक्षितो वा
स लग्नगो दोषचयं निहन्ति रामो यथा रावण दैत्यबृन्दम् ॥१८॥

स्वक्षेत्रगः स्वस्य नवांशगो वा शुभग्रह सौम्य निरीक्षितो वा
स लग्नो यत्र निहन्ति दोषान् पञ्चाननो यद्वदिभेन्द्र वृन्दान् ॥१९॥

उच्चस्थितः स्वोच्च नवांसगो वा शुभस्वमित्रेण निरीक्षितो वा
स केन्द्रगो यत्र निहन्ति दोषान् हरिस्मृतिर्यद्वदशेषपापम् ॥२०॥

मूलत्रिकोणर्क्षगतस्तदंशसंस्थः शुभो वा ऽ प्यधिमित्रदृष्टः ।
सुलग्नगो यत्र निहन्ति दोषान् पापं यथा चन्द्रधरः [१] प्रणाम ॥२१॥

वर्गोत्तमस्थ शुभखेचरसंयुतं वा लग्नं च तेन खचरेण निरीक्षितं यत् ।
तत्सर्वदोष निचयं विनिहन्ति सद्यस्तार्क्षः समस्तमहिसंघमिवप्रतापात् ॥२२॥

लग्नं स्वनाथ शुभमित्रनवांशगं चेतस्याधिमित्रशुभखेट नवांशगं वा
तत्तुङ्गसंज्ञितनवांशकं यदा वा हन्तीवदोषनिचयं [२] कुलिशंनगौघम् ॥२३॥

१चन्द्रधनेप्रणामः क । २ दोषनिकरम् प्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu

४२ स्ववर्गक्षसंस्थापनाऽध्यायः

लग्नेश सौम्यखचरोऽस्तगृहंविहाय केन्द्रस्थितोदयगतोऽखिलदोषवृन्दम् ।
एकोऽपिहन्त्युपचयोपगतास्त्रिकोणसंस्थोऽपियद्वदनिलोऽभ्रचयं
समस्तम् ॥२४॥

पापो विलग्नाधिपतिस्त्रिषष्ठ लाभस्थित स्थानवलाधिकश्च ।
लग्नोत्थदोषानखिलान् निहन्ति पापानि यद्वत् परमाक्षरज्ञः ॥२५॥

त्यक्त्वाऽस्तकेन्द्रस्थित सौम्यखेटस्त्रिकोणगो वा प्युतलाभ संस्थः ।
दोषानबेशानुदयांशजातान् निहन्ति यद्वत् तिमिर दिनेशः ॥२६॥

वलाधिकः सौम्यनभश्चरो यः कुटुम्बसंस्थोऽपि निहन्ति दोषम् ।
लग्नोद्भूवं विष्णुपदाब्जतोयं यथाऽघसंघं शुभवर्ग गोऽपि ॥२७॥

एकार्गलोपग्रह पातलत्तजामित्रकर्तर्युदयादिदोषा ।
नश्यन्ति चन्द्रार्क वलोपपन्ने लग्नेयथार्काम्युदयेऽपि दोषाः ॥२८॥

ये लग्नदोषाः कुनवांशदोषाः पापग्रहदृष्टि निपात दोषा[१] : ।
लग्नेगुरूस्तान् विमलीकरोति फलं यथाम्भ कतकद्रुमस्य ॥२९॥

गुरुः—गुरूः सर्वगुणोपेतो लग्नकेन्द्रस्ववर्गगः ।
दोषाणां लक्षहन्ता स्याल्लग्नगः सर्वदोषहा ॥३०॥

सितः सर्वबली केन्द्रत्रिकोणस्थः स्ववगगः ।
गुणोऽयं शुभकार्येषु दोषपञ्चसहस्रहा ॥३१॥

सर्वैं र्बलैर्युतश्चान्द्रि स्ववर्गे पापवर्जितः ।
लग्नकेन्द्रत्रिकोणस्थो दोषान् पञ्चशतं हरेत् ॥३२॥

---

१ ग्रहैर्दृष्टि निपातद्दोषाः अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

सत्क्रियाबलयुतः शुभेक्षित शोभनांश शुभभागगः शशी
जन्मधिष्ण्यविपदादि पापयुक्त्यप्रकाशयमकण्टकादिह ॥३३॥

तिथेर्वारस्ततस्तारा [1] सर्वेभ्योऽप्युदयोबली ।
गुरुः सितो वा लग्नस्थः प्रबलः सर्वदोषहा ॥३४॥

गुरुरखिल बलाढयः केन्द्रगोहन्तिलक्षं,
भृगुसुतशशिजौ चेत्तादृशौ चेत्तदर्धम् ।
निखिल मपिच दोषं हन्ति केन्द्रोबलीया–
ननुगुणगृहसंस्थः साधुकर्मानुतिष्ठन् ॥३५॥

लग्नं दोषशतेन दूषितमहो [2] चन्द्रात्मजो लग्नगः
शुक्रो वा विमलीकरोति रुचिरं यद्यर्कविम्बाच्युतः ।
जीवस्तद्द्विगुणं सुनिर्मलवपुर्लग्नस्थित शान्तये
दोषाणां शतलक्षमाप्यपहरेल्लग्नस्थितो वाक्पतिः ॥३६॥

विष्टिर्व्यतिपात महेन्द्र चापदिग्दाहधूमग्रहणादिदोषान् ।
तदागुरुः केन्द्रगतो यदि स्यान्मातङ्गयूथान् मृगराड् तथैव ॥३७॥

ये लग्नदोषा कुनवांशदोषाः पापग्रहोत्पन्न समस्थदोषा [3] ।
लग्ने गुरुस्तान् विमलीकरोति त्रिनेत्र भालोद्भव वन्हिनेवं [4] ॥३८॥

सर्वानिमानतिबलस्फुरदंशुमाली लग्नस्थित प्रशमयेत् सुरराजमन्त्री ।
एको बहूनि दुरितानि सुदुस्तराणि भक्त्याप्रयुक्त इव शूल धरे प्रणाम३९॥

१तिर्थवारस्ततो ऋक्षं लि. पु. । २ भूषितमहो । ३ पापग्रहैश्चोत्थ समस्तदोषाः लि. पु. । ४ त्रिनेत्रभालाम्बकवन्हिनेव लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

बृहस्पतिः—यदापि लग्नांसगतोऽपि जीव शिरस्युरोजांशगता बलाढ्याः ।
तदा लयंयान्ति बलाढ्यदोषा यथागजौघा हरि सन्नि धाने ।।४०।।

शशांकयुक्तांशगतोऽपि वा यदा गुरुज्ञशुक्राः स्युरयुग्मभागगाः ।
तदामहादोषगणा[१] प्रयान्ति नाशं यथा व्रह्म विदर्थसंघान् ।।४१।।

वसिष्ठः— जपहोमैस्तथा दानैर्देवतानां च पूजनैः[२] ।
नश्यन्ति दोषाः सकला कर्म चास्य समृध्यति ।।४२।।

कर्मारम्भे पुण्डरीकाक्षमाद्यं श्रियः पतिं शंखगदाब्जपाणिम् ।
यो बन्दते तस्य न सन्ति दोषाः शुभोत्तरं कर्म च तस्य तत्स्यात् ।४३।

ये नमस्यन्ति कर्मादौ सर्वदोषहरं हरिम् ।
वरदं शिवमीशानं सर्वं कर्म समृध्यति ।।४४।।

कर्मादौ यो नमेत्सूर्यं सवितारं जगद्गुरुम् ।
सर्वदेवमयं तस्य निर्दोषं कर्म तद्भवेत् ।।४५।।

परिवेषभङ्गमाह बृहस्पतिः—

वृषस्थे वाऽथ केन्द्रस्थे चन्द्रे चोपचयेऽपि वा ।
परिवेषभवं दोषं नास्तीति श्रुति चोदितम् ।।४६।।

राश्यादिदोषभङ्गः

यद्राशिसंज्ञांशक इन्दुरेकः केन्द्रेषु सौम्या वलिनः स्थिताश्च ।
ते रश्मियुक्ता वहुदोषसंघान् हन्युर्यथा सोऽपि विषं सघोरम् ।।४७।।

---

१ दोषगुण लि. पु. । २ देवता पूजनैस्तथा पू.

CC-0. Nepal Sanskrit Academy, Kathmandu

सौम्याश्च तुङ्गांशगता विलग्ना[1] लग्नांशसंज्ञा अथ राशिगा वा ।
पश्यन्तिचेत्तत्र समस्तदोषा नश्यन्त्यनङ्गस्तु यथा हरेण ॥४८॥

लग्नांशराशेर्नवपञ्चभर्क्षं नवांशकाज्जीवसितेन्दुजाः स्युः ।
यदातदा दोषगुणाः प्रयान्ति नाना———————सुरौघम् ॥४९॥

यदा शशांकाद् गुरुराहितार्चिः केन्द्र त्रिकोणेषु समस्तवीर्यः ।
तथा ययुर्नाशमुदग्रवीर्या दोषायथा हालहलो हरेण ॥५०॥

सितज्ञजीवा बलिनत्रिकोणे लग्नांशकेन्द्रेषुगता सदीप्ताः ।
प्रयान्ति दोषा लयमग्रजन्मा यथैकदा वा श्रुति विक्रयेण ॥५१॥

विदुर्यदा पूर्णतनुः शशांक सुकर्मकृज्जीव सितज्ञवीक्षितः ।
तदा गतो दोषमुपेत्य भावतो यथा गजौघा हरिसन्निधाने ॥५२॥

यदा शशांकोपचये त्रिकोणभे शुभग्रहः सौम्यनिरीक्षितो बली ।
तदा गुणैर्दोषगणो विनश्येत् यथा महादानगुणस्य वह्वये[2] ॥५३॥

यथा गजं वाधिकतः शशांको वली चभद्रासनमेव वा तदा ।
विनाशयेद् दोषगणान् रुजांश तथा गणं वा पुरुषस्य पौरुषम् ॥५४॥

शुभांशे शुभकेन्द्रस्थे शुभकेन्द्रे शुभेक्षिते ।
लग्नादुपचये चन्द्रे यमकण्टक नाशनम् ॥५५॥

लग्नाधिपो यदा केन्द्रे लग्नादुपचयेऽथवा ।
शुभोवा प्यशुभो वापि तदा दोषालयं ययुः ॥५६॥

---

१ विलग्नलग्नांशसंस्था निजराशिगा वा. पा. । २ कत्थनः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

त्रिकोणे कण्टके वापि शुभस्तिष्ठेद् बलान्वितः ।
यमकण्टकदोषोऽपि नात्र स्याच्चन्द्रलग्नयोः ॥५७॥

शुभकर्मगते चन्द्रे शुभांशे शुभवीक्षिते ।
यमकण्टक संभूतो दोषो नैवात्र विद्यते ॥५८॥

इति यमकण्टक दोषभङ्गः ।

शुभग्रहयुते वारे शुभे केन्द्रे त्रिकोणगे ।
कुलिकोदय दोषोऽत्र नास्तीति श्रुति चोदितः ॥५९॥

शुभनवांशकसंयुतशीतगुविषघटीरहितः[1] शुभनेत्रगः ।
शुभकृदंशकराशिचतुष्टये सकलदोषहरः शुभवर्धनः ॥६०॥

गुरुरवीन्दुनवांशकराशिगः शुभविलग्नचतुष्टयगो यदि ।
नवमपञ्चमराशिगतोऽथवा सकलदोषहरः शुभवर्धनः ॥६१॥

ग्रहाः सर्वेलग्नादशुभ सहिता— — — —
स्वतुङ्गे भास्वर्क्षे यदि समपुरुत्कृष्टबलिनः ।
तदा तेनैवास्मिन् कथितमखिलं दद्युरशुभं—
भवेद् यत्नै प्रोक्तं शुभमतितरां दद्युरखिलाः ॥६२॥

मासशून्याह्वयास्तारा राशयो वा विषाह्वयाः ।
स्वामिजीवबुधैर्दृष्टा युक्तावा नैन दोषदाः ॥६३॥

दग्धमृत्युसमख्याश्च होरास्वामिदृशा युता ।
बलवद्गुरु दृष्टा वा युता नैवास्य दोषदाः ॥६४॥

---

१ विषघटीवसिनः प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

केन्द्रत्रिकोणयोः सौम्यो बलवांश्च स्ववर्गगः ।
मासशून्यकृतं दोषं राशिशून्यांश्च नाशयेत् ॥६५॥

अर्के स्ववर्गे तुङ्गस्थे शुभग्रह निरीक्षिते ।
भूमि कम्पादयो दोषा भङ्गमायान्ति तत्क्षणात् ॥६६॥

शुभयोगेचार्कवारे नक्षत्रसहितेऽथ वा ।
योगा धूमादयः पञ्च भङ्गमायान्ति दोषदाः ॥६७॥

भास्कराङ्गारकौ स्वोच्चस्ववर्गस्थौ शुभेक्षितौ ।
कण्टकस्थूणनामानि दोषा गच्छन्ति भङ्गताम् ॥६८॥

शुभकर्मगतश्चन्द्रो बलवान् शुभवीक्षितः ।
विपत्प्रत्यरिनैधनत्रिजन्मर्क्षोत्थदोषहा ॥६९॥

इति विपत्प्रत्यरिनैधनादि तारादोषभङ्गः ।

अथ वैनाशिकदोषभङ्गः ।

जन्मकर्मर्क्षनाथौद्वौ मिथो मित्रे यदा तदा ।
वैनाशकांशकोद्भूतदोषभङ्गं ययुस्तदा ॥७०॥

यस्य सर्वग्रहा सन्ति दुःस्थाने गोचरे तदा ।
दोषापवादा नश्यन्ति ग्रहैः कतिपयैस्तथा ॥७१॥

इति कथितमुदारैः कालदोषापवादैः श्रुतिभिरतिसमग्रै कालदोष क्रियासु ।
त्रिविधगदितशास्त्रोपासनेनेव भीतैः सकलवल गुणज्ञैर्दोषना–शाढ्ययोगैः ॥७२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

४२ स्वपक्ष संस्थापनाऽध्याय

वसिष्ठः—

प्रवला अपि दोषास्ते सीदन्तेव कलौयुगे ।
पापरूपा यथादोषा पुण्यरूपाः सदा गुणाः ॥७३॥

एकं मृगं मृगी सूते पञ्चसूते वृकाद् वृकी ।
अन्तारो विलयं यान्ति नाट्यमाना यथा तथा ॥७४॥

आलस्योपहतः पादः पादः पाषण्डमाश्रितः ।
राजानां सेवते पादः पादः कृषिमुपाश्रित ॥७५॥

एकपादं त्रयः पादाः भक्षयन्ति दिने दिने ।
तथापि वर्धने पादः क्षोणं याति पदत्रयम् ॥७६॥

यथा दैत्या हतादेवैस्तथा दोषा हतागुणैः ।
विविधैर्योगजैः सौम्यरवेटजैर्लग्नवर्गजैः ॥७७॥

निर्दिशेन्नामतो यत्र काम् दोषमयं गुणः ।
तत्रैव हन्ति नान्यत्र प्रशंसा परमस्य च ॥७८॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्य विरचिते जगन्मोहने स्वपक्षसंस्थापनं नाम द्विचत्वारिंशोऽध्यायः ।

वसिष्ठ :—

दस्रेन्दुभुजङ्गभास्करमित्रोत्तराषाढजलभधिष्ण्येषु ।
क्रमशो रविवारादिस्त्वानन्दाद्यास्त्वमी योगः । ॥१॥

आनन्दःकालदण्डाख्यो धूम्राख्यौ[1]’थ प्रजापतिः सौम्यः ।
ध्वाङक्षध्वज विजयाह्वय वज्राभिधच्छत्राः ॥२॥

---

१ धूमाख्यो अ. क. च. प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

मित्रं मानससंज्ञः पाद्माख्यो लम्बकस्तथोत्पातः ।
मृत्युः काणः सिद्धिः शुभामृऽतमुशलगदाख्याश्च ॥३॥

मातङ्गराक्षसाह्वयकरस्थिरप्रवर्द्धमानसंज्ञाः स्युः ।
अष्टाविंशति संख्या निजसंज्ञासदृशफददाः स्युः ॥४॥

वसिष्ठ – गर्ग – पराशराऽत्रि – भृगु – मनु – च्यवनादयो मुनीश्वराः गुणदोषापवादानाहुः ।

नन्दास्वम्बुपचित्राग्निरौद्रविष्णुभत्र्युत्तराः[१] ।
वरयोगा भवन्त्येते शुभकार्ये शुभप्रदाः ॥५॥

वरयोगागुणं हन्ति योगश्चोत्पातसंज्ञकः ।
अपि सर्वगुणोपेतमाधिः कायं यथा तथा ॥६॥

अयं गुणो दोषममुं निहन्तीत्यक्त्वा हि यत्रोभयनाम पूर्वम् ।
गुणः स एवान्य गुणो[२] नशक्तो दोषोऽपि तद्वद्गुणहन्तृकः सः ॥७॥

द्विदैव जलवस्वन्त्य ब्रह्मेज्यार्यमतारकाः ।
उत्पानयोगा विज्ञेया भानुवारादिषु क्रमात् ॥८॥

उत्पातयोगजं दोषं वरयोगो निहन्ति वै ।
मत्तेभेन्द्रचयं यद्वत् पञ्चवक्त्रो[३] महाबलः ॥९॥

भद्रास्वदितिमैत्रेज्य कमलासनतारकाः ।
श्रेष्ठयोगा भवन्त्येते सर्वदा मङ्गलप्रदाः ॥१०॥

---

१ विष्णुत्रि उत्तरा लि. पु. । २ दोष स एवास्यगुणो अ. क. च. प. । दोषः स एवान्यगुणो प्र. । ३ पञ्चावक्त्रः–पञ्चाननः सिंहः

CC-0. Nepal Sanskrit Academy, Kathmandu

श्रेष्ठयोगं तथाहन्ति मृत्युयोगो महाबलः ।
शश्वत्संपूर्ण गुणिनं सर्पस्तं–मूषिकं यथा ॥११॥

मैत्रविश्वाम्बु पाज्येन्दु सार्पसूर्याख्यतारकाः ।
मृत्युयोगा मृत्युकराः सूर्यवारादिषु क्रमात् ॥१२॥

निहन्ति मृत्युयोगं तं शुभयोगो[१] महाबलः ।
यथान्धकारं निविडं भास्करस्योदये तथा ॥१३॥

जयासु वसुसोमार्क दस्रान्तेज्यभत्र्युत्तराः ।
शुभयोगास्त्वमी नृणां मङ्गले मङ्गलप्रदाः ॥१४॥

शुभयोगं निहन्त्याशु त्वन्धयोगो महाबलः ।
यथा कृष्णमृगं साधुं शार्दूलस्त्वति गर्वितः ॥१५॥

ब्रह्मेज्यार्यमवैशाखहरिवस्वन्त्यभेषुच ।
नन्दायामर्क वारादिष्वन्धयोगाःप्रकिर्तिताः ॥१६॥

अन्धयोगकृतं दोषं हन्ति कल्याणयोगक[२]ः ।
यथा हरिकथालापं[३] पापं जन्मशतोद्‌भवम् ॥१७॥

रिक्ताश्विज्य द्विदैवेन्द्रसार्पवायव्य तारकाः ।
यथा कल्याणयोगास्तु सर्वकार्येष शोभनाः ॥१८॥

हन्ति कल्याणयोगाख्यं कालयोगो महाबलः ।
प्रभञ्जनो महातुलराशि पटुतरस्तथा ॥१९॥

---

१ श्रेष्ठयोगो लि. पु. । २ शुभयोगो निहन्ति वं लि. पु. ।
३ यदा हरिकथालापान् अ.क.च.प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

रूद्रसार्पाम्बुनैर्ऋत्य पितृभाग्योऽग्निभेषुच।
भद्रातिथौ कालयोगाः सूर्यवारादिषु क्रमात् ॥२०॥

कालयोगकृतं दोषं वर्धमा[1]नो निहन्ति सः ।
योगश्च शार्दूलइव सर्वदा मृगसंहतिम् ॥२१॥

पूर्णासु पुष्यपौष्णाद्य वसुवारीशतारकाः ।
वर्धमानाह्वयो योगः शुभकार्य प्रवृद्धिदः ॥२२॥

वर्धमानाह्वयो योगं पङ्गुयोगो निहन्ति वै ।
अनेकगुणसंपन्नमन्नं विषलवो यथा ॥२३॥

द्विदैवरौद्रमूलेन्द्रवारि विश्वपित्रुडुषु ।
जयासु पङ्गुयोगाः स्युरर्कवारादिषु क्रमात् ॥२४॥

पङ्गुयोगं निहन्त्यासु सौम्ययोगो महाबली[2] ।
काकानां संहतिं यद्वत् तद्वत् श्येनो महाबलः ॥२५॥

उत्तरात्रयपौष्णेज्यमूलार्क हरितारकाः ।
चित्रेन्द्र त्रितयः सौम्या[3]योगाः स्युर्भानुवासरे ॥२६॥

सौम्ययोगं[4] निहन्त्येव वधिरो योग एष वै[5] ।
वृकोऽजसमितिं यद्वत् तद्वदेवा चिराद् भृशम् ॥२७॥

---

१ हन्ति कल्याण संज्ञकः लि. पु. ।
२ योगो वै. वर्धमानकः लि. पु. । ३ सौधा लि. पु. ।
४ सुधायोगं लि. पु. । ५ योगश्चञ्चलः इति भाव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अजपात्पितृवह्नीशत्वष्टृ मित्रवसूडुषु ।
रिक्तासु वधिरो योगः सूर्यवारादिषु क्रमात् ॥२८॥

एते स्युः षड्विधा योगा स्वनामफलदा यतः ।
उद्वाहादिषु कार्येषु मङ्गलेष्वतिनिन्दिताः ॥२९॥

सुधायोगो निहन्त्याशु योगं वधिर संज्ञितम् ।
भौजङ्ग संहति यद्वद् वैनतेयो महाबलः ॥३०॥

सोमवारेऽदितिमरुद्वैष्णवत्रय तारकाः ।
रोहिणी द्वयशाक्रेऽप्या महायोगाः प्रकीर्तिताः ॥३१॥

बलिनं गुणसंपन्नं महायोनिं निहन्ति हि ।
दधियोगो यथा मेहः शरीरमचिराद् भृशम् ॥३२॥

द्वादश्यैकादशीनाग गौरीस्कन्दवसुष्वपि ।
नवम्यां दग्धयोगाख्य भानुवारादितः क्रमात् ॥३३॥

दग्धयोगं निहन्त्याशु महायोगो महाबलः ।
पञ्चाक्षरी यथा पापं कोटीजन्मकृतं चयत् ॥३४॥

उत्तरात्रयमैत्रेज्यदस्रान्त्येन्द्वग्नितारकाः ।
भौमवारेण संयुक्ताः पूर्णयोगाः प्रकीर्त्तिताः ॥३५॥

ग्रहजन्मभयोगो यः पूर्णयोगं निहन्ति हि ।
यथा गोसमितिं याघ्रश्चोद्धतो बलसंयुतः ॥३६॥

भरणीचित्रविश्वाख्यवस्वर्यमनगादिषु ।
पौष्णभेष्वर्कवारादिष्वर्कादिग्रहजन्मभम् ॥३७॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अस्मिन् योगद्वये यत्तत्कृतं कर्म विनश्यति ।
तस्माद् योगद्वयं त्याज्यं मङ्गलेषु च सर्वदा ॥३८॥

ग्रहजन्मकृतं[1] दोषंचूर्णयोगो निहन्ति वै ।
महादावानलो यद्वद्विपिनं विस्मृतं भृशम् ॥३९॥

बुधवारे सुरेज्येन्दु धातृवह्नित्रिरूत्तराः
हस्तत्रयानलास्ताराः शङ्ख्योगाः प्रकीर्तिताः ॥४०॥

अचिकित्स गदायोगाः[2] शङ्ख्योगं निहन्ति वै ।
यथा काकः पुरोडाशं तथैवातमशोभनम् ॥४१॥

कुजार्क्योः सप्तमी षष्ठी चन्द्रे भानौ चतुर्थिका ।
द्वितीया ज्ञेऽष्टमी जीवे नवमी शुक्रवासरे ॥४२॥

अचिकित्स गदायोगा मङ्गलेष्वतिनिन्दिताः ।
भगन्दराश्मरीकुष्टक्षयरोग प्रदायकः ॥४३॥

गदायोगं निहन्त्याशु योगाश्चामृतसंज्ञकः[3] ।
आखूनां संहतिं यद्वन्मार्जारोऽमितविक्रमः ॥४४॥

गुरुवारेऽदितीज्यार्कत्रयमित्रान्त्यतारकाः ।
श्रवणत्रयमित्येते योगाश्चामृतसंज्ञकाः ॥४५॥

---

१ ग्रहयोगकृतं प्र. । २ अचिकित्सकदा लि. पु. ।
३ शङ्ख्योगो महावल लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ग्रहैः कृ[1]तं मृत्युयोगं निहन्त्यमृतसंज्ञितम् ।
योगान् महागुणानन्यान् पावको विपिनं यथा ॥४६॥

लग्नात् षष्ठाष्टसंस्थे शशिनि सुरगुरौ चापि मन्दे सुतस्थे
भौमे रन्ध्रास्थितेर्के व्ययभवनगते मृत्युगे चन्द्रसूनौ ।
द्यूनस्थे दैत्यपूज्ये सति निखिलनृणां मृत्युयोगा भवन्ति
त्याज्या दावाग्निरूपाः सततमवितथं मृत्युदा मङ्गलेषु ॥४७॥

ग्रहैः कृतं मृत्युयोगं योगश्चामृतसंज्ञकः ।
संजीवनो[2] गारुडाख्यो हन्तियद्वद् विषोल्बणम् ॥४८॥

रेवतीद्वयहस्तेन्दुधातृमित्रत्रिउत्तराः ।
शुक्रवारेण संयुक्ताः पद्मयोगाः प्रकीर्तिताः ॥४९॥

अग्निजिह्वाह्वयो योग पद्मयोगं च सद्गुणान् ।
अन्यान्हन्त्यचिरादेव नकुलः पन्नगं यथा ॥५०॥

रोहिणीद्वयपुष्पेन्द्रविष्णुत्रयमघोत्तराः ।
शनिवारेण संयुक्ता योगाश्चानन्दसंज्ञका; ॥५१॥

विषयोगो निहन्त्याशु योगं त्वानन्दसंक्षकम् ।
लग्नोद्भवान् गुणानन्यान् व्याघ्रः कृष्णमृगं यथा ॥५२॥

---

[1] सप्त षष्ठ्यादितिथयः सोमवारादिभिर्युताः ।
अग्निजिह्वाः सप्त योगा मङ्गले कुलनाशकाः ॥
अग्निजिह्वाह्वयं योगं निहन्त्यानन्दसंज्ञकः ।
[2] सजीवको प्र. । [3] योगस्त्वानन्दसंज्ञकः लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

भानुवारादिभिर्युक्ताः षष्ट्यादितिथयस्तथा ।
विषयोगास्त्वमी सप्त कालकूटविषोपमाः ॥५३॥

एकादशीव्रतं यद्वत् पापं जन्मशतोद्भवम ॥५४॥

हस्तेन्दुदस्त्रमित्रेज्यपौष्णपद्मजतारकाः ।
आदित्यादिषु वारेषु सिद्धयोगाः प्रकीर्तिताः ॥५५॥

महाशूलाह्वयोदोषः सिद्धयोगं निहन्ति हि ।
कुक्कुरो बलसम्पन्नः शशकं बलिनं यथा ॥५६॥

प्रतिपद्बुधवारे तु सूर्यवारे तु सप्तमी ।
महाशूलाह्वयौ योगौ वर्ज्जनीयौ शुभे सदा ॥५७॥

भान्तरालकृतं दोषं[1] सिद्धयोगो निहन्ति वै ।
जीमूतसञ्चयं यद्वदखिलं चोत्थितं भृशम् ॥५८॥

योगान्तरालकं दोषं[2] हन्ति सिद्धा तिथिः स्वयम् ।
भागीरथीजलं यद्वत् पापं[3] जन्मशतोद्भवम् ॥५९॥

मासान्तत्रिदिनं दोषं न नष्टो गुणकोटिभिः ।
वर्षान्तपक्षदोषोऽपि तद्वदेव न सीदति ॥६०॥

उपप्लवर्क्षजो दोषश्चोत्पातर्क्षाच्च संभवः ।
पापविद्धर्क्षजोत्पातसंख्यभादोषसंचयः ॥६१॥

---

१ भान्तरालकृतं दोषं = नक्षत्र गण्डान्तदोषं ।
२ योगान्तरालकं दोषम् = योगगण्डान्तदोषं । ३ अघं प्र.क.च. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

एते दोषाश्च चत्वारो महाबलपराक्रमाः ।
सर्वदा नैव सीदन्ति गुणानां कोटिकोटिभिः ॥६२॥

महाकूलाह्वयं दोयं हन्तिपीयूषसंज्ञकः[1] ।
कृष्णाष्टमीव्रतं यद्वत्पापं जन्मशतोद्भवम् ॥६३॥

मूलहर्युत्तराभाद्रकृत्तिकादित्रयः क्रमात् ।
भाग्यानिलाख्यापीयूषयोगो वारेष्विनादिषु ॥६४॥

यथापीयूषयोगाख्यं दुष्टयोगो महाबलः ।
दावाग्निर्विपिनं सर्वं नानातरुविमंडितम् ॥६५॥

त्रिपूर्वाविह्नि[2] रौद्राहि याम्यपौरन्दरोडुषु ।
पापवारेषु युक्तेषु दुष्टयोगाः प्रकीर्तिताः ॥६६॥

दुष्टयोगं निहन्त्याशु योगः कपिलसंज्ञकः[3]।
सुदर्शनं यथा चक्रं करोति दनुजक्षयम् ॥६७॥

स्वतुङ्गस्वांशगोजीवो यदिलग्नसमन्वितः ।
बलवान् वीक्षयेद्वाऽपि योगः कपिलसंज्ञकः ॥६८॥

कपिलाख्यं महायोगं बलिनं दोषकम्पनम् ।
हन्त्येव शकटो योगस्त्वनृतं सुकृतं यथा ॥६९॥

जीवस्थानात्तु शीतांशुर्निधनान्त्यरिसस्थितः ।
योगोऽयं शकटो नाम शोभने निधनप्रद । ॥७०॥

---

१ सिद्धयोगो निहन्ति. वै लि.पु. ।
२ तिस्रः पूर्वाऽग्नि लि.पु. । पीयूष संज्ञकः लि.पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

शकटाख्यं महायोगं समुद्रो नाम योगराट् ।
हन्ति मत्स्यध्वजं यद्वद् भवनेत्रोद्भवोऽनलः ॥७१॥

परमोच्चगतो जीवो वीक्षेतां वा धिलग्नगः ।
समुद्रयोगो विज्ञेयो योगण्डबलसंयुतः ॥७२॥

अशनिर्नामियोगो यः सामुद्रं योगवल्लभम् ।
राघवाग्निशरं यद्वदुदधेः शंवरं यथा ॥७३॥

यमसैत्रादिभिर्भाजपाददत्वाट्टविष्णुषु ।
सत्स्वर्कादिषु वारेषु मृत्युदस्त्वशनिः शुभे ॥७४॥

ग्रहोत्पन्नो वापीयोगो योगं चाशनिसंज्ञकम् ।
हन्ति यद्वत् महावायुर्वारिवाहचयं महत् ॥७५॥

लग्नमालोकयेज्जीवस्त्वथवा लग्नगो बली ।
वापीयोगः स विज्ञेयस्त्वधिमित्रगृहस्थितः ॥७६॥

महाकुलिकदोषश्च वापीयोगं निहन्ति हि ।
अन्यान् महागुणान् वापी पावकस्त्विंधनं यथा ॥७७॥

दिवसस्याष्टभागेन वारेशाद्याः क्रमाद्ग्रहाः ।
शन्यंशःकुलिको दोषो वारेशः पुनरष्टमः ॥७८॥

महाकुलिकदोषस्तु वापीयोगं निहन्ति वै ।
सर्पाणां संहतिं यद्वन्महानकुलसंहतिः ॥७९॥

वीक्षेतां संयुतो वापी लग्नं देवेन्द्रवन्दितः ।
स्वधिमित्रभभागस्थःस योगो मुशलाह्वयः ॥८०॥

CC-0. Nepal Sanskrit Academy, Kathmandu

हन्ति योगं मुशलाख्यं योगो हालाहलाह्वयः ।
लग्नोद्भवात् गुगानन्यान् कितवोष्टापदं यथा ॥८१॥

अर्कवारेऽग्निपञ्चम्यो सोमे चित्राद्वितीययोः ।
कुजे पूर्णेन्दुरोहिण्योः सप्तमीभाग्ययोर्बुधे ॥८२॥

गुरौ मित्रत्रयोदश्योः षष्ठीश्रवणयोः सिते ।
पौष्णाष्टम्योःशनावेते योगा हालाहलाह्वयाः ॥८३॥

एषु योगेषु कर्तव्यं शत्रूच्चाटन मारणम् ।
विवाहादिषु कार्येषु नियतं निधनप्रदाः ॥८४॥

हालाहलाह्वयं योगं विद्युद्योगो महाबलः
हन्ति यद्वत् पापराशि शिवरात्रिव्रतं शुभम् ॥८५॥

मित्रराशिगतो जीवो वीक्षतां वा विलग्नगः ।
वियद्योगः स विज्ञेयः कमलासनचोदितः ॥८६॥

नक्षत्रलुञ्छितो योगः खयोगं हन्ति सर्वदा ।
अन्यान् हन्ति गुणानथ्यान् स्वैरिणी स्वकुलं यथा ॥८७॥

प्रतिपद्यम्बुनक्षत्रे पञ्चम्यां वह्निभे सति ।
अष्टम्यामजपाधिष्ण्ये दशम्यां ब्रह्मभे यदि ॥८८॥

द्वादश्यां सार्पनक्षत्रे त्रयोदश्यर्यमर्क्षयोः ।
नक्षत्रलुञ्छितो योगो देवानामपि नाशदः ॥८९॥

नक्षत्रलुञ्छितं योगं पुण्डरीको निहन्तिवै[1] ।
भागीरथ्यां यथा स्नानं पापं जन्मशतोद्भवम् ॥९०॥

---

१ खयोगो हन्ति सर्वदा लि.पु.

CC-0. Nepal Sanskrit Academy, Kathmandu

गुरुर्बली स्ववर्गस्थो वीक्षयेद् वा विलग्नगः ।
पुण्डरीको महायोगः सर्वदा योगनायकः ॥६१॥

पुण्डरीकं महायोगं पक्षछिद्रोऽथ नाडिकाः ।
हन्ति पक्षिगणं श्येनो यद्वत् तद्वत् नसंशयः ॥६२॥

चतुर्दशी चतुर्थी च अष्टमी नवमी तथा ।
षष्ठी च द्वादशी चैव पक्षछिद्राह्वयाः क्रमात् ॥६३॥

क्रमादेतासु तिथिषु वर्जनीयाश्च नाडिकाः ।
भूताष्ट मनुतत्वाङ्कदश शेषाः सुशोभनाः ॥६४।

दोषनाडीषु यत्कर्म शुभं सर्वं विनश्यति ।
विवाहे विधवा नारी पतितश्चोपनायने[1] ॥६५॥

सीमन्ते गर्भनाशः स्यात् प्राशने मरणे ध्रुवम् ।
अग्निना दह्यते क्षिप्रं गृहारम्भे विशेषतः ॥६६॥

राजराष्ट्र विनाशः स्यात् प्रतिष्ठायां विशेषतः ।
किमत्र बहुनोक्तेन कृतं कर्म विनश्यति ॥६७॥

पक्षछिद्रोक्तनाडीनां दोषं हन्ति सदा तथा ।
गुणशेखरयोगोऽसौ पिनाकी त्रिपुरं यथा ॥६८॥

शुभवर्गस्थितो जीवः सुबली सौम्यवीक्षितः ।
गुणशेखर संज्ञोऽयं गुरुर्वा केवलं बली ॥६९॥

---

१ व्रात्यः स्याच्चौपनायने प्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu

४३ गुणदोषाऽपवादाऽध्यायः

गुणशेखरयोगाख्य भानुवारादिसंभवा ।
पापयोगा यथा घ्नन्ति पुरुषं स्त्रीजनास्तथा ॥१००॥

द्विदैवमित्रचान्द्रेन्द्रवह्निसार्पभतारकाः
रविवारेण संयुक्ता पापयोगाः प्रकीर्तिताः ॥१०१॥

आषाढाद्वयवह्नीज्यद्विदैवपितृतारकाः ।
सोमवारेण संयुक्ताःशुभकर्मविनाशदाः ॥१०२॥

ज्येष्ठाजपादश्रवणधनिष्ठार्द्राऽहितोयपाः ।
भौमवारेण संयुक्ताः शोभने निधनप्रदाः ॥१०३॥

अश्विनीभरणीमूलपौष्णवस्वार्द्र तारकाः ।
बुधवारेण संयुक्ताः सर्वशोभननाशदाः ॥१०४॥

अर्यमारोहिणी त्वष्ट्रधातृचन्द्राख्यतारकाः ।
गुरुवारेण संयुक्ताः शोभने निधनप्रदाः ॥१०५॥

सार्पद्विदैवमित्रेन्दुरोहिणीपितृतारकाः ।
शुक्रवारेण संयुक्ताः वर्जनीयाश्च मङ्गलेः ॥१०६॥

उत्तराफल्गुनीपौष्णपुष्यादित्यार्कवैष्णवाः ।
शनिवारेण संयुक्ताः सर्वशोभनगर्हिताः ॥१०७॥

एषु योगेषु तत्सर्वं कृतं कर्म विनश्यति ।
विवाहे विधवानारी व्रती पातकक्कद् भवेत् ॥१०८॥

CC-0. Nepal Sanskrit Academy, Kathmandu

पापयोगाः

वार	नक्षत्र						
आदित्य	विश	अनु.	मृग	ज्येष्ठ	कृति	अश्ले	
सोम	पूषा.	उ.षा.	कृ	ति.	विशा	म	
भौम	ज्ये.	पू.भा-	श्र	ध	आ	अश्ले	शत
बुद्ध	अश्वि	भ.	मू.	रे.	ध	आ	
गुरू	उ.फा	रो	चि	अभि	मृ		
शुक्र	अश्ले	विशा	अनु	मृग	रोहिणी	मघा	
शनि	उ.फा	रेवती	तिष्य	पुनर्व	हस्त	श्रवण	

वारेशे बलसंयुक्ते योगास्त्वेते बलप्रदाः ।
नकिञ्चिद् दोषदास्तस्मिन् बलहीने नसंशयः ॥१०९॥

भानुवारादिसंभूतान् पापयोगान् निहन्ति वै ।
गुणशेखरयोगोऽयं राघवो रावणं यथा ॥११०॥

एवं शुक्रोऽपि सौम्योऽपि गुरवद्योगकारकौ ।
ग्रन्थविस्तरभीत्याऽथ त्वेवं संक्षिप्य चोदितम् ॥१११॥

वर्गोत्तमगतो जीवः शुक्रो वा चन्द्रजोऽपि वा ।
गुणधूर्जटियोगोऽयं यदा ते बलिनो यदि ॥११२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

दिवैव मृत्युदो मृत्युर्योगोऽयं नचरात्रिषु ।
हन्तिधूर्जटियोगंतं सान्निपाते यथा नरम् ॥११३॥

हस्तवासवयोराद्यं विशाखार्द्राद्वितीयकम् ।
तृतीयकमहिर्बुध्ने [1] चान्त्याशं यममूलयोः ॥११४॥

दिवामृत्युप्रदाज्ञेया दोषास्त्वेते न रात्रिषु ।
शुभकार्ये प्रसूतौ च सर्वदा परिर्जयेत् ॥११५॥

दिवैवमृत्युदं [2] मृत्युयोगं हन्ति महावली ।
गुणभास्करयोगोऽयं त्विन्धनं पावको यथा ॥११६॥

दिवा मृत्युयोगः

२

नक्षत्र	पाद
ज्ये. हस्त	प्रथम
विशा. आर्द्रा	द्वितीय
अश्ले. उ. भा.	तृतीय
भर. मूल	चतुर्थ

दिवारोगयोगः

१

नक्षत्र	पाद
अश्वि. अश्ले.	प्रथम
भर. मूल,	द्वितीय
उत्तरा. श्रव	तृतीय
स्वाति. मृग	चतुर्थ

---

१ तृतीयमहाहिर्बुध्न लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

बलीनः केन्द्रगाः सौम्या भवन्ति च यदा तदा ।
गुणभास्करसंज्ञोऽयं यदि वा लाभसंस्थिताः ॥११७॥

गुणभास्करयोगं तं दिवारोगप्रदो हि यः
हन्ति रोगाह्वयो योगः संयोगो मेहरोगिणम् ॥११८॥

अश्विनीसार्पयोराद्यं द्वितीयं यममूलयोः ।
तृतीयमुत्तराहर्योर्वाय्विन्दोरन्त्यपादकः ॥११९॥

दिवारोगा इति ख्याताः शोभने रोगदाः सदा ।
दिवा रोगप्रदास्त्वेते न तु रात्रौ कदाचन ॥१२०॥

तस्माद् दिवैव संत्याज्य रोगमृत्युप्रदा यतः ।
दिवापि दोषदा नैव रवीन्द्वोर्बलयुक्तयोः ॥१२१॥

दिवैव रोगदं रोगयोगं हन्तिववाबलम् ।
गुणभास्करयोगोऽयं विपिनं पावको यथा ॥१२२॥

त्रिकोणगा यदा सौम्याः सहोत्थधनगास्तथा ।
गुणपार्श्वस्थसंज्ञोऽयं यदि ते वलवत्तराः ॥१२३॥

गुणपार्श्वस्थयोगं तं महाहालाहलो यथा ।
हन्ति तारापतिं नूनं सैंहिकेयो महाबली ॥१२४॥

द्विदैवधातृवन्ह्यर्कवसुदैवतपैतृकाः
अर्कवारेण संयुक्ता हालाहलविषोपमाः ॥१२५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

उत्तरात्रयचित्राख्यद्विदेवाह्वयतारकाः ।
सोमवारेण संयुक्ताः कालकूटविषोपमा ॥१२६॥

शततारा।द्विदैवार्द्रा उत्तराषाढतारका ।
आरवारेण संयुक्ता गुणघ्न विषसंज्ञकाः ॥१२७॥

विषयोगाः

आदित्यवार	विशा रोहिणी कृत्तिका हस्त	धनि. मघा	हालाहल
सोमवार	उ. फा, उ. षा. उ. भा, चित्रा	विशा.	कालकूट
भौमवार	शत. विशा. आर्द्रा.	उ. षा.	विष
बुधवार	अश्वि. भरणि कृत्तिका	धनि. मूल	सर्प
गुरुवार	कृत्तिका रोहिणी मृगशिरा	आर्द्रा. शतभि. उ. फा.	मङ्गलनाशदा
शुक्रवार	ज्येष्ठा, अश्ले, मघा. कृत्तिका	विशाखा रोहिणी	महादोषा
शनिवार	उ. फा, पुनर्वसु रेवती	हस्त, उ. षा. पू. षा.	गुणविमर्दन

CC-0. Nepal Sanskrit Academy, Kathmandu

अश्विनीभरणीवह्निवसुमूलाद्यतारकाः ।
बुधवारेण संयुक्ता दोषाः सर्पाह्वियास्त्वमी ॥१२८॥

भचतुष्कं वह्निधिष्ण्याद् वरुणार्यमतारकाः ।
गुरुवारेण संयुक्ता दोषा मङ्गलनाशदाः । ॥१२९॥

शक्रसार्पमघावन्हिद्विदैवाब्जजतारकाः
शुक्रवारेण संयुक्ता दोषा गुणविमर्दनाः ॥१३०॥

अर्यमादितिपौष्णार्कविश्वाषाढाख्यतारकाः ।
शनिवारेण संयुक्ता दोषा गुणविमर्दनाः ॥१३१॥

अल्पहालाहलं योगं निहन्ति चन्द्रशेखरः ।
योगो हन्ति यदा तद्वत् कुमारस्तारकं यथा ॥१३२॥

वर्गोत्तमगतश्चन्द्रो बलवान् शुभवीक्षितः ।
लग्नमेवं विधं चेद्वा गुणानां चन्द्रशेखरः ॥१३३॥

तं चन्द्रशेखरं योगं महाकाणान्धवाधिराः ।
घ्नन्ति योगा यथा मेघचयं चण्डमहानिलः ॥१३४॥

वरानर्कादितस्त्रिघ्नान् शोधयेच्चक्रधिष्ण्यतः ।
ततो नवार्कषड्भागः क्रमात् काणान्धवाधिराः ॥१३५॥

श्रीवत्ससंज्ञको योग महाकाणान्धवाधिरान् ।
दोषान् हन्ति यथा तद्वत् पातकं राघवो यथा ॥१३६॥

त्रिषष्ठलाभगाः पापाः बलिनः सौम्यवीक्षिताः ।
भवन्ति यदि योगोऽयं श्रीवत्सो योगराट् प्रभुः ॥१३७॥

CC-0. Nepal Sanskrit Academy, Kathmandu

गुणमर्दनयोगो यो योगं श्रीवत्ससंज्ञकम् ।
हन्ति यद्वद् विप्रनिन्दा स्वार्जितं धर्मसंचयम् ॥१३८॥

उच्चस्थो लाभगः सूर्यः षष्ठगो वा तृतीयगः ।
यदि स्यात् सिंहयोगोऽयं तुङ्गांशस्थोऽपि वा यदि ॥१३९॥

अर्कादिवारसंभूताः कालकूट विषाह्वयाः[1] ।
घ्नन्ति योगाः सिंहयोगं गुरुनिन्देव जीवितम् ॥१४०॥

अर्कादिवारसंभूतकालकूटाख्ययोगभाक् ।
हन्ति यद्वत् सिंहयोगः पापं पञ्चाक्षरो यथा ॥१४१॥

अधिमित्रगृहस्थो वा मित्रराशिगतोऽपि वा ।
गुणशार्दूलसंज्ञोऽयं ब्रह्मणा कथितः पुरा ॥१४२॥

हन्ति शार्दूलयोगाख्यं धूमयोगो निकृष्टवान् ।
क्रोधाद् हन्ति तपो राशिं चिरकालार्जितं यथा ॥१४३॥

त्रयोदशबलैर्युक्तः सूर्यो राशिचतुष्टयः ।
तदा धूमाह्वयो दोषः सर्वशोभननाशदः ॥१४४॥

धूमयोगं निहन्त्याशु योगः स इन्द्रनामकः ।
हन्ति यद्वद् विप्रमुख्य पापं पातकसंज्ञकम् ॥१४५॥

स्वतुङ्गस्थः कुजः सौम्यवीक्षितो लाभगो यदि ।
दुश्चिक्ये राशिसंस्थे वा गुणानामिन्द्रसंज्ञकः ॥१४६॥

---

१ कालकूटाख्ययोगभाग् पू. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

व्यतीपातकृतो दोषस्त्विन्द्रयोगं निहन्ति वै ।
लग्नोद्भवान् गुणानन्यान् पांशुला स्वकुलं यथा ॥१४७॥

धूमे मण्डलतः शुद्धे व्यतीपातोऽपरो विषः ।
व्यतीपाते च षड्राशियुक्तेऽसौ परिवेषकः ॥१४८॥

परिवेषे चक्रयुक्ते शेषे दोषो धनुर्हरेः ।
अत्यष्टिभाभयुक्तेऽस्मिन् केतुसंज्ञोऽपरो विषः ॥१४९॥

एवं पञ्चार्कदोषाः स्यु श्चतुर्मुखमुखोदिताः ।
पञ्चदोषेषु संयुक्तेष्विनेन्दूदयराशिषु ॥१५८॥

विवाहे विधवा नारी प्रतिष्ठायां कुलक्षयः ।
द्वितीयजन्मनिव्रात्यः सीमन्ते गर्भनाशनम् ॥१५१॥

नवान्नभोजते मृत्युश्चौले व्याधिर्भवेत्तदा ।
तस्मात् पञ्चार्कदोषास्ते वर्जनीयाश्च मङ्गले ॥१५२॥

इन्द्रयोगे निहन्त्याशु व्यतीपात तराद्वयम्[१] ।
योगं यद्वद् ब्रह्मवादी द्वन्द्वं सांसारिकं सुखम् ॥१५३॥

शनिः स्वतुङ्गगः सौम्यवीक्षितो लाभसंस्थितः ।
तृतीयगः षष्ठगो वा गुणानां रत्नमालिका ॥१५४॥

रत्नमालाह्वयं योगं परिवेषोऽतिभीषणः ।
हन्ति लग्नगुणानन्यान् गव्यं मद्यलवो यथा ॥१५५॥

---

१ व्यतिपाताभिधं योगं निहन्ति रत्नमालिका ।

CC-0. Nepal Sanskrit Academy, Kathmandu

परिवेषाह्वयं योगं हन्ति यद्वत् महाबलम् ।
रत्नमालाह्वयो योगः पिनाकी त्रिपुरं यथा ॥१५६॥

अधिमित्रस्य राशिस्थावथवा मित्रराशिगौ ।
कुजार्कौ भवतो यत्र गुणामरतरुर्भुवि ॥१५७॥

गुणकल्पतरुं हन्ति दोषस्त्विन्द्रधनुस्तथा ।
अश्मरी च महारोगस्त्वचिरात्तु शरीरिणम् ॥१५८॥

निर्मलोऽसौ मणिर्योगः कुपुत्रः स्वकुलं यथा ।
हन्तीन्द्र धनुषं योगं महाबलतरं परम् ॥१५९॥

स्वतुङ्गगः शशी यत्र लाभसंस्थो यदा भवेत् ।
अधिमित्रगृहस्थो वा गुणानां निर्मलो मणिः ॥१६०॥

केतुसंज्ञो महादोषो योगं गणमणिं सदा ।
भगन्दरो महारोगो हन्ति त्वग् देहधारिणः ॥१६१॥

केतुसंज्ञं महादोषं हन्ति यद्वन्महाबली ।
योगो गुणार्णवः सर्वं प्रणवः पापसंचयम् ॥१६२॥

चन्द्रार्कौ लाभगौ यत्र भवतो यदि केवलम् ।
गुणार्णवं महायोगो जनानामिष्टसिद्धिदः ॥१६३॥

गुणार्णवं महायोगं हन्ति निर्घातसंज्ञकः ।
योगोऽतिभीषणकरो[1] महरोगो यथानरम् ॥१६४॥

---

१ विभीषणकरो प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

सुदर्शनमहायोगो हन्ति निर्घातसंज्ञकम् ।
योगो यद्वत् महारोगं निरन्तरहरिस्मृतिः ॥१६५॥

धर्मकर्मद्वित्रिसंस्थः शशी यत्र भवेद् यदि ।
सुदर्शनो महायोगो दोषासुरविमर्दनः ॥१६६॥

सुदर्शनं महायोग मेष दोषो निहन्ति वै ।
अजीर्णरोगस्त्वत्यर्थमचिराद् मनुजोत्तमम् ॥१६७॥

सुदर्शनो महायोगो हन्ति निर्घातसंज्ञकम् ।
योगो यद्वत् पापचयं प्रणाम इव शूलिनः ॥१६८॥

लाभस्थितो यदा सूर्यश्चन्द्रो वा प्येक एव सः ।
गुणसागरयोगोयं यदा भवति चेद्बली ॥१६९॥

गुणसागरयोगाख्यं योगः कुलिशसंज्ञकः ।
हन्ति यद्वत् कफो दोषः सर्वधातुचयं महत् ॥१७०॥

महाबलः पुण्ययोगो योगं कुलिशसंज्ञकम् ।
हन्ति यद्वद् गुल्मचयं चूर्णं[1] हिंग्वादिकं महत् ॥१७१॥

स्ववर्गस्थ शशी यत्र लग्नात् पञ्चमगो भवेत् ।
पुण्ययोगः स विज्ञेयो गुरुर्वा यदि वा बुधः ॥१७२॥

उल्कायोगो निहन्त्याशु पुण्ययोगं महाबलम् ।
स्नूहीवृक्षक्षीरलवः शरीरमिव निर्मलम् ॥१७३॥

---

१ योगो लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

उल्कायोगं निहन्त्याशु शुभयोगो महाबलः ।
अस्मरीसंज्ञकं रोगं यद्वच् श्वेतार्कमूलकम् ॥१७४॥

नन्दाभौमार्कयोर्भद्रा शुक्रेन्दोश्च जया बुधे ।
शुभयोगा गुरौ रिक्ता पूर्णा मन्देऽमृताह्वया ॥१७५॥

शुभयोगं निहन्त्याशु विद्युद्दोषो महाबलः ।
गुणानां निचयं चान्यं शुद्धान्नं लसुनं यथा ॥१७६॥

शुभयोगो निहन्त्याशु विद्युद्दोषं महाबलम् ।
महोदरव्याधिचयं स्नुहीक्षीरं यथा तथा ॥१७७॥

सूर्यादिपञ्चममृक्षं विज्ञेयं विद्युतो मुखम् ।
शूलं चाष्टमकं प्रोक्तं सन्निपातं चतुर्दशम् ॥१७८॥

केतुरष्टादशं प्रोक्तं उल्का स्यादेकविंशकम् ।
द्वाविंशकस्तु भूकम्पं त्रयोविंशस्तु वज्रकम् ॥१७९॥

निर्घातस्तु चतुर्विंशमष्टावेत उपग्रहाः ।
स्वस्थाने [१] विघ्नदाः प्रोक्ताः सर्वकार्येषु सर्वदा ॥१८०॥

शुक्रज्ञकुजमन्देज्यवारा नन्दादिषु क्रमात् ।
सिद्धातिथिः सिद्धिदा स्यात् सर्वकार्येषु सर्वदा ॥१८१॥

सिद्धातिथिं हन्ति सम्यक् पातश्चण्डीशसंज्ञकः ।
महानन्यान् गुणान् सर्वान् तथा श्वा हव्यसंचयम् ॥१८२॥

---

१ अस्थाने प्र. ( ) एतच्चिह्नात्तरवर्ती पाठः प्र. पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

जगन्मोहने

सूर्यभात् सर्पपित्रर्क्षत्वष्टृमित्रान्त्यभेषु च ।
स विष्णुभेशक्रमशो दस्रभाच्चन्द्रसंयुते ॥१८३॥

धिष्ण्येतावति यद्यत्र दुष्टयोगः पतत्यसौ ।
चण्डीशचण्डायुधाख्यस्तस्मिन्नेवाऽपरे शुभं ॥१८४॥

चण्डायुधं सचण्डीशं हन्ति सिद्धातिथिर्यथा ।
आन्त्रवृत्तिर्यथा कायं निखिलं सुदृढं महत् ॥१८५॥

पुष्यस्याद्यद्वितीयांशसंस्थितौ चन्द्रवाक्पती ।
विजयो नाम योगोऽयं समरे विजयप्रदः ॥१८६॥

विजयाख्यं महायोगं लत्तादोषो निहन्त्यलम् ।
लग्नोद्भवान् गुणानन्यानान्त्रवृद्धिर्यथा तनुम् ॥१८७॥

अथ लत्ता

ऋक्षं द्वादशमुष्णरश्मिरवनीसूनुस्तृतीयं गुरु;
षष्ठं चाष्टममर्कजश्च पुरतो हन्ति स्फुटं लत्तया ।
पश्चात् सप्तममिन्दुजश्च नवमं राहुः सितः पञ्चमं
द्वाविंशंपरिपूर्णमूर्तिरुडुपः संताडयेत् नेतरे ॥१८८॥

ब्रह्मदण्डो महायोगो लत्तादोषं निहन्ति वै ।
यथा नयनजं पुष्पं शिग्रुमूलं महाबलम् ॥१८९॥

परमोच्चगतस्त्वेको जीवो वा ज्ञः सितोऽपि वा ।
ब्रह्मदण्डो महायोगः सर्वदोषविनाषकृत् ॥१९०॥

CC-0. Nepal Sanskrit Academy, Kathmandu

ब्रह्मदण्डं महायोगं योगो निर्घातसंज्ञकः ।
यथा हन्ति गुणानन्यान् पिशुनः स्नेहसंचयम्१ ॥१६१॥

मेघनिर्घातकम्पाश्च कुलिशं परिवेषकम् ।
विज्ञेयाश्चैकविंशर्क्षादारभ्य भयदाः क्रमात् ॥१६२॥

कामधेनु महायोगो दोषं निर्घातसंज्ञकम् ।
हन्ति यद्वत् नेत्ररोगं तुत्थजम्बीरसंयुतम् ॥१६३॥

स्वतुङ्गांशस्थिताः सौम्या एषु केषु च राशिषु ।
कामधेनुरयं योगश्चन्द्रो वा वृषभांशकः ॥१६४॥

कामधेनुं महायोगं धूमयोगो निहन्त्यलम् ।
क्षयरोगो यथा नूनं शरीरं विपुलं शुभम् ॥१६५॥

कृत्तिका रविवारे च सोमवारे पुनर्वसू ।
पूर्वाफल्घुनि भौमे च स्वातिः सौम्यदिने तथा ॥१६६॥

निर्ऋतिर्गुरुवारे च श्रविष्ठा भृगुवासरे ।
सूर्यसूनावहिर्बुध्न्यो योगो धूमाह्वय स्तथा ॥१६७॥

प्रभञ्जनो महायोगो धूमयोगं निहन्ति वै ।
उन्मादरोगं कल्याणघृतं यद्वन्महाबलम् ॥१६८॥

मूलत्रिकोणगाः सौम्या भवन्ति यदि वा शशी ।
प्रभञ्जनो महायोगस्तथा वापि तदंशगाः ॥१६९॥

---

१ स्नेहसंज्ञयम् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रभञ्जनं महायोगं योगः क्रकचसंज्ञकः ।
गुणानन्यान्निहन्त्याशु क्षीरमंम्लो यथा तथा ॥२००॥

त्रोयोदश स्युर्मिलने संख्यया तिथिवारयोः ।
क्रकचो नाम योगोऽयं मङ्गलेष्वतिर्गर्हितः ॥२०१॥

इन्द्रदण्डो महायोगो योगं क्रकचसंज्ञकम् ।
हन्ति यद्वद् राजयक्ष्मा योगं गाण्डीवसंज्ञकम् ॥२०२॥

मूलत्रिकोणगाः पापास्त्रिषष्ठायगता यदि ।
इन्द्रदण्डो महायोगस्तदंशकगता अपि ॥२०३॥

इन्द्रण्डं महायोगं कालदण्डो महाबलः ।
हन्ति यद्वत् कफो रोगः शरीरं वज्रसन्निभम् ॥२०४॥

भरणी भानुवारे च रौद्रर्क्षे यदि चन्द्रमाः ।
मघायां भौमवारश्च चित्रायां सोमजस्तथा ॥२०५॥

ज्येष्ठायां गुरुवारश्च श्रवणे दैत्यपूजितः ।
अजैकपादे मन्दश्च कालदण्डः क्रमेण हि ॥२०६॥

रूद्रदण्डो महायोगः कालदण्डं ममाबलम् ।
हन्ति यद्वत् त्रिकटुकं श्वासकाशं महाबलम् ॥२०७॥

चन्द्रःशुभांशगो यत्र भवेच् शुभनिरीक्षितः ।
रुद्रदण्डो महायोगो दोषमूलप्रभञ्जनः ॥२०८॥

---

१ मङ्गले त्वति गर्हितः प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

एकार्गलं महादोषं रूद्रदण्डो निहन्ति वै ।
कालकूटविषं यद्वत् तद्वद्देवेन्दुशेखरः ।२०९।।

व्याघातशूलपरिघव्यतिपातपूर्वंगण्डातिगण्डकुलिशेषु सवैधृतेषु ।
आदित्यचान्द्रपितृसर्पभदस्रमूलमैत्राख्यतिष्यसुरवर्धकिभानिमूर्ध्नि ।।२१०।।

एकां मूर्धगतां त्रयोदशमितास्तिर्यग्गताः स्थापयेद्
रेखाचक्रमिदं बुधैरभिहितं खार्जूरिकं तत्र तु ।
व्याघातादिषु मूर्ध्निभं च [1] कथितं तत्रैकरेखास्थयोः
सूर्याचन्द्रमसोर्मिथो निगदितो दृक्पात एकार्गलः ।।२११।।

१ भानि मूर्ध्नि प्र. ।



CC-0. Nepal Sanskrit Academy, Kathmandu

रुद्रदण्डाह्वयो योगो योगं त्वेकार्गलाह्वयम् ।
हन्ति यद्वत् पूर्णगर्भं सान्निपातज्वरो भृशम् ॥२१२॥

मुहूर्तश्चाष्टमः शस्वदभिजिद्योगसंज्ञकः ।
गुणानामधिकः सोऽपि मध्यन्दिनगते रवौ ।२१३॥

अभिजित्संज्ञकं योगं गण्डान्तो योगसज्ञकः ।
हन्ति यद्वत् मृगं व्याधः पक्षसंघमिवाखिलम् ॥२१४।

पूर्णानन्दाख्ययोस्तिथ्योः सन्धिर्नाडीद्वयं तथा ।
गण्डान्तमृत्युदं जन्म यात्रोद्वाहव्रतादिषु ॥२१५।

कुलीरसिंहयोः कीटचापयोर्मीनमेषयोः ।
गण्डान्तमन्तरालं स्याद् घटिकार्धं मृतिप्रदम् ॥२१६॥

सार्पेन्द्रपौष्णभेष्वन्त्य षोडशांशा भसन्धयः ।
तदर्धपादपादर्धं गण्डान्तं नाम संज्ञितम् ॥२१७॥

उग्रं भसन्धित्रितयं गण्डान्तं त्रितयं महत् ।
मृत्युप्रदं जन्मयानविवाहस्थापनादिषु ॥२१८॥

गण्डान्तदोषमखिलमभिजिद्योगसंज्ञकः ।
हन्ति यद्वत् सर्वपापान् राजसूयपरो नृपः ॥२१९॥

गोरेणुव्यापिताशां कनकगिरिगुहां सूर्यरश्मिप्रवेशे
दृष्ट्वा सन्ध्यानुकूले गगनमुडुगणं किञ्चिदुद्भिद्यमानम् ।
सर्वेशो हन्त्यरिष्टं न च तिथिकरणमृक्षलग्नं च सर्वं
यात्रोद्वाहव्रतादौ भवति हि विजयः सर्वकार्यार्थसिद्धिः ॥२२०॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अधस्तनयोस्तिथ्योरन्तराले वर्तमानं घटीद्वयं गण्डान्तयोगः	
पञ्चम्या अन्ते दशम्याः " पञ्चदश्योः "	षष्ठया आदौ एकादश्याः " प्रतिपदः "
अधस्तनयो राश्योरन्तराले वर्तमानं घटिकार्धं राशिगण्डान्तयोगः	
कर्कटस्यान्ते वृश्चिकस्यान्ते मीनस्यान्ते	सिंहस्यादौ चापस्यादौ मेषस्यादौ

गोधूलीको महायोगो विद्धभं पापखेचरैः।
हन्ति यद्वत् पापराशिं यथा लक्ष्मीपतेःस्मृतिः ॥२२१॥

रदः—

तिर्यक् पञ्चोर्ध्वगः पञ्च रेखा द्वे द्वे च कोणयोः।
द्वितीये शम्भुकोणेऽग्निधिष्ण्यं चक्रे तु विन्यसेत् ॥२२२॥

भान्यतः साभिजित्येकरेखाखेटेन विद्धभम् ॥२२३॥

ष्ठः—

चक्रे तस्मिन्नेकरेखास्थितेन तद्विद्धर्क्षं खेचरेण प्रदिष्टम्।
क्रूरैर्विद्धं सर्वधिष्ण्यं विवर्ज्यं सौम्यैर्विद्धं नोऽखिलं पाद एव ॥२२४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

श्रवमाख्यतिथिर्दोषं केन्द्रगो देवपूजितः ।
हन्ति यद्वत् पापचयं द्विभाषाड्वार्षिकं सदा ॥२२५॥

श्रवमाख्यतिथिर्हन्ति सौम्यग्रहकृतं शुभम् ।
लग्नलग्नांशकगुणं राजयक्ष्मेवयत् तनुम् ॥२२६॥

ग्रहजन्माह्वयो दोषो गुरुलग्नस्थितंशुभम् ।
हन्ति तारापतिं यद्वत्सैंहिकेयो महाबलः ॥२२७॥

प्रतिसूर्यो निहन्त्याशु यच्--शुभग्रजं शुभम् ।
लग्नंलग्नांशसंभूतं कुठारो विटपं यथा ॥२२८॥

प्रतिचन्द्रो निहन्त्याशु शुक्रार्यज्ञकृतं शुभम् ।
लग्नषड्वर्गसंभूतं मेघसंघमिवानिलः ॥२२९॥

स्वक्षेत्रगः स्वस्य नवांशगो वा शुभग्रहः सौम्यनिरीक्षितो वा ।
(स लग्नगो यत्र निहन्ति दोषान् पञ्चाननो यद्वदिभेन्द्रवृन्दान्)
॥२३०॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने गुणदोषापवादोनाम त्रिचत्वारिंशोऽध्यायः ॥ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

शुद्धिपत्रम्

अशुद्धम्	शुद्धम्	पृष्ठः	पंङिक्तः
स्पूर्जित्	स्फूर्जित्	१	२
पुस्तकयोनंस्तः	पुस्तकयोर्नस्तः	२	२२
त्तम्पग्	सम्यग्	३	६
स्मृतिववनम्	स्मृतिवचनम्	५	५
संम्प्राप्ते	सम्प्राप्ते	५	१३
देवश्वामी	देवस्वामी	७	१७
पुसवनम्	पुंसवनम्	१०	६
वगभूमि	वर्गभूमिः	१६	३
सग्रार्मं	संग्रामं	१७	५
तिथिमिः	तिथिभिः	१७	१५
कामिग्रीकां	कामिनीनां	१८	१८
परिपूरितायाँ	परिपूरितायां	१९	१०
बहुसहिताज्ञः	बहुसंहिताज्ञः	१०	७
द्विधा	द्विधा	२१	१३
ज्यातिःशास्त्र पठने	ज्योतिःशास्त्र पठने	२४	१०
वृद्धो	वृद्धो	२५	६
व्रूयाद्द	व्रूयाद्	२५	१७
स ब्रत्यभिधियज्ञे	स ब्रह्मत्यभियते	२६	४
दैवज्ञोह घर्मं निर्णयम्	दैवजो हि धर्म निर्णयम्	२६	१४
यस्मादर्थ	यस्मादर्थं	२७	१२
घर्मं	धर्मं	२७	१२

CC-0. Nepal Sanskrit Academy, Kathmandu

अशुद्धम्	शुद्धम्	पृष्ठः	पंङि्क्तः
मोक्षमग्यं	मोक्षमग्र्यं	२७	१२
प्रमाणस्तु	प्रमाणैस्तु	२८	१६
बहदो	बहवो	२९	६
निवसेम्	निवसेन्	२९	७
चरिष्पमाण	चरिष्यमाण	३०	२०
जन्मशव्देने	जन्मजब्देन	३१	१५
सिद्धसैनः	सिद्धसेनः	३२	२
द्वादश त्रिशं दशयोः	द्वादश त्रिंशदंशयोः	३२	९
स्त्रीपुरुषस्प च	स्त्रीपुरुषस्य च	३२	९
रिहारख्येस्	रिहाख्येयम्	३२	१५
राधवा	राघवा	३५	९
वषो	वर्षो	३६	१४
श्रब्देश	श्रब्देश	३८	४
बवाद्यव्दो	ववाद्यब्दो	४०	७
सौभ्यः	सौम्यः	४१	१६
गब्यं	गव्यं	४४	११
सस्या र्घवृष्टयः	सस्यार्घवृष्टयः	४४	२२
महर्धं	महर्घं	४५	७
महर्धं	महर्घं	४५	११
भूरिसस्यौर्धैः	भूरिसस्यौर्घैः	४५	१७
धोटकै	घोटकैः	४८	९
त्बखिला	त्वखिला	४९	१०
पीडयन्त	पीडयन्ते	५०	९
वुष्टयः	वृष्टयः	५०	१७
राज्ञाँ	राज्ञां	५०	२०
सुदिृष्टिः	सुदृष्टिः	५०	२०

CC-0. Nepal Sanskrit Academy, Kathmandu

अशुद्धम्	शुद्धम्	पृष्ठः	पङ्क्तिः
विप्रा	विप्रा	५०	२२
हतमूमयः	हत भूमयः	५०	२३
चैब	चैव	५१	६
परिविनि	परिधाविनि	५१	११
निष्यतिः	रिस्पत्तिः	५२	१
प्रवधाधेत	प्रवाधेत	५२	११
पार्थिवा	पार्थिवाः	५३	५
प्राणिनाँ	प्राणिनां	५३	१३
लकला	सफला	५३	१९
क्रोधनोद्वे	क्रोधनाब्दे	५४	६
समुदाद्वतम्	समुदाहृतम्	५५	१६
महधं	महर्घं	५७	१०
ल्मेच्छा	म्लेच्छा	५७	११
लदा	सदा	५८	२
मेधा	मेघा	५९	२
सस्पाधिरे	सस्याधिपे	५९	७
प्रजावन्ते	प्रजायन्ते	५९	१२
राजिकाल	राजिका	५९	१५
शङ्खचन्वन	शङ्खचन्दन	६०	१५
पर्यन्त	पर्यन्तं	६०	२
स्यात् सप्तभ्यां,	स्यात् सप्तम्यां	६१	२०
प्रक्तो	प्रोक्तो	६२	१०
स्पाद्	स्याद्	६२	१९
सवंमहीपाला	सर्वमहीपालाः	६३	२
पूर्वभाद्रे	पूर्वाभाद्रे	६३	६

CC-0. Nepal Sanskrit Academy, Kathmandu

अशुद्धम्	शुद्धम्	पृष्ठ:	पङ्क्ति:
जरूसँपर्णं	जलसंपूर्णं	६३	११
गताऽऽर्दा	गताऽऽर्द्रा	६४	८
चन्दे	चन्द्रे	६४	९
केन्दगे	केन्द्रगे	६४	९
भासन्तिवर्षणम्	भासान्निवर्षणम्	६४	११
वायभेषु	वायुभेषु	६५	१४
वर्ष्टि	वृष्टि	६८	१०
अनर्धता	अनर्घता	६९	१४
भूगौ	भृगौ	७०	१६
कुनृपाँश्च	कुनृपांश्च	७२	९
मथराँश्च	मथुरांश्च	७३	६
वदेद	वदेद्	७३	७
स्पूटितः	स्पुटितः	७३	१२
गतस्च	गतश्च	७४	३
यस्माद	यस्माद्	७७	५
श्रवणक्षे	श्रवणर्क्षे	७८	४
नाराणाम्	नराणाम्	७९	३
क्स्वचित्	क्वचित्	७९	१९
ताशन	हुताशन	७९	२
घ्वाट्वग्नि	वाय्वग्नि	८१	५
स्त्रवृण्या	स्त्रवृष्ट्या	८१	९
निध्नन्	निघ्नन्	८१	१३
संस्थितषु	संस्थितेषु	८४	१४
मिश्रैन्पा	मिश्रैः पा.	८४	११
समृध्दयः	समृद्धयः	८५	५
सार्पाद्रिपटके	सार्पादिषट्के	८५	७

CC-0. Nepal Sanskrit Academy, Kathmandu

अशुद्धम्	शुद्धम्	पृष्ठः	पङिक्तः
पृथुमूतिः	पृथुमूर्तिः	८६	६
कर्किणीज्ये	कर्किणीज्ये	८६	१६
सिँहराशिगते	सिंहराशिगते	८६	२१
भूपलयं	भूपालयम्	८६	२१
द्विदवनक्षत्रात्	द्विदैवनक्षत्रात्	८८	८
तरच्छीर्षम्	तच्छीर्षम्	९३	१९
ब्दिज	द्विज	९६	६
द्वि	द्विज	९६	१२
पा पीडयेत्	पीडयेत्	९७	२१
विलम्ब्य	विलम्ब्य	९९	१४
ल्मेच्छाधिपतिम्	म्लेच्छाधिपतिम्	१११	१५
क्षुद्रधाय	क्षुद्रधान्य	११४	१५
परिवेषेफला ध्यायः	परिवेषफलाऽध्यायः	११५	१
षदृतुः	षड्तुः	११९	१५
सग्क्रान्तिफलम्	संक्रान्तिफलम्	१२१	१
मज्यारह्वे	मध्याह्ने	१२२	६
अपरारह्वे	अपराह्ने	१२२	७
पूर्वारह्वे	पूर्वाह्ने	१२२	१८
यद्युभयम्	यद्युभयभे	१२३	२
भैक्ष्यं	भैक्ष्यं	१२६	१०
अधिमासपरणम्	अधिमासपूरणं	१२८	१९
युगसौरमासैक्ते	युगसौरमासैर्भवते	१३०	२१
भयन्ति	भवन्ति	१३१	४
चान्त्ते	चान्ते	१३१	११
घटिकात्रयाधिक– घटिकात्रयाधिक्त	घटिकात्रयाधिक	१३१	१२

CC-0. Nepal Sanskrit Academy, Kathmandu

अशुद्धम्	शुद्धम्	पृष्ठः	पङ्क्तिः
एतावताधिकम्	एतावदधिकं	१३२	८
हृतात्त	हृतात्तु	१३२	१२
चान्दमासः	चान्द्रमासः	१३३	१३
चान्दत्वम्	चान्द्रत्वम्	१३३	१४
चान्दसासः	चान्द्रमासः	१३३	१६
विपनात्मकन	विपलात्मकेन	१३३	१६
चान्दमासस्य	चान्द्रमासस्य	१३३	१७
शुद्धइत्यर्थं	शुद्ध इत्यर्थः	१३४	१०
मासानॉं	मासानां	१३४	१६
स्त्रिशङ्गुणिते	स्त्रिशद्गुणिते	१३४	१९
युगित्यथ	युगित्यर्थः	१३४	२३
खचतुक्कयमाघ्गिन	खचतुष्कयमाद्यग्नि	१३५	५
दिबसा	दिवसा	१३५	२१
प्राय्य	प्राप्य	१३६	१४
सिद्धात्ते	सिद्धान्ते	१३७	१६
द्वयस्ति	द्वयमस्ति	१३८	१०
चान्द्वमसो	चान्द्रमसो	१३८	१५
अयः	अतः	१३९	१२
पूबोंक्त	पूर्वोक्त	१४०	३
तच्छोत्षष्ठ्यां	तत्छेषात्षष्टया	१४०	४
भूवासरै भक्ता	भूवासरैर्भक्ता	१४०	४
चन्द्राक्वलम्वा	चन्द्रावयवलम्व्य	१४०	६
ययुक्तं	द्वययुक्तम्	१४०	२२
विग्दि	विद्भि	१४१	४
तात्पर्याभा	तात्पर्या भावात्	१४१	६

CC-0. Nepal Sanskrit Academy, Kathmandu

अशुद्धम्	शुद्धम्	पृष्ठः	पङ्क्तिः
वाच्यंम्	वाच्यम्	१४२	१५
तुल्यत्वाङ्ग	तुल्यत्वाद्ग	२४२	१६
ज्ञाद्यं	ज्ञानं ।	१४२	२३
प्रतिपादना च	प्रतिपादनाच्च	१४४	६
संसर्त्य	संसर्प्य	१४४	१३
भाकरः	भास्करः	१४४	२१
शद्धः	शुद्धः	१४७	२२
हरत्यर्क :	हरत्यर्कः	१४८	१७
प्रसंगात	प्रसंगात्	१४९	१०
मध्या कन्यार्क	मध्यकन्यार्कः	१५१	१०
कलिगताद्वाः	कलिगताब्दाः	१५१	१२
स्फुटावास्या	स्फुटामावास्या	१५१	२२
सूर्यमास ।	सूर्यमास–	१५१	२५
व्यानिष्ट		१५२	१७
अरिशसूचकाध्याय	अरिष्ट सूचकाध्यायः	१५३	१
सरीसृपाद्बा	सरीसृपाद्वा	१५३	१५
मतान्तरँ	मतान्तरं	१५७	१६
मून्धि	मूर्ध्नि	१५८	२
मुर्ध्नं	मूर्ध्नि	१५८	१६
सघ	सद्य	१६०	१३
महस्ते	वामहते	१६०	२०
घनव्यया	धनव्यया	१६३	२
अर्वश्च	अर्घश्च	१६५	१७
देजा	देशजा	१६७	१७
दहिचोचिषि	दहिभरोचिषि	१६८	१३
माहुः न	माहुः	१६८	१७

CC-0. Nepal Sanskrit Academy, Kathmandu

अशुद्धम्	शुद्धम्	पृष्ठः	पङ्क्तिः
तिग्माशु	तिग्मांशु	१६८	१८
चराप्र्येन	चरार्धेन	१७०	१५
यण्मेडु	यमेन्दु	१७१	२०
वृद्धं	वृद्धं	१७४	३
रधिर	रुधिर	१७६	१८
रधिर	रुधिर	१७६	१९
विति	पिवति	१७८	६
देबतां	देवतां	१८२	४
शुभसम्पतिभवेत्	शुभसम्पतिर्भवेत्	१८४	५
स्वप्ते	स्वप्ने	१८६	१७
षड्बिशो	षड्विंशोऽध्यायः	१८७	४
८७	१८७	१८७	२२
कृच्छ	कृच्छ्र	१८७	२०
स्यात	स्यात्	१९२	५
यघालिङ्गति	यद्यालिङ्गति	१९४	३
स मृयुं	समृत्युं	१९५	११
श्ये द्यैः	श्येनाद्यैः	१९५	१४
गमदं	गमनं	१९६	७
सधूमवन्हेनियते	सधूमवन्हेर्नियतम्	१९६	१५
क्रोष्ठृदं	क्रोष्टृदं	१९६	१६
विन्घत्त	विधत्ते	१९७	३
विनिर्दिष्टमं	विनिर्दिष्टम्	१९७	७
नियातो	निपातो	१९८	७
पञ्चतत्वम्	पञ्चभूतत्वम्	१९९	१८
२	१	२०१	४

CC-0. Nepal Sanskrit Academy, Kathmandu

शुद्धम्	शुद्धम्	पृष्ठ	पङ्क्तिः
२	१	१०१	२१
सिद्धि	सिद्धि	२०२	७
विधयानि	विधेयानि	२०२	९
दन्तकाष्ठ	दन्तकाष्ठं	२०२	१८
२	१	२०४	७
३	२	२०४	७
विधीयत	विधीयते	२०४	१७
स्त्रतादि	स्त्रेतादि	२०६	४
संर्व	सर्वं	२०६	१६
स्यृक्	स्पृक्	२०८	४
माश्वयुकू	माश्वयुक्	२१०	८
भुजभान्	भुजगान्	२१०	१०
प्राणौर्मासः	प्राणैर्मासः	२११	८
चं	च	२१२	१३
विबुधैयो	विबुधैर्यो	२१३	९
कारयेत	कारयेत्	२१६	९
हिर्वुप्न	हर्बुध्न्य	२२१	८
शटया	शय्य	२२२	५
२८ वारफलाऽध्यायः	२९ नक्षत्रफलाऽध्यायः	२२३	१
खल	खलु	२२३	१८
शटया	शय्या	२२४	११
रम्म	रम्भ	२२४	१३
गजाश्च	गजाश्व	२२६	१३
गन्त्री	मन्त्री	२२७	३
मन	नूनं	२२९	३
भेघु	भेषु ।	२२९	९

CC-0. Nepal Sanskrit Academy, Kathmandu

अशुद्धम्	शुद्धम्	पृष्ठ	पङ्क्तिः
लम्व्य	लम्व्य	२२९	१६
सुराधिपाद	सुराधिपाद्	२३०	७
मणिवजी	मणिजीव	२३०	१३
तद्गक्ष	तद्वृक्ष	२३२	७
प्रफलाऽध्याय	फलाऽध्यायः	२३३	६
रौद्रो	रौद्रो	२३४	१६
पावत्	यावत्	२३६	१०
करणऽध्याय	करणाध्याय	२३९	६
यादृश	यादृशेन	२३९	२०
क्षौणीसूनु	क्षोणीसूनु	२५०	२२
प्रवक्ष्यादि	प्रवक्ष्यामि	२५३	१६
अघ	अथ	२५४	१७
तुल्याया	तुलायाः	२५८	२
बश्चिकस्य	वृश्चिकस्य	२५८	५
विषयोग	विषयोगाः	२६५	१५
न्येष्ठा	ज्येष्ठा	२७२	२१
नक्षत्रभाला	नक्षत्रमाला	२७३	१
ऽध्याय	ऽध्यायः	२७३	१४
नक्षमाला	नक्षत्रमाला	२७५	१
चतुविंशति	चतुर्विंशति	२७५	१३
शक्षट	शकट	२७७	१०
विषनादिका	विषनाडिका	२७९	८
अष्टाहाम्यन्तरे	अष्टाहाभ्यन्तरे	२७९	१५
सौम्यजीव	सौम्यजीव	२८०	१७
कांर्येषु	कार्येषु	२८०	१९
देवण	देवगण	२८१	६

CC-0. Nepal Sanskrit Academy, Kathmandu

अशुद्धम्	शुद्धम्	पृष्ठ	पङ्क्तिः
भवेत	भवेत्	२८२	६
कुसुंमं	कुसुमं	२८२	७
पायस	पायसं	२८४	९
पञ्चमात	पञ्चमात्	२८७	१८
कृष्णागुरू	कृष्णागुरुः	२९२	६
हरेत	हरेत्	२९५	१६
विशषेण	विशेषेण	२९५	१७
मेघंदर्शने	मेघदर्शने	२९७	२०
पाश्य	प्राश्य	३०१	१३
शुभाभिधः	शुभाभिधः	३०२	१६
भवत्ः	भवेत्	३०३	२
वशविद्या	वेशविद्या	३०३	१३
चतुविशति	चतुर्विंशति	३०४	१९
बुन्ध्यो	बुध्न्यो	३०४	२०
रवती	रेवती	३०५	१४
ह्वायो	ह्वयो	३०६	८
स्याज	स्याज्	३०६	१३
लिल	तिल	३०६	१६
विंद्युल्लता	विद्युल्लता	३०७	९
ऽध्याय	ऽध्यायः	३०९	१
सक्षुभं	सक्षुभं	३११	११
वाधक	वार्धक	३१२	९
ऽध्याय	ऽध्यायः	३१२	१६
युणास्तु	युतास्तु	३१४	१६
कुक्रवारे	शुक्रवारे	३१५	२१
क्रमान्	क्रमात्	३१६	४

CC-0. Nepal Sanskrit Academy, Kathmandu

अशुद्धम्	शुद्धम्	पृष्ठ	पङ्क्तिः
पक्षस्यं	पक्षस्य	३१६	१२
बलाथिकोत्था	बलाधिकोत्था	३१७	२०
लग्नो	लग्नगो	३१८	११
भ्युदयेंऽपि	भ्युदयेऽपि	३१६	१२
स्ववगग	स्ववर्गगः	३१६	१७
वरयोगागुणं	वरयोगगुणं	३२६	१०
पञ्चावक्त्र	पञ्चवक्त्र	३२६	२१
ग्रहजम्मकृतं	ग्रहजन्मकृतं	३३०	४
मृतसंज्ञक	मृतसंज्ञकः	३३१	८
दस्त्र	दस्त्र	३३२	५
वञ्जनीयौ	वर्जनीयौ	३३२	१०
त्वष्ट्र	त्वष्ट्र	३३७	१२
परिवेधह्वयम्	परिवेषाह्वयम्	३४५	२
मणिर्येगः	मणिर्योगः	३४५	८
महायोग	महायोगं	३४६	६
त्रोयोदश	त्रयोदश	३५०	४
दृक्यात	दृक्पातः	३५१	६

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

श्री ५ को सरकार, एजुकेशन प्रेसमा मुद्रित
काठमाडौं, नेपाल